AR
230

GOVERNMENT OF TAMIL NADU
TRUTH ALONE TRIUMPHS

# SODASADHYAYI

## PART - III

EDITOR :

*R. GANESAN*

GENERAL EDITOR :

*K. DAMODARAN*, M.A.,

राजकीय प्राच्यलिखितग्रन्थालयप्रसिद्धीकरण सङ्ख्या-432
संस्कृतप्रसिद्धीकरणसङ्ख्या-117

# षोडशाध्यायी - सटिप्पणी

## भागः - 3

सम्पादकः

**रा. गणेशः**

संस्कृतपण्डितः

चेन्नै - ५

सामान्यसम्पादकः

**के. दामोदरः**

निर्देशकः

पुरावस्तुगवेषणविभागः

चेन्नै -११३

जि.ओ.एम्.एल्.

1999 **मूल्यः105 रू**

Govt. Oriental Manuscripts Library Publication No: 432

Sanskrit Publication No: 117

# SODASADHYAYI - WITH COMMENTARY

## Part - III

Editor

**R. GANESAN,**

Sanskrit Pandit,

Government Oriental Manuscripts Library

Chennai - 5

Gen. Editor

**K. DAMODARAN, M.A.**

Director

Dept. of Archaeology

Chennai - 113

G.O.M.L

Chennai

Price: Rs.105/-

1999

Govt Oriental Manuscripts Library Publication No: 432

Sanskrit Publication No: 117

# SODASADHYAYI - WITH COMMENTARY

Part - III

Editor

**R. GANESAN,**

Sanskrit Pandit,

Government Oriental Manuscripts Library

Chennai - 5

Gen. Editor

**K. DAMODARAN, M.A.**

Director

Dept. of Archaeology

Chennai - 113

G.O.M.L.

Chennai

Price: Rs.105/-

1999

॥ श्रीः ॥

## अथ नवमाध्यायस्य द्वितीयः पादः ॥

**॥ गीतीनां सामगानताप्रदर्शकं ऊहग्रान्थस्य पौरुषेयत्वप्रदर्शकं इति वर्णकद्वयसहितं अधिकरणम् ॥**

(सू) सामानि मन्त्रमेके स्तुत्युपदेशाभ्याम् ॥

सन्ति सामानि रथन्तरं बृहत् वैरूपं वैराजं शाक्वरं रैवतमिति "अभित्वा शूर नू नुम" इत्यादिषु। तत्र संशयः - किं प्रगीता अभित्वेत्या-दयो मन्त्रा रथन्तरादिशब्दाभिधेयानि सामानि उत गीतयो रथन्तरादिशब्दाभिधेयानि सामानीति।

तत्र प्रगीतमन्त्रेषु अभियुक्तप्रयोगदर्शनात् प्रगीता मन्त्रा रथन्तरादिशब्दाभिधेयानि सामानीति प्राप्ते -

ब्रूमः। आकृतिवचनत्वन्यायाद् गीतयः रथन्तरादिशब्दाभिधेयानि। एतच्च सप्तमद्वितीयाद्ये वादाधिकरण उक्तं अत्र स्मार्यते।

अथवा "एकं साम, त्यृचे गायति, सोऽयमूहग्रन्थः छन्दोगैः पठ्यते। स किं नित्यो वेद उतानित्यो न वेद इति।

तत्र कर्तृस्मरणाभाववेदत्वप्रसिध्दयादिसत्वान्नित्य इति प्राप्ते।

ब्रूमः। "यद्योन्यां तदुत्तरयोर्गायतीति वचनेनोपोद्बलिताहस्स-माख्यानबलादनित्य ऊहो न वेद इति॥

अत्रेदमवधेयम्-यथा बह्वृचाध्यापकानां महाव्रतप्रयोगप्रतिपादके आश्वलायननिर्मिते महाव्रतस्य पञ्चविंशतीत्यादिके कल्पसूत्रे अरण्ये अधीयमाने पञ्चमारण्यकमिति वेदत्वेन प्रसिध्दिः तथा छन्दोगाध्यापकानामूहेऽनध्यायवर्जनादिसाम्यात् वेदत्वप्रसिध्दिरिति॥

॥ श्रीः ॥

**॥ अथ नवमस्य द्वितीयः पादः ॥**

(टि) सप्तमाद्य उक्तमेवोत्तरविवक्षार्थं स्मारयति किमित्यादिना।

अत्र द्वितीयं वर्णकमारचयति अथवेत्यादिना। अत्रेदमित्यादि पूर्ववत् प्रासङ्गिकम्॥

## (मू)

### ॥ साम्न ऋकसंस्कारकर्मताधिकरणम्॥

### सू. कर्म वा विधिलक्षणम्॥

गीतिः सामेत्युक्तम्। तत्र संशयः - किं साम ऋचं प्रति प्रधानं उत संस्कारकर्म ऋक्संस्कारार्थमृचं प्रति गुणभूतमिति। तत्र "रथन्तरं बृहद् गायती"त्यादि द्वितीयानि र्देशस्य कर्मकाले प्रयोगस्य प्रधानकर्मलक्षणस्य सत्वात् प्रधानकर्मैव साम। तस्य क्रतोर्बहिः प्रयोगः फलार्थं, क्रतुमध्ये प्रयोगस्त्वारादुपकारक इति प्राप्ते:

ब्रूमः। साम्नः संस्कारकर्मत्वे क्रत्वङ्गत्वेन चोदितायाः स्तुतेः निवृत्त्यर्थमपेक्षितस्य ऋगक्षराभिव्यक्त्यात्मकस्य ऋक्संस्कारस्य दृष्टप्रयोजनस्य लाभात् ऋचं प्रति गुणभूतमृक्संस्कारकमेव साम अक्षराभिव्यक्तिरेवर्चः संस्कारः अकर्मकाले प्रयोगस्तु वाचनिकः शिक्षार्थ इति।

(टि) इदानीं गानकर्मणो गुणप्रधानभावश्चिन्त्यते-अकर्मकाले प्रयोगस्येति। संस्कारकर्मत्वे ह्यक्षराभिव्यक्तिःप्रयोजनम्। सा च प्रयोगकाल एवोपयुज्यत इति अकर्मकाले प्रयोगो न स्यादित्यभिप्रायः। दृष्टप्रयोजनस्य लाभादिति। अनेन सक्तुहोमवैषम्यमपि विवक्षितम्। वाचनिक इति।

"गर्भाष्टमे वर्ष उपनयीत, श्रावण्यां पौर्णमास्यामुपाकृत्य स्वाध्यायमधीयीतेति वचनं, अयं च स्वाध्यायाध्ययन-

विधिः स्वाध्यायसंस्कारार्थः यथा सामविधिर्ऋक्संस्कारार्थस्तद्वदिति। वाचनिके त्वदृष्टार्थत्वं स्यादित्या शङ्क्याह-शिक्षार्थ इति॥



### ॥ तृचे प्रत्यृचं कृत्स्नसाम्नः समापनाधिकरणम्॥

### सू. तृचे स्यात् श्रुति निर्देशात्॥

(मू) ज्योतिष्टोमे श्रूयते "तस्मादेकं साम तृचे क्रियते स्तोत्रीयमिति रथन्तरं पृष्ठं भवति यज्ञायज्ञीयेन स्तुवीतेत्यादिभिःसाम्नः स्तोत्रसाधनत्वं विहितम्। स्तोत्र साधनभूतऋ गक्षराभिव्यक्तिद्वारा च साम्नः स्तोत्रसाधनत्वं ; स्तोत्रसाधनभूतं स्तोत्राङ्गं सामात्र स्तोत्रीयमित्युच्यते; स्तोत्रसाधनत्वं च विहितमिति स्तोत्रीयशब्दोऽनुवादकः। ऋचश्च स्तोत्रसाधनत्वरूपस्तोत्राङ्गत्वमङ्गप्रकरणक्रमैः सिध्दमिति; तदपि नात्र विधेयमिति ऋगप्यनूद्यते। ऋक्सामयोः संस्कार्यसंस्कारकभावोऽपि न विधेयसामर्थ्यादृचि साम गायतीति वचनाद्वा सम्प्राप्तत्वात्। ततश्च संस्कारकत्वेनाप्राप्तमेव सामकरणंसाम क्रियत इत्यनूद्यते। परिशेषात् त्रित्वसङ्ख्यात्र विधेयेति स्थितम्। तत्र संशयः - किमियं त्रित्वसङ्ख्यानिर्वृत्त्यर्थत्वेन विधानात् सामाङ्गम्। ततश्च तिसृषु ऋक्षु व्यासज्यमानं कर्तव्यमुत स्तोत्रसाधनभूतऋक्परिच्छेदकत्वेन विधानात् परम्परया स्तोत्राङ्ग; ततश्च प्रत्यृचं परिसमाप्तं गानं कर्तव्यमिति। तत्र प्रत्यृचं गाने क्रियत इत्यभ्यासे लक्षणाप्रसङ्गात् "साम क्रियत" इति सामनिवृत्तिमुद्दिश्य आर्थिकतत्साधनभूतगर्गतत्रित्वसङ्ख्यायाः सामनिवृत्त्यर्थत्वेन विधानात् सामाङ्ग। ततश्च व्यासज्यमानं कर्तव्यमिति प्राप्ते। ब्रूमः। करोतेरनुवादस्य लक्षणायां दोषाभावात् त्रित्वसङ ख्यायाः स्तोत्रसाधनभूतर्परिच्छेदकत्वेन विधानात् त्रित्वसङ्ख्या स्तोत्राङ्गम्। ततश्च प्रत्यृचं परिसमाप्तमेव गानं कर्तव्यमिति॥

(टि) तृचे गानमिति दशमे स्थितम्। तत् किं प्रत्यृचमुत व्यासज्येतीह चिन्त्यते। प्रधानभूतगर्गता सङ्ख्या कथं गुणभूतस्य साम्नोऽङ्गं स्यादित्यत्राह-आर्थिकंति। प्रधान भूतानामत्यृचामार्थिकं सामसाधनत्वमस्त्येवेति भावः। व्यासज्येति। नहि प्रत्यृचं गीयमानस्य त्रित्वमङ्गं सम्पादितं स्यादिति न्यायप्राप्तां प्रति प्रधानावृत्तिं वचनबलाद्वाधत इति भावः। स्तोत्रसाधनेति। अयमाशयः-"रथन्तरं पृष्ठं भवती" त्यादिभिः

साम्नः स्तोत्रसाधनत्वं विहितम्। स्तोत्र साधनभूतर्गक्षराभिव्यक्त्या हि साम्नः स्तोत्रसाधनत्वम्। वाक्यं च स्तुतिबुद्धेः साधनम्। तच्चर्गेव। ॠक्समुदायो

हि वाक्यसमुदायः। स च न स्तुतिबुद्धेः साधनम्। तस्मात् व्यासज्यगीयमानस्य साम्नः स्तोत्रसाधनत्वं न सम्भवतीति सामाङ्गत्वेनाघटमानं त्रित्वं स्तोत्रसाधनभूतर्क्परिच्छेदेन स्तोत्राङ्गत्वेनैव विधीयत इति॥

**॥ समास्वेव तिसृव्वृक्षु गानाधिकरणम्॥**

**(सूं) तदभ्यासः समासुस्यात्॥**

(मू) ज्योतिष्टोमे श्रूयते "तस्मादेकं साम तृचे क्रियते स्तोत्रीयमिति। तत्रच प्रत्यृचं परिसमाप्तं गेयमिति समधिगतम्। तत्र संशयः - किं समानच्छन्दस्कासु वा विषमच्छन्दस्कासु वा गेयमिति अनियम उत समानच्छन्दस्कास्वेवेति नियम इति। तत्र नियामकशास्त्राभावादनियम इति प्राप्ते।

ब्रूमः। योन्यृक्समानच्छन्दस्कास्वेव गेयमिति नियमः, अन्यथा न्यूनातिरिक्तत्वदोषप्रसङ्गादिति॥

(टि) न्यूनातिरिक्तत्वेति। तदुक्तमाकरे "संशयविलेशपरिहारायेति॥

**॥ " उत्तरयोर्गायिति" इत्यत्रोत्तराग्रन्थस्थयोर्ॠचोः**

**ग्रहणं, अतिजगत्यां अभ्यस्यमानायां त्रिशोक-**

**गानं, इति वर्णकद्वयसहितमधिकरणम्॥**

**सू. नैमित्तिकं तूतरात्वमानन्तर्यात् प्रतीयेत॥**

(मू) ज्योतिष्टोमे समामनन्ति " रथन्तरमुत्तरयोर्गायति बृहदुत्तरयोर्गायति यद्योन्यां तदुत्तरयोर्गायतीति। छन्दोगानां द्वौ ग्रन्थौ छन्दोग्रन्थ उत्तराग्रन्थश्चेति। छन्दोग्रन्थ एव योनिग्रन्थ इत्युच्यते। तत्र नानाविधानां



साम्नां योनिभूता ॠचः अग्र आयाहीत्यादयः पठिताः। उत्तराग्रन्थे तु " उपास्मै गायते" त्यादीनि त्र्यृचात्मकानि सूक्तानि पठितानि। तत्र छन्दोग्रन्थे " अभि त्वा शूरेति रथन्तरयोनेः परतः" त्वामिदि हवामहै इति बृहद्योनिः

पठिता। उत्तरग्रन्थे तु " अभित्वेत्यस्यानन्तरं" न त्वा वां इत्यृक् पठिता। एवं स्थिते " उत्तरयोर्गायतीत्यत्र संशयः किं योन्युत्तरयोः त्वामिध्दीत्याद्ययोरुत्तराग्रन्थाधीतयोः" न त्वा वानित्याद्ययोः वा गेयमित्यनियमः उतेत्तराग्रन्थाधीतयोरेवेति नियम इति। तत्र "त्वामिध्दी" त्याद्ययोः "न त्वा वानि" त्याद्ययोश्च स्वयोन्युत्तरत्वाविशेषादनियमः इति प्राप्ते

ब्रूमः। उत्तराशब्दस्य उत्तराग्रन्थे संज्ञारूपेण प्रसिध्दत्वादुत्तराग्रबाधि (ग्रन्थाधी) तयोरेवेति नियम इति। अत्रेदमवधेयम्- संज्ञाशब्दस्यान्यानपेक्षत्वात् अन्य सापेक्षप्रवृत्तिसम्बन्धिशब्दात् बलवत्त्वमिति॥

अथवा अस्ति द्वादशाहः- " द्वादशाहेन प्रजाकामं याजयेदिति। तत्र" एकविंशषोडशी वैराजं सामेति श्रुते पार्ष्ठिके चतुर्थेऽहनि " त्रैशोकं नाम ब्रह्मसामातिजगतीषु स्तुवन्त इति श्रूयते। " विश्वाः पृतना" इत्यादि जगत्यामुत्पन्नं च त्रैशोकं साम, उत्तराग्रन्थे च विश्वाः पृतना इति ॠचे योन्युत्तरे द्वे बृहत्यौ पठ्येते, " नेमि नमन्ती" ति " समीरे भास" इति

च समानच्छन्दस्कासु गेयं उत्तराग्रन्थाधीतयोश्चेति स्थितम्। अत्रोत्तरयोः समानच्छन्दस्कत्वाभावात् संशयः किं " समासु गेय " इत्यनुरुध्य " उत्तरयोरि" त्येतदनादृत्य द्वे अतिजगत्यावानीय तयोः गेयं अथवा " उत्तरयो" रित्येतदनुरुध्य " समास्वित्येतदनादृत्य बृहत्योरेव गयमिति।

**" तत्रातिजगतीषु स्तुवत" इति अतिजगतीबहुत्वश्रवणात् उत्पत्त्यतिजगत्यावानीय, तयोः गेयमिति प्राप्ते।**

ब्रूमः। उत्तराग्रन्थपठितयोर्बृहत्योरेव क्रत्वर्थत्वात्

तयोरेव गेयमिति। एकविंशत्वसम्पत्तये एकैकस्यामृचि सप्तकृत्वोऽभ्यस्यमानायां "विश्वा पृतना" इत्यतिजगत्याएव अभ्यासापेक्षया बहुत्वं सञ्जातमिति अतिजगतीष्विति श्रुतबहुत्वोपपत्तिरिति बोध्यम्॥

(टि) स्वयोन्युत्तरात्वाविशेषादिति। सम्बन्धिशब्द उत्तराशाब्दः तथैव लोके प्रसिध्दत्वादिति भावः। विनिगमकं दर्शयति अत्रेदमित्यादिना। अस्मिन्नधिकरणे द्वितीयं वर्णकं रचयति अथवेत्यादिना। उत्पत्त्यतिजगत्याविति। संशरविलेशपरिहारायेति भावः॥

**॥ बृहतीपङ्क्त्योरेवे प्रगाथेन रथन्तरस्थ गानसाधकं, बृहतीविस्तारपङ्क्त्यो; प्रगाथनेन रौरव यौधाजयसाम्नोर्गानसाधकं अनुष्टुब्गायत्र्योः प्रग्रथनेन श्यावाश्वान्धीगवयोर्गानसाधकं, पादप्रग्रथनेन ब्रह्मसामगानसाधकं इति वर्णकचतुष्टयोपेतं षष्ठाधिकरणम्॥ (सू.) प्रागाथादिकं तु॥**

(मू) ज्योतिष्टोमे श्रूयते "बृहत् पृष्ठं भवति रथन्तरं पृष्ठं भवतीति। तत्र बृहद्रथन्तरयोर्योनी बृहत्यौ "अभि त्वाशूर "त्वामिध्दी", उत्तरे च सतो बृहत्यारव्ये पडक्ती "न त्वा वां" स त्वं न श्वत्रेत्येते। तत्र श्रूयते "न वै बृहद्रथन्तरमेकं छन्दो यत्तयोः पूर्वात बृहती ककुभावुत्तरे" इति। तत्र

संशयः-किमुत्तरां पङ्क्तिपरित्यज्य द्वे द्वे ककुभौ आगमयितव्ये उत योन्युत्तरयोर्बृहतीपङक्तत्योरेव प्रग्रथनेन ककुभावुत्तरे सम्पादनीये इति। प्रग्रथनेन मुख्यककुप्सम्पत्त्यभावात् द्वे द्वे उत्पत्तिककुभावागम-

यितव्ये इति प्राप्ते।

ब्रूमः। प्रगाथसमाख्यास्मरणात् बृहतीपङक्तयोः प्रग्रथनेन ककुभौ सम्पादनीये इति। अत्र प्रग्रथनं चतुर्थषष्ठयोः

पादयोः द्विरावृत्तिरिति। प्रकृष्टं गानं प्रगाथः। प्रकर्षश्च कस्यचिद् भागस्य पुनः पुनर्गानमिति प्रगाथसमाख्याव्युत्पत्तिरिति बोध्यम्। ज्योतिष्टोमे त्रिच्छन्दाः आवापो माध्यन्दिनं पवमानं पञ्च सामा गायत्रा महीयवे गायत्रे



त्यृचे भवतः, रौरवयौधाजये बार्हते औशसनमन्त्यत्रिष्टुत्रिप्स्विति श्रूयते।

तत्र गायत्रामहीयपयोर्द्वयोरप्यृचात इति त्र्यृचामाश्रयः रौरवयौधाजीयाख्ययोस्तु साम्नोः पुनानः सीमेति प्रागाथ आश्रयः। औशनसस्य "व्रतु द्रवेति त्र्यृच आश्रयः। एवं गायत्रीमहीयरौरवयौधाजी यौशनसाख्या पञ्चभिः सामभिः गायत्री बृहती त्रिष्टुबिति..निवृत्तितः पञ्चदश माध्यान्दिनपवमान इति। तत्र "पृतनास्सोमेति प्रथमा बृहती पुनानः सौमेत्येव। उत्तरा तु दुहान उ... धिरिति सा विष्टारपङ्क्तिः। रौरव यौधेय बार्हतेत्यृचेभवत" इति श्रूयते। तत्र

संशयः - किमुत्पत्तिर्बृहत्या वा नेतव्ये उत प्रग्रथनेन पठितयोरेव प्रग्रथनेन द्वे बृहत्यौ सम्पादनीये इति।

"त्र्यृचे भवत" इति विशेषतः श्रवणादागमयितव्य इति प्राप्ते।

ब्रूमः। उत्तरपाठसामार्थ्यात् प्रगाथसमाख्यानात् प्रग्रथनेन सम्पादनीये इति। विशेषता "त्रृचे भवत" इति श्रवणादागमयितव्यमिति शङ्कानिरासार्थमिदमधिकरणमिति।

अत्र प्रग्रथनं तु चतुर्थषष्ठ्यो पादयोस्त्रिरावृत्तिरिति अथवा ज्योतिष्टोमे पञ्चच्छन्दा आवाप आर्भवः पवमाना सप्तसामा गायत्रसहिते गायत्रे तृचे भवतः श्यावाश्वान्धिगवे आनुष्टुभे उष्णिहि सप्तशफं ककुभि पौष्कलं

कावमन्त्यं जगतीष्विति। तत्र गायत्रसंहितयोःस्वादिष्टे तृच आश्रय; श्यावाश्वान्धिगवयोः पुरो. जतीति तृचः "सहवस्य इन्द्रमच्छेत्यृकृ तृचः। पौष्कलस्य" पवस्व मध्रमत्तम इति तृचौ, प्रगाय - आश्रयकावस्य। भिप्रायाणि पवत इति तृच आश्रयः। एवं गायत्रसंहितश्यावाश्वान्धिगवसवपौष्कलकावाख्यैः सप्तभिः सामभिः गायत्र्युष्णिगनुष्टुप्पकुब्जगतीभिः पञ्चभिः छन्दोभिः निवृत्तितः सप्तदशस्तोम आवेर्भवः पवमानः। तत्र शावाश्वान्धीगवयोराश्रये पुरोजितीति तृचे एकानुष्टु.. प्रथा पुरोजतीत्येव। उत्तरयोधरयातन्दुरोषमित्येते गायत्र्यौ श्यावाश्वान्धीगवे आनुष्टुभे इति च श्रूयते।

तत्र संशयः - किमुत्पत्त्यनुष्टुभावागमयितव्ये उत प्रग्रथनेन द्वे सम्पादनीये इति।

**" आनुष्टुभे" इति विशेषतः श्रवणात् आगमयितव्ये इति प्राप्ते।**

ब्रूमः। प्रगाथसमाख्यानात् प्रग्रथनेन द्वे सम्पादनीये इति। प्रपञ्चार्थमिदमधिकरणम्। अत्र प्रग्रथनं तु चतुर्थसप्तमयोः पादयोर्द्विरवृत्तिरिति॥

अथवा गवामयने " अभिवर्तो ब्रह्मसामं भवतीति श्रूयते। ब्रह्मसाम प्रकृत्यामनन्ति " चतुश्शतमैन्द्रबार्हताः प्रगाथा भवन्ति त्रयस्त्रिंशच्च सतो बार्हतास्तृचा इति। तत्र संशयः किं तिसृषु ऋक्षु गानमुत द्वयोर्द्वयोः प्रग्रथनेन गान मिति। तत्र तृचप्रापि चोदकग्रहासम्भवादेकप्रगाथगते द्वे ऋचौ द्वितीयप्रगाथगतामेकामृचं चेत्येवं प्रग्रथ्य तिसृषु ऋक्षु गानमिति प्राप्ते।

ब्रूमः। "अन्या अन्या ऋचो भवन्तीतिवचनात् द्वयोः द्वयोः पूर्वोक्तवत् पादप्रग्रथनेनैवावगानं न पूर्वप्रग्रथनेनेति ऋग्ब्राह्मणचोदकानुग्रहः प्रगाथवचनोपपत्तिश्च भवतीति शङ्कानिरासार्थमिदमधिकरणम्॥

(टि) मुख्येति। अक्षरसामान्यमात्रेण गौणी हि तदा स्यादिति भावः। अस्मिन्नधिकरणे द्वितीयं वर्णकमारचयति अथवेत्यादिना। तृतीयं वर्णकमारचयति अथवेत्यादिना। चतुर्थं वर्णमारचयति अथवेत्यादिना॥

**॥ गीतिसम्पादकाक्षरविकारादीनां विकल्पाधिकरणम्॥**

**सू. अथैकत्वाद्विकल्पः स्यात्॥**

(मू) छान्दोग्यतलवकारादिसहस्रसामशाखासु विलक्षणगान-हेतुभूताक्षरविकारादय आम्नाताः। तत्र संशयः किमेते कर्मानुष्ठानसमये समुच्चेतव्या उत विकल्पयितव्या इति।

तत्र सर्वेषां सर्वाङ्गोपसंहारिप्रयोगवचनपरिगृहीतत्वाविशेषात् समुच्चेतव्या इति प्राप्ते,



ब्रूमः। सर्वेषां युगवत्प्रयोगासम्भवाद्विकल्पयितव्या इति।

(टि) व्रीहियववत् सिध्द एव विकल्पः सामप्रसङ्गात् स्पष्टार्थं प्रदर्श्यते छान्दोग्येति॥

**॥ साम्नैव स्तवविधानसाधकं, प्रगीतयैवर्चा वन्ह्युपस्थानसाधकं याज्यानुवाक्यादीनां तानेन प्रयोगसाधकं इति वर्णकत्रयसहितमधिकरणम्॥**

**सू. अर्थैकत्वाद्विकल्पः स्यादृक्सामयोस्तदर्थत्वात्॥**

(मू) क्वचिद्विकृतिविशेषे श्रूयते - "ऋचा स्तुवते साम्ना स्तुवते यदृचा स्तुवते तदसुरा अन्ववायन् यत् साम्ना

स्तुवते तदसुरा नान्ववायन् य एवं विद्वान् साम्ना स्तुवीते''-ति। अत्रग्रहमप्रगीतपरम्। तत्र संशयः - किमृचा साम्ना वा स्तोतव्यमिति विकल्प उत साम्नैवेति। द्वयोर्वचनाद्विकल्प इति प्राप्ते।

ब्रूमः। ऋग्ग्रहणस्यासुरावगमननिन्दया सामप्रशंसार्थत्वात् साम्नैव स्तोतव्यमिति नियमः न तु विकल्प इति। क्वचित् कर्मविशेषे श्रूयते "अयं सहस्रमानव इत्येतया आहवनीयमुपतिष्ठत" इति। अयं " सहस्रमानव" इत्यृक् पठिता प्रगीता च। तत्र संशयः - प्रगीतयाप्रगीतया उपस्थातव्यमिति विकल्पः उत प्रगीतयैवेति नियम इति। तत्र प्रयोजनैक्ये सति विशेषाश्रवणाद्विकल्प इति प्राप्ते।

ब्रूमः। एतयेति सर्वनाम्ना प्रकृतप्रगीतायाः पाठस्य प्रगाणा-

प्रगीतयैवोपस्थातव्यमिति नियम इति।

अथवा याज्यापुरोऽनुवाक्यादिमन्त्राः क्वचित्त्रैस्वर्येणाधीताः क्वचिच्च चातुस्वर्येण। प्रचयाख्यश्चतुर्थस्वरः। तत्र संशयः किं कर्मसु त्रैस्वर्यचातुस्स्वर्ययोः समुच्चय उत विकल्पः अथवा तानापरपर्यायैकश्रुत्या प्रयोग इति।

तत्र सर्वाङ्गोपसंहारिप्रयोगवचनेन सर्वेषां गृहीतत्वात् समुच्चय इति चेत्।

उच्यते. प्रयोजनैक्ये सति विशेषाश्रवणात् विकल्प इतीति प्राप्ते।

ब्रूमः। "तानो यज्ञकर्मणीति स्मृत्यनुमितवचनात् एकश्रुत्या प्रयोग इति॥

(टि) अप्रगीतर्क्परमिति। प्रगीतायाः सामोपदेशेनैव सिध्दत्वादिति भावः। अत्र द्वितीयं वर्णकमारचयति - कचित् कर्मविशेष इत्यादिनां। तृतीयं वर्णकमारचयति अथवेत्यादिना। सामप्रसङ्गाच्चात्र मन्त्राणां स्वरश्चिन्त्यते-एक श्रुत्या प्रयोग इति। अर्थावगमार्थं तु स्वराध्ययनमिति द्रष्टव्यम्॥

॥ उत्तरावर्णवशेन गानाधिकरणम्॥

(सू.) सामप्रदेशे विकारस्तदपेक्षः स्याच्छास्त्रकृतत्वात्

(मू) इदमाम्नायते-" रथन्तरमुत्तरयोर्गायति, बृहदुत्तरयोर्गायति, यद्योन्यां तदुत्तरयोर्गायति, कवतीषु रथन्तरं गायति, विराट्सु वामदेव्यं गायतीति। अत्र संशयः-वृद्धं तालव्यमायि भवतीति च गानलक्षणप्रक्रियया वृद्धमिति

सन्ध्यक्षरमुच्यते। तत्र संशयः-किं साम्नोत्तरयोर्गातव्यं किं यस्मिन् प्रदेशे यावतिथे ऽक्षरे योनावायीभावः उत्तरयोस्तावतियमक्षरं असन्ध्यक्षरमपि तस्मिन् प्रदेशे आयीभाव इति योनिवर्णवशेन गानोत्तरयोः साम गातव्यं ततो नोहः साम्नां, अथवा यस्मिन् प्रदेशे उत्तरयोः सन्ध्यक्षरं तत्रैवायीभाव इति उत्तरावर्णवशेन गातव्यं तत ऊह इति।

तत्र रथन्तरादिस्वरूपस्यैवातिदेशात् तदविनाशाय योनिवर्णवशेनैव उत्तरयोरपि गातव्यं ततो नोह इति प्राप्ते।

ब्रूमः। रथन्तरादिस्वरूपातिदेशस्य उत्तरापठितस्तोत्रसाधनभूतोत्तरापठितर्ग्वर्णाभिव्यक्त्यर्थत्वात् उत्तरावर्णवशेनैव गातव्यं ततश्चोहः स्यादिति॥

(टि) एवमौपोद्घातिकं प्रासङ्गिकं च समाप्याधुना प्रकृतं साम्नामूहं चिन्तयति-तदविनाशायेति। योनौ सन्ध्यक्षरं



निवर्त्याकारेकारावुच्चश्शिताविति भावः। नहि योनावेकारं लुप्त्वा-कारेकारावुच्चरितौ येनैवं स्यात्। किं तर्हि ? एकारो नाम न वर्णान्तरं अवर्णवर्णौ सहितावेकत्वमापन्नौ तौ चायीभावेन विश्लेषितौ दर्शितौ प्रत्यक्षं ह्यवर्णवर्णविकारे प्रत्यभिज्ञायेते इत्यभिप्रेत्याहऋग्वर्णेति। अन्यथा साम्नः स्तोत्रसाधन-त्वमेव न स्यादिति भावः॥

॥ उत्तरयोः स्तोभातिदेशाधिकरणम्॥

सु. स्तोभस्यैके द्रव्यान्तरे निवृत्तिमृग्वत्॥

(मू) इदमाम्नायते " रथन्तरमुत्तरयोर्गायति, बृहदुत्तरयोर्गायति, यद्योन्यां तदुत्तरयोर्गायति" इति। तत्रोत्तरावर्णवशेन गातव्यमिति समधिगतम्। तत्र संशयः-किं साम्न्यतिदिश्यमाने स्तोभा अपि अतिदिश्यन्ते वा न वेति। तत्र स्तोभानां सामभिन्नत्वादृगंक्षरवन्नातिदिश्यन्ते स्तोभा इति प्राप्ते।

ब्रूमः। स्तोभानां गीतिकालपरिच्छेदेन सामाङ्गत्वात्स्तोभा अपि अतिदिश्यन्त इति॥

(टि) प्रसङ्गादिदमारभ्यते-किं साम्नीति। सामाङ्गत्वादिति। सामनि हि योनौ येनांशेन ऋगक्षराण्यभिव्यञ्जन्ति तेनांशेन दृष्टमेव स्तुतावुपकुर्वन्ति स्तोभाक्षरेण निर्वर्त्येन त्वंशेन स्तुत्यौपयिकमदृष्टं कुर्वन्ति। तत्र यदि स्तोभा नातिदिश्येरन् तदा तन्निर्वर्त्यगीत्यंशलोपात्तत्कृतादृष्टोपहारहान्या वैगुण्यं स्यादिर्त्यतोऽतिदिश्येरन्निति भावः।

॥ स्तोभलक्षणाधिकरणम्॥

सू. अधिकं च विवर्णं च जैमिनिः स्तोभशब्दत्वात्॥

(मू) स्तोभस्य लक्षणं नास्ति किं वास्तीति संशयः। तत्र दोषत्रयरहितधर्मस्यालाभात् नास्ति लक्षणमिति प्राप्ते।

ब्रूमः। ऋगक्षरेभ्योऽधिकत्वे सति ऋग्विलक्षणवर्णत्वमस्ति स्तोभलक्षणं, तस्य दोषत्रयाभावादिति॥

(टि) प्रसङ्गात् स्तोभलक्षणमुच्यते किं स्तोभस्येत्यादिना।

**॥ नीवारादिषु प्रोक्षणावघातादिधर्मानुष्ठानाधिकरणम् ॥**

**सू. धर्मस्यार्थकृतत्वात् द्रव्यगुणविकारव्यति-**

**क्रमप्रतिषेधे चोदनानुबन्धः समवायात् ॥**

(मू) वाजपेये श्रूयते " बार्हस्पत्यं चरुं नैवारं सप्तशरावं निर्वपतीति, तथा ऊहुषी वा एतर्हि वाग्भवति यर्हि पृष्ठ्यषडहः-हः सन्तिष्ठते न बहु वदेन्नान्यं पृच्छेत् नान्यस्मै प्रब्रूयात् संस्थिते पृष्ठ्ये षडहे मध्वाशयेत् घृतं वेति, तथा राजसूये " नैर्ऋतं चरुंनखावपूतानां परिवृत्त्यै ग्रह इति। तथा चातुर्मास्येषु श्रूयते " परिधौ पशुं नियुञ्जन्तीति, तथा ज्योतिष्टोमे श्रूयते " न गिरा गिरेति ब्रूयात् आत्मानं तदुद्गातोद्गिरेत् एरं कृत्वाद्गेयमिति। यत् यस्य प्राकृतस्य कार्ये वर्तते तस्य तत्स्थानापत्त्या तस्मिन् धर्माणामूह इति कार्यपत्त्या स्थानापत्ति; तया चोहो धर्माणामिति स्थितम्। तत्र संशयः - किं नीवारमधुघृताशननखपरिधीरापदानां न व्रीहिषडहोलूखलयूपगिरापदकार्यापत्त्या तत्स्थानापत्तिः, ततः नीवारदिषु व्रीह्यादिधर्माणां प्रोक्षणादीनामूह उत तेषां तत्कार्यापत्त्या तत्स्थानापत्तिरिति। तत्र प्रमाणाभावान्नीवारादीनां व्रीह्यादिकार्यापत्त्या व्रीह्यादिस्थानापत्तिः ततो न नीवारे व्रीहिधर्माणां प्रोक्षणादीनां मधुघृताशने षडहधर्माणां व्रतनियमानां नखेषु उलूखलमुसलधर्मस्य प्रोक्षणस्य परिधौ यूपधर्माणां इरापदे गिरापदगीतेश्चोहः ततो नीवारादिषु व्रीह्यादिधर्माणां प्रोक्षाणादीनामूह इति प्राप्ते।

ब्रूमः। विकारार्थतद्धितप्रतिपादितनीवारविकारस्य चरोर्देवतासंयोग-सहकृतस्य प्रत्यक्षस्यदेवतासंयुक्तचरुप्रकृतिभूतनीवाराणां देवतासंयुक्त-रपुरोडाशप्रकृतिकव्रीहिकार्यापत्तौ " संस्थिते पृष्ठ्ये सहे इति षडहा भावे विधानस्य च मधुघृताशनयोः षडहकार्यापतौ अवपूतानामित्यत्र तुषविमोचनादन्यस्यावपनस्याभावस्य च नखानामुलूखलमुसलकार्या पत्तौ" पशुं नियुञ्जन्तीति नियोजने परिधिविधेश्च परिधेर्यूपकार्यापत्तौ च



प्रमाणत्वात्तेषां तत्कार्यापत्त्या तत्स्थाना पत्तिः ततस्तेषु तद्धर्माणामूह इति।

अत्रेदमवधेयम्। कार्यापत्तिः पञ्चधा। तत्र प्रत्यक्षानुमाानाभ्यां द्विधा शब्दात्तु त्रेधा चेति। तत्र प्रत्यक्षात् स्वशब्दात् प्रतिषेधानुमितात् स्वशब्दात् संस्थांनुमितात् भावरूपप्रतिषेधानुमितात् स्वशब्दाच्चेति। तदेवं प्रत्यक्षादनुमानात् प्रत्यक्षशब्दात् अनुमितशब्दात् अनुमितानुमितशब्दाच्चेति पञ्चधा कार्यापत्तिरिति स्थितम्। तत्र नीवाराणां व्रीहिकार्यतण्डुलापत्तौ प्रत्यक्षं प्रमाणम्। नखानां तुषकणविमोकसाधनात्मकव्यापाररूपोलूखलमुसलकार्यापत्तौ अनुमानं प्रमाणम्। तथाहि - नखनिर्लुञ्छनफलेन तुषविमोकेन तुषविमोकफलकं निर्लुञ्छनात्मकक्रियारूपं नखकार्यमियनुमीयत इति अनुमानमत्र प्रमाणम्। परिधेर्यूपकार्यापत्तौ च " परिधौ पशुं नियुञ्जीतेति प्रत्यक्षशब्दः प्रमाणम्। इरापदस्य गिरापदि गीतिरूपकार्यापत्तौ च "न गिरा गिरेति ब्रूयादिति प्रतिषेधेनानुमितः शब्दः प्रमाणम्। अनुमानप्रकारश्चेत्थम्-नष्टाश्वदग्धरथन्यायेन अन्योन्यसम्बन्धऽवगते न गिरापदं ब्रूयात् गिरापदकायार्थं त्विरापदं ब्रूयादिति कल्पनमिति, मध्वशनस्य कार्यापत्तौ अनुमितानुमतशब्दः प्रमाणम्। तथाहि सन्तिष्ठत इति संस्थावचनेन षडहः कर्तव्य इत्यनुमीयते संस्थितस्य अकर्तव्यत्वात्। ततश्च " न षडहः कर्तव्यः मध्वाशयेदि" ति वाक्यं स्यात्। ततः पूर्ववत् षडहकार्यार्थं मध्वाशयेदिति

अनुमेयमिति। अथ मध्वाशये कृत्वा..न्तयोदाहृते इति"।

(टि) इदानीं कार्यापत्त्या स्थानापत्तिः प्रतिपाद्यते-तया ह्यूहसिद्धिरिति। तथाहि-प्रकृतौ व्रीह्यादिषु श्रुताः प्रोक्षणावघातायो न तत्स्वरूपप्रयुक्ताः तन्मात्रपर्यवसायिनः किन्तु व्रीहिभिर्यजेतेत्यादिभिः विहितसाधनविशेषद्वारेणापूर्वप्रयुक्ताः। तथाहि-" आग्नेयोऽष्टाकपाल" इति द्रव्यदेवतासम्बन्धानुमितेनाग्निदेवत्यपुरोडाशद्रव्येण यजेतेत्येवंरूपेण वाक्येन पुरोडाशद्रव्यकोऽग्निदेवताको यागो विहितः। तदनुवादेन "व्रीहिभिर्यजेतेति व्रीहयो विहिताः। ते च सामर्थ्यात् पुरोडाशप्रकृतित्वं

प्रतिपद्यन्ते। तदयमर्थः " व्रीहिभिः पुरोडाशं कृत्वा तेन यजेतेति। ततः पुनः श्रूयते " व्रीहीन् प्रोक्षति, व्रीहीनवहन्तीत्यादि। यैर्यजेत तान् व्रीहीन्

प्रोक्षेत् प्रोक्षितांश्चावहन्यादित्यर्थः। एवमन्यैरपि ततश्च सर्वैरुपसंह्रियमाणैरयमर्थः सम्पद्यते " प्रोक्षणेन संस्कृतेनावघातेन वितुषीकृतैर्व्रीहिभिः पुरोडाशं कृत्वा तेन यजेतेति। एवं पेषणावाक्यादयोऽपि योजयितव्याः। एवम्भूतो महावाक्यार्थ एव पारमार्थिक आगमार्थः। व्रीह्याद्यवान्तरवाक्यार्थास्त्वस्यैवोपायभूताः पदार्थस्थानीयाः। एवं चाग्नेयभावनायाः शेषभूत इत्थम्भावस्तद्विकारेषु नीयते। तत्र नैवारे चरौ तावद्बार्हस्पत्यं चरुमिति सामानाधिकरण्याद्यथासामर्थ्यं च शब्दार्थकल्पनात् बार्हस्पत्यमिति देवतातद्धितान्तः। तत्सामानाधिकरण्याच्च चरोर्देवतासम्बन्धावगमात् चरुहविष्को यागोऽत्र विधीयत इत्यवसीयते। ततश्च तस्येतिकर्तव्यताया अनुपदेशादाकाङ्क्षितत्वात् क्वचिन्निर्दिष्टेतिकर्तव्यताकोऽयं याग इति निश्चीयते। ततः क्वास्येतिकर्तव्यता निर्दिष्टेत्यालोचनायां औषधद्रव्यकत्वादेकदेवत्यत्वात्तद्धितेन देवतानिर्देशाच्च तादृश आग्ने-

यस्येतिकर्तव्यता निर्दिष्टेत्यवधार्यते। ततश्चाग्नेयविकार-त्वादाग्नेयविध्यन्तोऽतिदेशेनात्र नीयते। तत्रापि " चरुं नैवारमिति सामानाधिकरण्यात् यथासामर्थ्यं च शब्दार्थकल्पनान्नैवारमिति विकारार्थे तद्धित इति निश्चीयते। चरुश्च देवतातद्धितान्तसामानाधिकरण्येन देवतासंयोगाद्यागद्रव्यं हविस्तस्य यागनिवृत्तिकार्यं तथैव पुरोडाशस्यापीति पुरोडाशकार्यापन्नत्वाच्चरोः पुरोडाशस्थाने निवेशात्। विकारार्थतद्धितस्तु सर्वत्र स्वप्रकृत्यर्थप्र-कृतिकविकारवाचक इत्यत्र नीवाराणां चरुहविःप्रकृतित्वात् व्रीहिकार्यतण्डुलनिर्वृत्तिसामर्थ्यस्य प्रत्यक्षसिद्धत्वाच्च व्रीहिकार्यापन्न-

त्वाद्व्रीहिस्थाने निवेशाच्च देवतायाः श्रुतत्वाच्च पुरोडाशव्रीह्यग्निदेवतानां निवृत्तौ इतरस्य समस्तेतिकर्तव्यताजातस्य यथातिदेशमेवावस्थानात् बार्हस्पत्यं चरुंनैवारं निर्वपेदाग्नेयवदित्यस्य श्रुतानुमितैकदेशनिष्पन्नस्य



यूपधार्मः परिधौ कर्तव्या इत्युक्तम्। तत्र संशयः-किं यूपधर्माः परिधौ न कर्तव्या उत कर्तव्या इति। तत्र परिधेरग्निपरिधानोर्थेनोत्पन्नस्य पशुनियोजनार्थत्वाभावात् पशुनियोजनाख्यपरिधिप्रयुक्तत्वात् परिधौ यूपधर्माः कर्तव्या इति प्राप्ते-

ब्रूमः- " परिधौ पशुं नियञ्जीतेति पशुनियोजनसाधनत्वश्रवणात् पशुनियोजनसाधनभूतयूपधर्माः पशुनियोजनसाधनभूते परिधौ कर्तव्याः। तत्राञ्जनपरिव्याणादयः कर्तव्याः परिधावसम्भवतां तक्षणादीनां लोप इति विवेकः। कृतेषु यूपसंस्कारेषु परिधेर्यूपत्वात् " यूपायाज्यमानयेति प्रैषे परिधय इति ऊहो न कर्तव्य इति बोध्यम्॥

(टि) इदानीं परिधावाक्षेपः क्रियते। अग्निपरिधानार्थेनोत्पन्नस्यापि परिधेर्नियोजने विनियोगान्नियोजनार्थत्वमस्त्येव। पुरोडाशकपालस्येव तुषोपवापे शेषत्वं यद्यपि नास्ति तथापि परिधेर्नियोजनसाधनत्वात् साधननिवेशिनो धर्मान् लभेतैव। नहि तादर्थ्यप्रयुक्ता धर्माः। किन्तु साधनत्वप्रयुक्ताः। अस्ति च परिधेरपि साधनत्वामित्याशयेनाह-परिधौ पशुमित्यादिना॥

**॥ शृतादौ प्रणीताधर्मानुष्ठानाधिकरणम्॥**

**सू. परार्थेन त्वर्थसामान्यं संस्कारस्य तदर्थत्वात्॥**

(मू) अभ्युदयेष्टिः श्रूयते-" विवा एतम् (तं) प्रजया पशुभिरर्धयति वर्धयत्यस्य भ्रातृव्यं यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमाः अभ्युदेति त्रेधा तण्डुलान् विभजेत् ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्यात् ये स्थविष्ठाः तानिन्द्राय प्रदात्रे दधनि चरुं येऽणिष्ठाः तान् विष्णवे शिपिविष्टाय शृते चरुमिति। तत्र शृते चरुं दधनिचरुमित्यत्र संशयः-किं दधिशृतयोः प्रणीताधर्माःउत्पवनादयः कर्तव्या नेति।

तत्र यूपकार्ये नियोजने परिधेरिव प्रणीताकार्ये श्रपणे दधिपयसोर्विधानाभावात् नोत्पवनादयः कर्तव्या इति प्राप्ते।

ब्रूमः। विधानाभावेऽप्यार्थिकस्य श्रपणसाधनत्वस्य सत्वात् श्रपणसाधनभूतप्रणीताधर्माः उत्पवनादयः कर्तव्या इति। दधिशृतयोः प्रणीतार्थे विनियोगविध्यभावात् न तद्धर्माः कर्तव्या इति शङ्कानिरासार्थमिदमधिकरणम्॥

(टि) विधानाभावादिति। विनियोगाभावादित्यर्थः॥

॥ बृहद्रथन्तरयोर्धर्मव्यवस्थाधिकरणम्॥

सू. एकार्थत्वादविभागः स्यात्॥

(मू) ज्योतिष्टोमे समामनन्ति-"बृहत् पृष्ठं भवति रथन्तरं पृष्ठं भवतीति। तत्र धर्माः श्रूयन्ते-"रथन्तरे प्रस्तूयमाने (समुद्रं मनसा ध्यायेदित्येवमादयः) संमीलयेत् बृहति प्रस्तूयमाने समुद्रं मनसा ध्यायेदित्येवमादयः। तत्र संशयः किमुभयेऽपि रथन्तरे बृहति श्रुताः समुद्रध्यानादयो बृहतीति यथाश्रुतिव्यवस्थया धर्माः कर्तव्या इति। तत्र उभयोः पृष्ठसिद्धिलक्षणैक कार्यत्वादुभयेऽप्युभयोः कर्तव्या इति प्राप्ते।

ब्रूमः। बृहति रथन्तर इति विशिष्य बृहद्रथन्तरे निर्दिश्य धर्मविधानात् यथाश्रुतिव्यवस्थयैव धर्माः कर्तव्याः न धर्माणां सङ्कर इति।

अत्रेदमवधेयम्-पृष्ठं नाम स्तोत्रं भिन्नमेव च रथन्तरसाध्यं बृहत्साध्यं च स्तोत्रं।

(टि) पृष्ठसिद्धीति। स्तुतिविशेषनिर्वृत्तिरित्यर्थः। उभयेऽपीति। यथा व्रीहिधर्मा एककार्यत्वाद्यवेषु क्रियन्ते तथेत्याशयः। प्रोक्षणादिधर्मविधिषु सर्वत्र व्रीहयो गृह्यन्ते। "यवैर्यजेतेति यवा अपि विधीयन्ते। तस्मान्नूनं व्रीहिग्रहणं कारकविशेषोपलक्षणार्थमिति निश्चयात् यवेष्वपि प्रोक्षणादयः क्रियन्ते तदिहापि यदि रथन्तरग्रहणं साधनलक्षणार्थं स्यात्ततः सर्वधर्मविधिषु रथन्तरमेव गृह्येत यतस्तु क्वचिद्रथन्तरं क्वचिच्च बृहद् गृह्यते ततो नूनमिह रथन्तरादिस्वरूपमपि विवक्षितम् न व्रीहिग्रहणवदुपलक्षणार्थमिति गम्यते। तस्माद्व्यवस्थेत्यभिप्रेत्याह-बृहतीत्यादिना। किञ्च नानयोरेककार्यत्वमपीत्याह-अत्रेदमित्यादिना। नहि



"पृष्ठैः स्तुवत" इति विहितं स्तोत्रमनूद्य तत्साधनत्वेन रथन्तरं "पृष्ठं भवति बृहत् पृष्ठं भवति इति वाक्यद्वयमेव रथन्तरविशिष्टं बृहद्विशिष्टं च पृष्ठं विधत्ते। यदि "पृष्ठैः स्तुवत इत्युत्पत्तिवाक्यं स्यात्तदा उत्पत्तिगतया सङ्ख्यया प्राजापत्यवद्बहूनि पृष्ठानि स्युः। तत्र सप्तमे यत् सूत्रभाष्याकाराभ्यां ज्योतिष्टोमे पृष्ठबहुत्वं नास्तीत्युक्तं तद्विरुध्यते। तस्मादुक्तवाक्यद्वयमेवोत्पत्तिविधायकमिति न कार्यैकत्वमित्यभिप्रायः। तर्हि कथं विकल्प इत्यत्राह-वचनादिति।

॥ कण्वरथन्तरे बृहद्रथन्तरधर्मसमुच्चयाधिकरणम्॥

सू. अप्राकृते तद्विकारात् विरोधादूवतिष्ठेरन्॥

(मू) "वैश्यः स्तोमेन यजेतेति विहिते स्तोमे श्रूयते-"कण्वरथन्तरं पृष्ठं भवतीति। इदं कण्वरथन्तरं बृहद्रथन्तरयोः स्थानापन्नं रथन्तरकार्यप्रयुक्तात् मीलनादिधर्मात् बृहत्कार्यप्रयुक्तात् समुद्रध्यानादिधर्मांश्च गृह्णातीति। तत्र संशयः किं विकल्पेन गृह्णाति किं वा समुच्चयेनेति। तत्र प्रकृतौ विकल्पात् इहापि विकल्पेन गृह्णातीति प्राप्ते-

ब्रूमः। द्वयोः कार्ययोर्विधानात् द्वयोर्धर्मान् समुच्चयेन गह्णातीति विरुद्धांस्तु विकल्पेनेति। विकल्पेनानुष्ठीयमानयोः साधनत्वेन विधानात् विकल्पेनैव धर्मान् गृह्णातीति पक्षान्तरमिति॥

(टि) भाष्यकारमतं दर्शयति-किमित्यादिना। आचार्यमतं दर्शयति-विकल्पेनानुष्ठीयमानयोरिति। प्रकृतौ हि द्वे स्तुती वचनाद्विकल्पेनानुष्ठीयेते विकृतावपि तथैव प्राप्तयोर्विकल्पेनानुष्ठीयमानयोस्साधनत्वेन विधीयमानं कण्वरथन्तरं अन्यतरधर्मानेव गृह्णातीति सुव्यक्तमेवेत्याचार्याः।

॥ द्विसामके बृहद्रथन्तरयोर्व्यवस्थाधिकरणम्॥

सू. उभयसाम्नि चैवमेकार्थापत्तेः॥

(मू) इदं श्रूयते-"संसव उभे कुर्यात् गोसव उभे कुर्यादिति। संसवो गोसवश्चैकाहः क्रतुः। तत्र चोदकेन बृहद्रथन्तरथोः विकल्पे प्राप्ते समुच्चयोऽत्र विधीयते। संसवे गोसवे च उभे बृहद्रथन्तरे कुर्यादिति पृष्ठे।

तत्र संशयः किमुभयोः रथन्तरधर्माः बृहद्धर्माश्च उभये कर्तव्या उत रथन्तरे रथन्तरधर्माः बृहति बृहद्धर्मा एवेति व्यवस्थया कर्तव्या इति।

तत्रोभयोरूभयोः कर्तव्या इति प्राप्ते, चोदकप्राप्तयोः पृष्ठयोः स्वधर्मप्रयुक्तयोरिह समुचयमात्रे विधानात् व्यवस्थयैव धर्माः कर्तव्या इति।

(टि) उभयोरिति। कण्वरथन्तरवदुभयसाधनत्वेन विधानमिति भावः। समुच्चयमात्रविधानादिति। तथा च लाघवम्। अत्राकृतकार्यता च साम्नार्न कल्पिता भविष्यतीति भावः॥

## ॥ सौर्यादिषु पार्वणहोमाद्यननुष्ठानाधिकरणम्॥

### सू. पार्वणहोमयोस्त्वप्रवृत्तिः समुदायार्थसंयोगात्तदभीज्या हि॥

(मू) दर्शपूर्णमासयोः श्रूयते- "सुवेण पार्वणौ जुहोती"ति। तद्धि तश्रुत्या पर्वदेवत्यौ होमौ। तत्र संशयः-किं पर्वशब्दः कालवचनान्न् कालोऽत्र देवता, ततश्च तस्यासंस्कार्यत्वादारादुपकारकौ होमौ। ततश्च विकृतिष्वतिदिश्येते, अथवाग्नेयादिसमुदायवचनं ततः समुदायदेवत्यौ तत्संस्कारार्थौ होमौ ततो विकृतिसमुदायाभावात् नातिदिश्येते इति।

तत्र पर्वशब्दस्य काले मुख्यत्वात् कालवचनं ततः तस्यासंस्कार्यत्वात् आरादुपकारकौ होमौ ततश्च अतिदिश्येते इति प्राप्ते।

ब्रूमः। पर्वशब्दस्य कर्मण्यपि मुख्यत्वात् प्रकृताग्नेयादिकर्म समुदायवचनः। ततस्समुदायदेवत्यौ होमौ। ततश्च विकृतिषु समुदायाभावान्नातिदिश्येते इति॥

वृणातेर्दानकर्मणोऽधिकरणव्युत्पत्त्या काले मुख्यत्वं, भावव्युत्पत्त्या तु कर्मणि मुख्यत्वमिति विवेकः॥

(टि) अत्रातिदिश्येते न वेत्यधिकरणशरीरम्। उभयत्रापि मुख्यत्वे किं विनिगमकम्? अत्राह-प्रकृतेति। प्रकरणमेव विनिगमकमिति भावः। संस्कारार्थत्वे सामयिकत्वमपि लभ्यत इति अपरमनुकूलमिति द्रष्टव्यम्।



तेषां च कर्मणां पशुशब्देन तन्त्रेणाभिहितानां तद्धितेन देवतात्वाभिधानादग्नीषोमयोरिव व्यासक्तं देवतार्थं नैकैकश इत्याशयेनाह-समुदायदेवत्याविति। समुदायाभावादिति। समुदायविकारत्वाच्चेति द्रष्टव्यम्। सौर्यादयो हि न समुदायविकाराः किन्तु समुदायिविकारा इति॥

## ॥ दर्शपूर्णमासयोः होमव्दयस्य व्यवस्थाधिकरणम्॥

### सू. उभयोरविशेषात्॥

(मू) किमेतौ होमावुभावप्युभयोः पौर्णमास्यमावास्ययोः कर्तव्यावुत पौर्णमास्यां पौर्णमासीयागन्तुकदेवत्य अमावास्यायाममावास्या यागत्रिकदेवत्य इति विभज्य कर्तव्याविति।

तत्र प्रकरणाविशेषादुभयोरूभौ कर्तव्याविति प्राप्ते।

ब्रूमः। उभयकार्ययोः यागत्रिकयोः व्यस्थितत्वाद्विभज्यैव कर्तव्याविति। इदं नाधिकरणान्तरमिति पक्षान्तरम्॥

(टि) विभज्यैवेति। सूक्तवाकन्यायेनेति भावः। इदं नाधिकरणान्तरमिति। सूक्तवाकन्यायेन गतार्थत्वात् पूर्वस्यैव प्रयोजनं कथ्यत इति भावः। ऊहसिद्धयर्थमवान्तरकार्यनिरूपणं प्रस्तुतं, तत्प्रसङ्गात् पार्वणयोरप्यवयवान्तरकार्यं निरूपितमिति सङ्गतिः।

## ॥ समिदादीनां यागनामधेयताधिकरणम्॥

### सू. ॥ प्रयाजेऽपीति चेत्॥

(मू) दर्शपूर्णमासयोः प्रयाजा आम्नाताः-"सामिधो यजति, तनूनपातं, इडो यजति, बर्हिर्यजति, स्वाहाकारं यजति" इति। तत्र संशयः-किं कर्मसम्बन्धिनः समिदादीनुद्दिश्य देवतात्वेनोद्दिश्य तत्संस्कारार्थतया यागविधानं उत संस्कारर्थतया विधानासम्भवात् आरादुपकारकतया यागविधिरिति।

तत्र दृष्टार्थलाभात् संस्कारतया यागविधानमिति प्राप्ते।

ब्रूमः। देवतायाः त्यागरूपयागसंस्कार्यात्मककर्मत्वाभावात् देवतासंस्कारार्थतया यागविधानासम्भवादारादुपकारकतया यागविधिरिति। तस्मादारादुपकारकाः प्रयाजा इति स्थितम्॥

**॥ इति नवमाध्यायस्य द्वितीयः पादः॥**

(टि) पूर्वापवादेनेदमारभ्यते-दृष्टार्थत्वलाभादिति । किञ्चैवं सामवायिकत्वमपि लभ्यत इति भावः। संस्कारतयेति। "विष्णुं यजती"त्यादौ द्वितीयान्तेन देवताभिधानदर्शनात् द्वितीयया देवताविधिरिति भावः। उद्देशपूर्वकस्त्यागो हि यजेरर्थः। तत्र त्याग एव विशेष्यत्वाच्छब्दार्थ इत्याशयेनाह-त्यागरूपयागेति। "विष्णुं यजती"त्यादौ तु विशेषणभूतोद्देशगतं कर्मत्वं त्यागेऽप्युपचर्यत इति युक्तमनुवादत्वात्। नच विधावुपचारो युक्त इति भावः। आरादुपकारकतयेति। यागास्त्विह केवला विधीयन्ते। तेषां च श्रुत्यादिभिः कार्यविशेषानवगमात् प्रकरणेनारादुपकारकत्वं, समिदादिशब्दास्तु मन्त्रवर्णप्राप्तां देवतां निमित्तीकृत्य नामधेयानि, ततश्च "पाकं पचतीति"वत् "समिधो यजती"त्यादिषु द्वितीया युक्ता, देवता एव नानुवदन्ति। नचानुवाद उपचारो दोष इति भावः॥

**॥ इति केरलीये षोडशाध्यायीटिप्पणे॥**

**॥ नवमाध्यायस्य द्वितीयः पादः॥**

**॥श्रीः॥**

**॥अथ नवमाध्यायस्य तृतीयः पादः॥**

**॥मन्त्रगतव्रीह्यादिशब्दानामूहाधिकरणम्॥**

**सू. प्रकृतौ यतोत्पत्तिवचनमर्थानां तथोत्तरस्यां ततौ तत्प्रकृतित्वादर्थे चाकार्यत्वात्॥**



(मू) मन्त्रविषय ऊहः षडङ्गः- मन्त्राणां प्रकाशनार्थत्वं मुख्यार्थाभिधायित्वं स्वार्थापरार्थत्वं धर्माणामपूर्वप्रयुक्तत्वं प्रकृतस्थानापन्नान्यदेवताकविकृतित्वं चेति। तेषामेकस्याङ्गस्य वैकल्येनोहः। स च षडङ्ग ऊहोऽष्टविधः-प्रकृतिमात्रोहः लिङ्गमात्रोहः वचनमात्रोहः प्रकृतिलिङ्गोभयोहः लिङ्गवचनोभयोहः प्रकृतिवचनोहः प्रकृतिलिङ्गवचनोहः सकलपदाभ्यासश्चेति।

तत्र प्रकृतिमात्रोहो यथा- अग्नये जुष्टमित्यत्र सूर्याय जुष्टमिति। लिङ्गमात्रोहो यथा "एकहायन्यां रूद्रासी"ति मन्त्रः साण्डे "रूद्रोऽसीयूह्यते। वचनमात्रोहो यथा "छागस्य वपायामि"त्यत्र प्राजापत्येषु "छागानामित्यूहः। प्रकृतिलिङ्गोभयोहो यथा "अदित्यै जुष्टमिति। लिङ्ग वचनोभयोहो यथा- "प्रास्मा अग्निं भरतेत्यस्य मल्हादिषु प्राभ्यो ऽग्निमित्यूहः। प्रकृतिवचनोभयोहो यथा-"विश्वेभ्यो देवेभ्यो जुष्टमिति। प्रकृतिलिङ्गवचनत्रितयोहो यथा-"आपो देवीरिति प्रोक्षण्यभिमन्त्रणमन्त्रे आप इति पदस्य "घृतं प्रोक्षणमिति विहिते घृते घृतदेवेत्यूहः। सकलपदाध्यासात्मकोहो यथा-पशुगणे एकधैकदेत्यभ्यास इति।

चोदकोऽपि द्विविधः-शब्दचोदकोऽर्थचोदकश्चेति। अत्रार्थचोदक इति कार्यचोदक उच्यते। तत्र यथा प्रयाजादिवाक्यानां शास्त्राणां शास्त्रं विधातुं सौर्यादिष्वतिदेशः वाक्यत्वसामान्यात् तथा मन्त्राणामपि स्वार्थं प्रकाशयन् स्वरूपेणातिदेश इत्यूहसिद्धिः। प्रयोजनभूतार्थचोदकत्वेन अर्थचोदकस्य बलवत्वं बलवता च तेन प्रथममर्थेऽतिदिष्टे ततः तद्विधानार्थत्वेन तत्प्रकाशनार्थत्वेन वा शब्दापेक्षायां पश्चात् प्रवृत्तेन शब्दचोदकेन विधिसाधनत्वेन प्रकाशनसाधनत्वेन विधिवाक्यानां मन्त्रवाक्यानां चातिदेशः अदृष्टकल्पनाभयाच्च न मन्त्राणां अक्षरातिदेश इत्यूहसिद्धिरिति विवेक इति।

अत्र वैकृतान्युदाहरणं- "सौर्यं चरूं निर्वपेत् ब्रह्मवर्चसकामः। ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः, वैश्वदेवीं साङ्गहणीं निर्वपेत् ग्रामकामः" इति, प्रकृतौ चाग्नयेजुष्टं निर्वपामीति देवतालिङ्ग

कोनिर्वापमन्त्रः, तथा "इन्द्राय मरूत्वते नैवारं चरूं निर्वपेत्" इति। अग्नि तु प्रकृतौ द्रव्यलिङ्गको मन्त्रः "स्योनं ते सदनं करोमि घृतस्य धारया सुशेवं कल्पयामि तस्मिन्सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमान" इति। तौ चोदकप्राप्तौ। तत्र संशयः-किं प्रकृतौ अग्निपदव्रीहिपदयोः स्वरूपविवक्षया पठितत्वाभ्युपगमात् स्वरूपेणैवातिदिष्टत्वात् सौर्यादिषु नीवारादिषु गुणवृत्त्या सूर्यादीनां नीवारादीनां च प्रकाशनीयत्वात् नोहः कर्तव्यः उत प्रकृतौ देवतावाचिपदविवक्षया पठितत्वाभ्युपगमात् देवतावाचिवदरूपेणैवातिदिष्टत्वात् सौर्यादिषु नीवारादिषु चाग्निव्रीहिपदयोः सूर्यादिनीवारादिवाचित्वाभावात् सूर्यादिनीवारादिपदोहः कर्तव्य इति। तत्र श्रुतस्वरूपानपेक्षायां प्रमाणाभावात् स्वरूपविवक्षया पठितत्वाभ्युपगमात् स्वरूपेणैवातिदिष्टत्वात् गुणवृत्त्या प्रकाशनीयत्वान्नोहः कर्तव्य इति प्राप्ते।

ब्रूमः। तथा सति अदृष्टकल्पनाप्रसङ्गात् देवतादिवाचिपदत्वविवक्षया पठितत्वाभ्युपगमात् तद्रूपेणैवातिदिष्टत्वात् अग्निव्रीहिपदयोः वैकृतदेवताद्रव्यवाचित्वाभावात् ऊहः कर्तव्य इति। अग्नये जुष्टं नीवाराणां मेधेत्यृचोहप्रकार इति।

अत्रेदमवधेयम्। विधिसमवेतद्रव्यदेवतापदनियमो दृष्टार्थ इति॥

॥ श्रीः ॥

॥ अध नवमस्य तृतीयः पादः ॥

(टि) एवं सामसंस्कारविषय ऊहश्चिन्तितः। मन्त्रविषय ऊह इदानीं चिन्त्यते। तेषामेकस्येति।समवेतार्थाभिधायित्वाभावान्न सवित्रादिपदानामूहः स्वार्थापरार्थत्वाभावात् न यज्ञपतिशब्दस्योह इत्यादि द्रष्टव्यम्। भाष्ये तु स्वार्थापरार्थत्वाभावात् न समवेतार्थाभिधायित्वं अतो नोह इत्युक्तम्। अष्टविध इति। तेषु प्रकृत्यूहः प्रायेण प्रथमपादे चिन्तितः, अल्पशस्त्विदानीं चिन्त्यते। यथास्मिन्नधिकरणे उत्तराधिकरणे नवमाधिकरणे च। बाहुल्येन त्वत्र वचनोहश्चिन्त्यते। तत्र प्रथमपादे देवताप्रकाशनार्था मन्त्रा न त्वग्न्यादिस्वरूपप्रकाशनार्था अतो ऽपूर्वप्रयुक्ता



इत्यूहः कर्तव्य इत्युक्तम्। इह तु देवताप्रकाशनार्थत्वेऽपि मन्त्राणां स्वरूपेणैव चोदकेन प्राप्तिरूत देवतावाचित्वरूपेणेति चिन्त्यते। यदि स्वरूपेण तदा ऐन्द्र्या गार्हपत्योपस्थानवत् अग्निपदेन गुणवृत्त्या सूर्यः प्रकाशयितव्य इत्यूहासिद्धिः। अथ देवतावाचित्वरूपेण तदा तदाग्निपदस्य सूर्यदेवताप्रकाशनसामर्थ्यविरहादूहसिद्धिरिति पूर्वमग्न्यादिस्वरूपं न विवक्षितमित्युक्तम्। इदानीं तु अग्नादिपदस्वरूपं न विवक्षितमित्युच्यते। अतो न तेनास्य गतार्थतेति। तदेतदभिप्रेत्य शब्दचोदकाश्रयेणात्र पूर्वपक्षः अर्थचोदकाश्रयेण सिद्धान्त इति दर्शयितुमाह-चोदको ऽपीत्यारभ्य विवेक इत्यने [न्ते] न। देवतादीति। हविः प्रकृतिद्रव्यादिरादिशब्दार्थः। ऊहः कर्तव्य इति। ऐन्द्री तु स्वरूपेणैव गार्हपत्ये विनियुज्यत इति वैषम्यमिति बाध्यम्॥

## ॥ पौण्डरीकेषु बर्हिःषु स्तरणमन्त्रस्योहाधिकरणम् ॥

## सू. जातिनैमित्तिकं यथास्थानम् ॥

(मू) इदमाम्नायते- "मौद्गं चरूं निर्वपेत् श्रियै श्रीकाम" इति। तत्रेदं विधीयते-"पौण्डरीकाणि बर्हींषि च भवन्तीति। अस्ति च प्रकृतौ बर्हिर्मन्त्राः "स्तृणीत बर्हिः परिधत वेदिं जामि माहिं सीरमुया शयानः दर्भैः स्तृणीत हरितैः सुपर्णैः निष्का ह्येते यजमानस्य ब्रध्न" इति। स इह चोदकेन प्राप्तः। तत्र दर्भैरिति जातिशब्दः हरितैरिति नैमित्तिको गुणशब्दः। तत्र संशयः-किं दर्भपदस्थाने पुण्डरीकमूहितव्यं हरितपदस्थाने रक्तपदं नोहितव्यं उत पुण्डरीकपदं हरितपदं च यथास्थानमूहितव्यं इति।

तत्र दर्भशब्देनैव दृष्टार्थे प्रकाशने सिद्धे हरिताभिधानस्य अदृष्टार्थत्वान्नोहित्व्यमिति प्राप्ते।

ब्रूमः। अर्थाभिधानपरमन्त्रमत हरितपदेनापि स्तरणद्रव्यसमवेतगुणद्वारा स्तरणद्रव्याभिधानात् स्तरणद्रव्यपुण्डरीक समवेतरक्तिमद्वारा पुण्डरीकाभिधानं रक्तपदं चोहित्व्यमिति॥

(टि) अत्र पुण्डरीकपदमूहितव्यमिति पूर्वेणैव न्यायेन सिद्धम्। अत एवात्र

पूर्वपक्षसिद्धान्तकोटयोरैकरूप्येणैव पुण्डरीकपदमुपन्यस्तमिति बोध्यम् ॥

**॥अग्नीषोमीयपशौ लौकिकयूपस्पर्शप्रायश्चित्ताधिकरणम् ॥**

**सू. लौकिके दोषसंयोगादपवृक्ते हि चोद्यते निमित्तेन प्रकृतौ स्यादभागित्वात् ॥**

(मू) ज्योतिष्टोमे अग्नीषोमीये पशावाम्नायते "यद्येकं यूपमुपस्पृशेत् एष ते वायो इति ब्रूयाल् यदि द्वौ एतौ ते वायू इति यदि बहव एतेते वायव" इति। तत्र संशय:-किं वैदिके लौकिके च यूपोपस्पर्शने इदं प्रायश्चित्तमित्यनियम: उत वैदिके अथ लौकिक इति। तत्र विशेषाश्त्वणादनियम इति चेत्। उच्यते, प्रकरणाद्वैदिक इतीति प्राप्ते।

ब्रूम:। "यूपो वै यज्ञस्य दुरिष्टमामुञ्चते यद्यूपं उपस्पृशेत् दुरिष्टं यज्ञस्यामुञ्चतेतस्माद्यूपो नोपस्पृश्य इत्यनेन विहितस्य रागत: प्राप्तस्य लौकिकस्य यूपोपस्पर्शनस्य प्रतिषेधात् प्रतिषिद्धे लौकिके स्पर्शन एव प्रायश्चित्तमिति ॥

(टि) प्रासङ्गिकमिदमधिकरणम्। लौकिकस्येति। वैदिकस्य विहितत्वेन प्रातिषेधानर्हत्वात् प्रातिषिद्धानुष्ठाने च प्रत्यवायोत्पत्ते: प्रतीकारपेक्षायां प्रायश्चित्तविधिरपेक्षितार्थो भवतीत्यभिप्राय: ॥

**॥ द्विपशुयागे पाशमन्त्रयोरेकवचनान्तबहुव चनान्तयो: द्विवचनान्तेनोहाधिकरणम् ॥**

**सू. अन्यायस्त्वविकारेण अद्दष्टप्रतिधातित्वाद विशेषाच्च तेनास्य ॥**

(मू) ज्योतिष्टोमे अग्नीषोमीये पशौ पाशैकत्वाभिधायी मन्त्र: "अदिति: पाशं प्रमुमोक्त्वेतमिति, तथाबहुत्वाभिधायी "अदिति: पाशान् दिषु चाग्निव्रीहिपदयो: सूर्यादिनीवारदिवाचित्वाभावात् सूर्यादिनीवारादिपदोह: कर्तव्य इति। तत्र श्रुतस्वरूपानपेक्षायां प्रमाणाभावात् स्वरूपविवक्षया पठितत्वाभ्युपगमात्स्वरूपेणैवातिदिष्टत्वात्गुणवृत्त्या प्रकाशनीयत्वान्नोह: कर्तव्य इति प्राप्ते।



ब्रूम:। तथा सति अदृष्टकल्पनाप्रसङ्गात् देवतादिवाचिपदत्वविवक्षया पठितत्वाभ्युपगमात् तद्रूपेणैवातिविष्टत्वात् अग्निव्रीहिपदयो: वैकृतदेवताद्रव्यवाचित्वाभावात् ऊह: कर्तव्य इति। अग्नये जुष्टं नीवारणां मेधेत्यृचोहप्रकार इति।

अत्रेदमवधेयम्। विधिसमवेतद्रव्यदेवतापदनियमो दृष्टार्थ इति ॥ प्रमुमोक्तवेतानिति। अस्ति तु द्विपशुर्विकृति: "मैत्रं श्वेतमालभेत वारूणं कृष्णमपां चोषधीनां च सन्धावन्नकाम" इति। तत्र द्विपशुष्के चोदकप्राप्तौ मन्त्रौ। तत्र एकवचनान्तस्य समवेताभिधायित्वेन वचनोह: सिद्ध एव। तत्र संशय:-किं बहुवचनान्तस्य वचनानूहेन प्रवृत्तिरूतार्षसम्भवेन आर्षप्रयोगायोगादेकवचनान्तस्य ऊहेन प्रवर्तमानस्य निवृत्ति: उत विवक्षितसङ्ख्या पाशमात्राभिधानात् विकल्पाभिधायिनो बहुवचनान्तस्य प्रवृत्तिरेकवचनान्तस्य चोहेन प्रवृत्ति: अथवा बहुवचनान्तस्यानूहेन एकवचनान्तस्य चोहेन प्रवृत्ति: किं वा उभयोर्द्विवचनोहितयो: प्रवृत्तिरिति।

तत्र बहुवचनस्य यूपाग्नौ समवेतसङ्ख्यभिधायिनोनिर्देशमात्रार्थत्वात् बहुवचनान्तस्य वचनानूहेन प्रवृत्ति:। अत उक्तरीत्या एकवचनान्तस्य निवृत्तिरिति चेत्। उच्यते। समग्राभिधानसम्भवे विकलाभिधानस्वान्याय्यत्वात् अविवक्षितसङ्ख्य पाशमात्राभिधानात् विकल्पाधायिनो बहुवचनान्तस्य निवृत्ति: सङ्ख्याविशिष्टपाशस्वरूपसमग्राभिधायिनो द्विवचनोहितस्य एकवचनान्तस्य प्रवृत्तिरिति।

अत्र वदाम:- द्वयोरपि चोदकप्राप्तत्वाविशेषात् बहुवचनान्तस्यानूहेन एकवचनान्तस्य चोहेन प्रवृत्तिरित्येवं प्राप्ते-

ब्रूम:। यथा पाशैकत्वे बहुवचनं दृष्टं वेदे तथा पाशद्विते बहुवचनस्यादर्शनात् उभयो: ऊहितद्विवचनान्तयो: प्रवृत्तिरिति।

इदं त्ववधेयम्-प्रकृतौ वेदे बहुवचनस्य प्रयुक्तत्वात् तथैव वक्तव्यं विकृतौ तु अस्मदायत्ते शब्दप्रयोगे असाधुप्रयोगानर्हत्वात्द्विवचनमेव

प्रयोक्तव्यमिति ॥

(टि) इत: प्रभृति वचनविषय ऊह: प्रतिपादयिष्यते। तत्र एक वचनान्तस्य नानूहशङ्केति दर्शयितुमाह तत्रेत्यादिना ॥

**॥ अग्नीषोमीयपशौ पाशैकत्वपाशबहुत्वाभिधायि मन्त्रयो: विकल्पाधिकरणम् ॥**

**(सू) विप्रतिपत्तौ विकल्प: स्यात् समत्वात्गुणे तन्न्यायकल्पने कदेशत्वा... ॥**

(मू) सोमेऽग्नीषोमीये पशौ पाशमन्त्रावेकवचनान्तबहुवचनान्तावाम्नातौ "अदिति: पाशं प्रमुमोक्तवेनमिति "अदिति: पाशान् प्रमुमोक्त्वेतानिति च। तत्रैकवचनान्त: प्रकृतावग्नीषोमीय एव निविशते। बहुवचनान्ते तु संशय:- किं प्रकृतौ निविशते उत बहुपशुकेषु पशुगणेषु उत्कृष्यत इति। तत्रैकस्मिन् बहुवचनान्तस्यासमर्थत्वात् एकत्ववचनसमर्थैकवचन बहुत्ववचनस-मर्थबहुवचनलाभसामर्थ्यरूपवाचिसमर्थैकवचनलिङ्गद्वयेन प्रकरणं बाधित्वोत्कृष्यते बहुवचनान्त इति प्राप्ते।

ब्रूम:। प्रकृत्यर्थस्य पाशस्य विभक्तत्वस्य पाशसमवेतमोचनक्रियाकर्मत्वस्य च प्रकृतौ सत्वात् बहुवचनान्तोऽपि प्रकृतावेवनिविशत इति विकल्पेन मन्त्रप्रयोगइति। बहुवचनं तु निर्देशमात्रार्थमिति वा अवयवबहुत्वाभिप्रायेणेति वा समाधेयमिति बोध्यम् ॥

(मू) अथ पूर्वाक्षेपेणेदमारभ्यते। सङ्ख्यामात्रं त्वसम्भवदपि गुणत्वान्नालं प्रातिपदिकं कर्मविभक्तिं च प्रधानभूतमुत्क्रष्टुं शक्नोतीत्याशयेनाह- बहुवचनं त्विति। "गुणे त्वन्यायकल्पनेति न्यायोऽत्र दर्शित इति ॥

**॥ दर्शपूर्णमासयो: द्विपत्नीकेप्रयोगे "पत्नीं संनह्य" इति मन्त्रानूहाधिकरणम् ॥**

**सू. अपूर्वे त्वविकारो ऽप्रदेशात् प्रतीयेत ॥**

(मू) दर्शपूर्णमासयो:आमनन्ति- "प्रोक्षणीरासादयेध्माबर्हिरूपसादय स्रुवं



च स्रुचश्च सम्मृड्ढि पत्नीं संनह्याज्योनोदेहीति। तत्र "पत्नीं सन्नह्येति मन्त्रे संशय:-किमेकद्विबहुपत्नीके प्रयोगे पत्नीशब्दगतमेकवचनं नोहितव्यं उत द्विपत्नीकबहुपत्नीकप्रयोगयो: द्विवचनबहुवचनाभ्यामूहितव्यमिति। तत्रैकवचनस्य पत्नीसमवेतैकार्थवाचित्वादूहितव्यमिति प्राप्ते।

ब्रूम:। एकपत्नीक द्विपत्नीक बहुपत्नीकप्रयोगाणां समानविधानत्वादविवक्षित स्वार्थनिर्देशमात्रार्थकं अदृष्टायैकत्वाभिधानार्थं वा प्रयुक्तमेकवचनं नोहितव्यमिति ॥

(टि) समानविधानत्वादिति। अयमाशय:- यत्राम्नानेसमवेताभिधानरूपस्य स्वरूपस्य च सम्प्रतिपन्नत्वं तत्रैव समवेताभिधानरूपविवक्षा न स्वरूपविवक्षेति समवेताभिधानार्थमूह:। यत्र तु समवेताभिधानरूपस्य स्वरूपस्य च भेदस्तत्र स्वरूपविवक्षेति नोह:। इहतु यद्येकपत्नी प्रयोगभिप्रायमिदमाम्नानं स्यात्तदैकवचनरूपस्य समवेतसङ्ख्याभिधानरूपस्य च सम्प्रतिपन्नत्वात् समवेतसङ्ख्या-भिधानरूपमिह विवक्षितं न त्वेकवचनरूपमिति कृत्वा द्विबहुपत्नीकप्रयोगे समनेतसङ्ख्याभिधानार्थमूह: स्यात्। सर्वप्रयोगाणं तु समानविधानत्वात् सर्वाभिप्रायेणेदमाम्नायमानं द्वयोर्बहुषु चैकवचनस्य सम्प्रतिपन्नत्वाभावान्न समवेतसङ्ख्याभिधानरूपेण प्रयुक्तमिति शक्यमध्यवसातुमतो नोह इति। द्विपत्नीकबहुपत्नीकप्रयोगायोर्विकृतित्वरूपाङ्गवैकल्यान्नोह इति यावत् एवं पाशमन्त्रेऽपि ॥

**॥ द्विपत्नीकविकृतियागेऽपि "पत्नीं संनह्य" इति मन्त्रस्यानूहाधिकरणम् ॥**

**सू. विकृतौ चापि तद्वचनात् ॥**

(मू) विकृतौ संशय:-किं पत्नीशब्दो द्विपत्नीकबहुपत्नीक प्रयोगयो: द्विचनान्तबहुवचनान्तत्वाभ्यामूहितव्य उत नेति। तत्र विकृतौ मन्त्राम्नानादूहितव्य इति प्राप्ते।

ब्रूम:। एकवचनप्रयोगस्यादृष्टार्थत्वात् नोहितव्य इति। द्वित्वबहुत्वयोरत्र

एकवचनस्य छान्दसत्वान्नासाधुत्वं पाशे च द्वित्वे बहुवचनस्य छान्दसत्वादसाधुत्वमिति बोध्यम्॥

(टि) मन्त्राम्नानादिति। अनेन द्वित्वबहुत्वयोरेकवचनस्यासाधुत्वमपि ध्वनितम्। तत् परिहरति द्वित्वबहुत्वयोरित्यादिना॥

**॥ सवनीयपशूनामग्री षोमीयसमानविधानत्वे**

**" पप्रास्मै अग्निम् " इति मन्त्रे ऽनूहाधिकरणम्॥**

**सू. अध्रिगौ सवनीयेषु तद्वत् समानविधानाश्चेत्॥**

(मू) ज्योतिष्टोमे अग्नीषोमीये पशौ "दैव्याश्शमितारसत्याद्यध्रिगुप्रैषे इदमाम्नायते- "प्रास्मा अग्निं भरत स्तृणीत बर्हिरन्वेनं माता मन्यतां" इत्यादि। तत्राग्नीषोमीयास्सवनीयाश्च समानविधाना इति कृत्वाचिन्तेयम्।

तत्र द्विबहुपशुकेषूक्थ्यषोडश्यादिषु प्रैषेवर्त माने संशयः- किं प्रास्मा इत्यादिशब्दा ऊहितव्या उत नेति।

तत्र एकवचनस्य पशुसमवेतैकत्ववाचित्वादूहितव्या इति प्राप्ते।

ब्रूमः। पशुनां समानविधानत्वात् पत्नीशब्दवन्नोहितव्या इति। मेष्यां तु लिङ्गस्यात्यन्तासम्भवन्निवृत्तिरूक्ता। एक वचनं तु प्रवृत्तिव्यक्तिगतैकत्वाभिप्रायेणापि सम्भवतीति प्रवृत्तिरूक्तेति।

वस्तुतस्तु सवनीयानां विकृतित्वादूहितव्या इति। इदमधिकरणं तृतीयाध्याये समानविधानासमानविधान विचारप्रयोजनपरमिति बोध्यम्॥

(टि) पूर्वाधिकरणेन गतार्थत्वमाशङ्क्याह-इदमधिकरणमित्यादिना।

**॥ नीवाराणां व्रीहिप्रतिनिधित्वे मन्त्रे व्रीहि-**

**शब्दस्यानूहाधिकरणम्॥**

**सू. प्रतिनिधौ चाविकारात्॥**

(मू) व्रिह्यादिप्रतिनिधिषु नीवारादिषु "व्रीहीणां मे ध सुमनस्यमान" इत्यत्र



व्रीहिशब्दः किमूहितव्य उत नेति संशयः।

तत्र व्रीहिशब्दस्य नीवारप्रकाशनसामर्थ्यात् ऊहितव्य इति प्राप्ते-

ब्रूमः। नीवारगतव्रीह्यंशा इह साधनमित्युक्तम्। व्रीह्यंशप्रकाशने च व्रीहिशब्दस्य सामर्थ्यसत्वान्नोहितव्य इति।

अयमत्र विवेकः- विकृतिषु नीवारादीनां साधनत्वेन विधानादूहः प्रतिनिधिषु तदभावादनूह इति।

" व्रीहीणां मेधेत्यस्य प्रैयङ्गवादिषु संशयः- किं व्रीहिविकारेषु मन्त्रस्य प्रवृत्तिः यवविकारेषु निवृत्तिरिति नियम उत उभयेषु प्रवृत्तिरित्यनियम इति।

तत्र प्रकृतौ यवानां मन्त्राभावादनियम इति प्राप्ते-

ब्रूमः। कण्वरथन्तरवत् प्रैयङ्गवादीनां व्रीहियवोभयविकाराणां उभयधर्मग्राहित्वादूहेन मन्त्रस्योभयत्र प्रवृत्तिरिति। प्रकृतौ च यवानां व्रीहिविकारत्वाभावेन ऊहसम्भवात् यवेषु च मन्त्रस्य सामर्थ्यान्निवृत्तिरिति बोध्यम्। न वेदमधिकरणान्तरम्॥

(टि) समानविधानत्वप्रसङ्गात् प्रकृत्यूहश्चिन्त्यते-व्रीह्यादीति।

आचार्यः प्रसङ्गाच्चिन्तितमधिकरणमारचयति-व्रीहीणां मेधेत्यस्य प्रैयङ्गवादिष्वित्यादिना॥

**॥ द्विपशुयागे "सूर्यं चक्षुर्गमयतात्" इति॥**

**मन्त्राणामनूहाधिकरणम्॥**

**सू. संसर्गिषु चार्थस्यास्थितपरिमाणत्वात्॥**

(मू) अध्रिगुप्रैषे समामनन्ति- "सूर्यं चक्षुर्गमयतात् वातं प्राणमन्वसृजतादिति। तत्र संशयः- किं द्विबहुपशुकेषु चक्षुरादिशब्दा द्विवचनबहुवचनान्ताभ्यामूहितव्या न वेति।

तत्र भिन्नपशूपहित चक्षुरादीनामुपाधिभेदनिमित्त भेदसत्वात् ऊहितव्या इति प्राप्ते-

ब्रूमः। चक्षुरादिशब्दानां गोलकाद्यधिष्ठान निर्गतैकीभूततेज आदिवाचकत्वाविवक्षणान्नोहितव्या इति अध्रिगुप्रैषएव अध्रिगुरित्युच्यत इति॥

(टि) उपाधिभेदेति। अयमाशयः-नहि संसर्गिणामप्तेजःप्रभृतीनां स्वतः संख्याव्यवहाराभावादौपाधिकः सङ्ख्याव्यवहारः। तदिह चक्षुश्शब्दस्य तेजोवचनस्यासति स्वतः सङ्ख्याभावत्वे अधिष्ठानापेक्षत्वे च तयोर्द्वित्वेन द्विवचनप्रसङ्गात् पशूपाधिकमेकवचनं अस्येत्यनेन च पशोरूपात्तत्वादुपाधित्वमेव विज्ञायते। अतः पशुभेदे पशुसङ्ख्यावशेनोह इति नोहितव्या इति बहूनामपि पशूनां सन्निहितानि चाक्षुष तेज आदीनि अनेकप्रदीपप्रभादिवदेकी भवन्तीति नोह इति भावः॥

**॥ द्विपशुयागे अध्रिगुप्रैषे "एकधा" इत्यस्य शब्दस्य अभ्यासाधिकरणम्॥**

**सू. एकधेत्येकसंयोगादभ्यासेनाभिधानं स्यात्॥**

(मू) अध्रिगावेव श्रूयते "एकधास्य त्वचमाच्छयतादिति। तत्र एकधाशब्दः पशुगणेषु किमविकारेण प्रयोक्तव्य उताभ्यासितव्य इति।

तत्र पशुगणेषु एकधा कालतो देशतो वा साहित्येन सर्वेषां त्वचमाच्छयतादित्यविकारेण प्रकाशन सम्भवादविकारेण प्रयोक्तव्य इति प्राप्ते।

ब्रूमः। प्रकृतौ नावयवशः त्वचमाच्छयतात् किन्त्वेकधा एकप्रयत्नेनेत्येवं त्वगाच्छेदन प्रकारविशेषोऽनेन प्रकाश्यते तथा प्रकारप्रकाशनस्यैव विकृतिषु विवक्षितत्वादेकधा एकधेत्यभ्यसितव्य इति॥

(टि) इदानीमभ्यासात्मक ऊहश्चिन्त्यते-कालतो देशतो वेति। यथैकधाः गाःपाययतीति तद्वत्। तथा सति आर्षचोदकानुग्रहोऽपि भविष्यतीति भावः। प्रकृतौ येन प्रकारेणाभिधानं कृतं तेनैव प्रकारेण विकृतावप्यभिधानं कर्तव्यम्। कार्यप्रधानत्वादतिदेशस्य। नहि प्रकृतौ यःशब्दः तत्स्वरूपतो ऽतिदिश्यते किं तु कार्यमेवेत्याशयेनाह-प्रकृतावित्यादिना। प्रकृतौ त्वच



एकत्वात् साहित्याभिधानं न सम्भवतीत्याशयेनाह-एकप्रयत्नेनेति॥

**॥ द्विपश्वादिपशुविकृतौ मेधपतिशब्दस्य देवतानुसारेणोहाधिकरणम्॥**

**सू. मेधपतित्वं स्वामिदेवतस्य समवायात् सर्वत्र च प्रयुक्तत्वात्। तस्य चान्यायनिगदत्वात् सर्वत्रैवाविकारः स्यात्॥**

(मू) अध्रिगावादौ श्रूयते-"दैव्याः शमितार आरभध्वमुत मनुष्याः मेध्यादुर आशासाना मेधमतिभ्यां मेधमिति। क्वचित्तु मघपतये मेघमिति। न दैव्या मनुष्याश्च शमितारः पशुघातिन यूयमारभध्वं प्रारम्भः कर्तव्यः। केषामारम्भ इत्यत्राह-मेध्यादुरः मेधो यज्ञः तद्योगान्मेध्यत् दुरः हिंसाहेतून् पदार्थान् उपनयत इहानयत। किं कुर्वन्तः मेधपतिभ्यां मेधस्य पशोः पतिभ्यां मेधपतये वा मेधं पशुं वा आशासाना इत्यर्थः। तत्र मेधपतिशब्देन यजमानो देवता वोच्यते। तथा चैतरेयब्राह्मणं "पशुर्वै मेधो यजमानो मे धपतिरिति। "यस्यै वाव कस्यै च देवतायै पशुरालभ्यते सैव मेधपतिरिति च। एवं स्थिते मेधपतिभ्यां मेधपतय इत्यत्र संशयः-किं द्विवचनैकवचनयोः प्रकृत्यर्थसमवेतसङ्ख्यानभिधायित्वात् विकृतिषु द्विवचनान्तैकवचनान्तावुभावप्यविकारेण प्रयोक्तव्यौ उत द्विवचनप्रकृतिभूतस्य मेधपतिशब्दस्य देवतापरत्वात् द्विवचनस्य प्रकृत्यर्थभूताग्नीषोमदेवता समवेतद्वित्वाभिधायित्वात् एकदेवत्येषु बहुदेवत्येषु च विकृतिषु द्विवचनान्त ऊहितव्यः एकवचन प्रकृतिभूत मेधपतिशब्दस्य च यजमानपरत्वादेकवचनस्य प्रकृत्यर्थभूतयजमान समवेतैकत्वाभिधायित्वादनेकस्वा मिकेषु विकृतिषु एकवचनान्ता ऊहितव्या इत्येवं विषयभेदेन व्यवस्था ऊभावप्यूहितव्यौ आहोस्वित् शाखभेदेन समाम्नातयोरेकमन्त्रत्वेन मेधपतिशब्दस्यैकत्वावश्यम्भावात्, उभयोर्देवतापरत्वे च एकवचनानुपस्थितेः स्वामिपरत्वे तु सपत्नीकाभिप्रायत्वेन द्विवचनोपपत्तेश्चउभयोर्यजमानपरत्वादुभावपि स्वामिपरावूहितव्यौ अथवा एकवचनं देवतात्वस्य। उभयोर्ह्यासक्तस्य एकत्वात् तदभिप्रायम्। द्विचनं तु अधिष्ठानस्य द्वित्वात्

तदाभप्रायामत्युभयाः देवतपरत्वेऽपि द्विवचनैकवचनयोः उपपत्तेर्देवतापरत्वात् द्विचनमधिष्ठानसङ्ख्यावशात् एकवचनं च देवतासङ्ख्यावशात् विकृतिषु ऊहितव्यमित्येवमधिष्ठानदेवताव्यवस्थया उभावप्यूहितव्याविति।

तत्र मेधपतिशब्देन पशुस्वामिभूतानां यजमानाग्नि सोमानां त्रयाणामत्यभिधानादुक्तरीत्या उभावप्यविकारेण प्रयोक्तव्याविति चेत्। उच्यते। सम्भवति समवेताभिधायित्वे असमवेताभिधायिकल्पनाया अन्याय्यत्वात् उक्तरीत्या विषयभेदेन व्यवस्थया उभावप्यूहितव्याविति।

अत्राभिधीयते। शाखाभेदस्य पाठभेदस्य मन्त्रभेदकत्वात् उक्तरीत्या उभावपि स्वामिवशादूहितव्याविति एव प्राप्ते।

ब्रूमः। नच यजमानायासौ पशुराशास्यः तस्यैव सः देवताभ्यां चाशास्यः इत्येवमाशासनग्रहणसामर्थ्यात् उक्तरीत्याधिष्ठानदेवताव्यवस्थयो-भावप्यूहितव्याविति। प्रकृतौ तु विवक्षाभेदात् पर्यायेणोभयोः प्रयोगः न तु द्विवचनान्तस्यैवेति नियम इति समवेताभिधायिशब्द एव न्यायान्निगद इत्युच्यते द्विवचनान्तो द्विवन्निगद एकवचनान्त एकवन्निगदइति चोच्यते।

(टि) एकार्थत्वावश्यम्भावादिति। अयमाशयः-मेधपतिशब्दस्य यजमानपरत्वे मेधपतये यो मेधः तं देवताया आशासाना इति सम्बन्धः। देवतापरत्वे तु मेधपतिभ्यामाशासाना इति। न चैकस्य वाक्यस्य वचनव्यक्तिद्वयं सम्भवति, अत एकार्थत्वमवश्यं कल्प्यमिति। त्रयाणामपीति। द्विवचनमेकवचनं च द्वयमप्यन्यायनिगदमित्यनूह इति भावः। मेधमाशासाना इत्युक्ते किमर्थमित्यपेक्षायां मे धपतिभ्यामाशासाना इत्यपेक्षितार्थपूरणाय सम्बध्यत इत्याशयेनाह-नचेत्यादिना। आशासानग्रहणसामर्थ्यादिति। मेधपतिशब्दस्य यजमानपरत्वे तु प्राप्त एव पशुर्यजमानस्य स्वामिनइति किं तदाशासनेनेति।

॥ बहुदैवत्ये पशावपि एकवचनान्तमेधपतिशब्दस्य



विकल्पाधिकरणम्॥

सू. नियमो बहुदेवते विकारःस्यात्।

(मू)अस्ति बहुदेवत्यः पशुः "एतामविं वशामादित्येभ्यः कामायालभेतेति। कामः कामुकः। तथा" वैश्वदेवं धूम्रललाममालभेतेति। तत्र संशयः-द्विवचनान्तस्याधिष्ठान बहुत्वात् ऊह इति स्थितम्। एकवचनान्ते संशयः-किमयमेकवन्निगदो मेधपतिशब्दः ऊहितव्य उत विकारेण प्रयोक्तव्य इति।

तत्र एकवचनस्य बहुष्वसामर्थ्यात् ऊहितव्य इति प्राप्ते।

ब्रूमः। बहुषुव्यासक्तदेवतारूपैकत्वादविकारेण प्रयोक्तव्य इति। ततश्च ऊहित द्विवचनान्तस्य अनूहितैकवचनान्तस्य च पर्यायेण प्रयोग इति पूर्वाधिकरणसिद्धमेवात्र प्रतिपादितमिति।

तदयं निष्कर्षः- एकदेवत्ये एकवचनान्त एव प्रयोक्तव्यः द्विवचनस्योहसम्भवात्। द्विदेवत्ये तु द्विवचनान्त एकवचनान्तश्च विकल्पेन प्रयोक्तव्यः बहुदेवत्ये तु द्विवचनस्योहसम्भवात् बहुवचनान्त एकवचनान्तश्च विकल्पेन प्रयोक्तव्य इति। नच द्विदेवत्ये बहुदेवत्ये च एकवचनान्तो न प्रयोक्तव्य इति भ्रमितव्यम्। ऐतरेयब्राह्मणं तु द्विवचनान्त पाठाभिप्रायमिति बोध्यमिति॥

(टि) इदानीमुत्तराधिकरणोपाद्घातत्वेन पूर्वाधिकरणस्द्धिमेवानुकीर्त्यते। तदेतदाह-पूर्वाधिकरणेति॥

॥ एकादशिन्यां एकवचनान्तमेधपति शब्दस्योहाधिकरणम्॥

सू. अर्थान्तरे विकारः स्यात् देवतापृथक्त्वा देकाभिसमवायात् स्यात्॥

(मू) अस्त्येकादश (शि) नी "आग्नेयःकृष्णग्रीवः सारस्वती मेषी बभ्रुः सौम्य" इत्यादिः "प्रैवाग्नेयेन वापयति मिथुनं सारस्वत्या करोति रेतः सौम्येन दधति प्रजनयति पौष्ण्येने त्यादिर्वा। तत्रसंशयः-किमेकवन्निगदो ऽविकारेण प्रयोक्तव्य उत विकारेणेति।

तत्र गणस्यैकत्वात् बहुदेवत्यवत् अविकारेण प्रयोक्तव्य इति प्राप्ते-

ब्रूमः ।देवताबहुत्वाद्विकारेण प्रयोक्तव्यं इति।

अयमत्र विशेषः-बहुदेवत्ये अधिष्ठानबहुत्वेऽपि देवतारूपेणैकत्वादनूहः। देवतागणेषु देवतानामपि बहुत्वादूह इति॥

**॥इति षोडशाध्याय्यां नवमाध्यायस्य॥**

**॥तृतीयः पादः॥**

(टि) बहुदेवत्ये देवतागणेषु च को भेद इत्यत्राह-अयमत्रेत्यादिना॥

**॥इति केरलीये षोडशाध्यायी-॥**

**टिप्पणे नवमाध्यायस्य॥**

**॥ तृतीयः पादः समाप्तः॥**

समानविभक्तिकानां सर्वथा सामानाधिकरण्यं भिन्नविभक्तिकानां तु प्रातिपदिकानां वैयधिकरण्यं विभक्तीतरप्रातिपदिकयोश्च सामानाधिकरण्यं लक्षणया, यथा देवदत्तस्य स्थाल्यामित्यत्र प्रातिपदिकयोरे-कार्थवाचित्वाभावात् वैयधिकरण्यं षष्ठ्या स्थालीप्रातिपदिकस्य च देवदत्तसम्बन्धिनी स्थालीत्येवं सामानाधिकरण्यम्। अत्र च षड्विंशतिशब्दस्य सङ्ख्येयप्रधानत्वात् वङ्क्रिशब्दसामानाधिकरण्यं संख्येयवाचित्वेनैव गुणशब्दत्वात् विशेषणत्वम्। अस्येत्यत्र तु प्रातिपदिकार्थस्य पशोः विभक्त्यर्थोपसर्जनीभूतत्वात् अप्राधान्यविभक्त्यर्थस्य वङ्क्रिविशेषणार्थत्वमिति वङ्क्रीणां प्राधान्यमिति। तदयमत्र वाक्यार्थः - षड्विंशतिसङ्ख्याकाः पशुसम्बन्धिन्यो वङ्क्रय इति। तस्मात् समस्यवचनमिति। सि ध्दमिति। आश्वलायनमते त्वभ्यास इति।

**॥ श्रीः॥**

**॥ अथ नवमस्य चतुर्थः पादः॥**

(टि) अथ वचनस्य सङ्ख्यप्रातिपदिकस्य चोहः कथ्यते।



षड्विंतिसङ्ख्यापशुसम्बन्धप्रकाशनार्थत्वादिति। षांड्वंशतिरस्य वङ्क्य इति त्रिपदं वाक्यम्। तत्रेदमा पशुः षष्ट्यासम्बन्धः षांड्वंशतिरित्यनेन सङ्ख्या वङ्क्रय इत्यनेन वङ्क्रयश्च गम्यन्ते। तत्र षांड्वंशतिसङ्ख्यायाः अस्येत्यनेनाभिहितस्य पशोश्च यः स्मबन्धः षष्ठ्यर्थः तत्प्रधानमिदं वाक्यम्। वङ्क्रिशब्दश्च षड्विंशतिविशेषणार्थः। तथा सत्यभ्यासमात्रमल्पमेवाप्राकृतं भविष्यति। वङ्क्रिप्राधान्ये तु समस्त वचने कृत्स्न एव षांड्वंशतिपदो निवर्तेत। प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थप्राधान्याच्च न पशोः प्राधान्यमिति सम्बन्धः प्रधानम्। यच्च प्रधानं तदेव प्रकाश्यम्। तत्र सम्बन्धवाचिपदाभावात् सम्बन्धवाचिनोरभ्यास इत्यभिप्रायः। अयमेवात्र प्रधानपूर्वपक्षः। इतरे तु सम्भवमात्रेणोपन्यस्ता इति द्रष्टव्यम्। ननु षांड्वंशतिशब्दस्य सङ्ख्यापरत्वे वङ्क्रीणामिति षष्ठ्या भवितव्यमिति चेन्न। वङ्क्रिशब्देन लक्षणया सङ्ख्याभिधानेन सामानाधिकरण्यात् प्रथमोपपत्तेः। यथेन्द्राग्नी देवतेत्यत्रेन्द्राग्निशब्देन समुदायिपरेण समुदायलक्षणया देवतापदसामानाधिकरण्यं तथेति। चोदितस्य पशोरिति। चोदित एव ह्यर्थः प्रकाशयितव्यः। पशुश्च चोदितःन सङ्ख्या तस्मादत्र प्रातिपदिकार्थोऽपि पशुरेव प्रधानं तद्विशेषणं सङ्ख्या वङ्क्रयश्च षांड्वंशतिवङ्क्कोऽयं पशुरिति वाक्यार्थ इति भावः। प्रथमान्तेति। प्रथमान्तपदोपस्थाप्यत्वेऽपि कथं प्राधान्यमिति चेत् अनुपदमेव वक्ष्यतीति। किञ्च ना अनुष्ठ्येति प्रकृतप्रधानपरामर्शिना तद्वृत्तेन वङ्क्रीणां निर्देशाच्च प्राधान्यम्। नहि तेन सम्बन्धः पशुः सङ्ख्यावन्निर्दिश्यते स्त्रीलिङ्गत्वाद्बहुवचनान्तत्वाच्च येन सम्बन्धस्य पशोः सङ्ख्याया वा प्राधान्यं स्यात्। अतोऽपि वङ्क्रीणां प्राधान्यमिति लक्षणया सामानाधिकरण्यमिति। किञ्च सर्वत्रैव हि वाक्य गतसकलपदानां लक्षणाया विशिष्ट क्रियाभिधायित्वात् सामानाधिकरण्यम्। एवं समानाधिकृत पदसमुहश्च वाक्यम्। तथाहि-

"देवदत्तः काष्ठैर्यज्ञदत्तस्य स्थाल्यामोदनं ब्राह्मणेभ्यः पचतीत्यत्र देवदत्तशब्दः आख्यातवाच्य भावनाक्षिप्तकर्तृविशेषणम्। कर्ता च क्रियाविशेषणमिति लक्षणया देवदत्तकर्तृकं पाकं प्रतिपादयति।

कारकविभक्त्यन्तेषु हि प्रातिपदिकं सामानाधिकरण्येन प्रत्ययार्थस्य कारकस्य विशेषणम्। तदपि क्रियाया विशेषणम्। क्रियाशब्दस्तु अर्थान्तरान्वितावस्थां क्रियामेव लक्षयति। षष्ट्यन्तस्तु न क्रियां साक्षात् विशिनष्टि, किन्तु प्रातिपदिकार्थ विशिष्टप्रत्ययार्थभूत सम्बन्धेनान्यत् कि - ञ्चित् विशेष्य पश्चात्तद्विशिष्टां क्रियां प्रतिपादयति।

तदयमत्रार्थः-देवदत्तकर्तृका काष्ठकरणिका यज्ञदत्तसम्बन्धि-स्थाल्यधिकरणिका ओदनकर्मिका ब्राह्मणसम्प्रदानिका पाकक्रिया वर्तत इति। इदानीं सर्वविभक्तचन्तयुक्तं किञ्चित् वाक्यं प्रदर्श्यते-"देवदत्तो यज्ञदत्तस्य दण्डेन वृक्षात् पर्णं विष्णुमित्राय भूमौ पातयति। अस्यायमर्थः देवदत्तकर्तृका यज्ञदत्तसम्बन्धिदण्डकरणिका वृक्षापादानिका पर्णकर्मिका विष्णुमित्रसम्प्रदानिका भूम्यधिकरणिका पतनानुकूला पातनक्रिया वर्तत इति। एवं सर्वत्र वाक्यार्थो लक्ष्य इत्यभिहितान्वयवादिनां भट्टाचार्यपादानां सिद्धान्त इति। एतच्चास्मिन्नधिकरणे लक्षणया सङ्ख्या विशेष्यत इति भाष्यस्य व्याख्यानम्। लक्षणया सामानाधिकरण्यं वाक्येनेत्यर्थ इति टुपिटुपि (टुप्टीका) वार्तिके व्याचक्षाणैः पार्थसारथिथेश्रैस्तन्त्ररत्ने प्रपञ्चितमित्यलं प्रसङ्गागतेन। प्रकृतमनुसरामः।

### ॥ आश्वमेधिक सवनीयाश्वस्य चतुस्त्रिंशद्वङ्क्रिरूपविशेषवचनविकल्पाधिकरणम् ॥

### सू. अश्वस्य चतुस्त्रिंशत्तस्य वचनाद्वैशेषिकम् ॥

(मू) अश्वमेधे श्रूयंते-"अश्वस्तूपरो गोमृगः ते प्राजापत्या इति। त्रयः सवनीयः पशवः। तेष्वश्वस्य चतुस्त्रिंशद्वङ्क्रयः तत्र वैशेषिको मन्त्रः पठितः "चतुस्त्रिंशद्वाजिने देवबन्धोर्वङ्कीरश्वस्येति। तूपरगोमृगयोस्तु षड्विंशतिरे वङ्क्रयः। तत्र षड्विंशतिरस्य वङ्क्रयः इति चोदकेन प्राप्तं प्रयोक्तव्यम्। तत्र" न चतुस्त्रिंशदिति ब्रूयात् षड्विंशतिरित्येव ब्रूयादिति। अत्र पाठप्राप्तं वैशेषिकमृग्वचनं निषिध्यते। ततश्च चोदकप्राप्तं "षड्विंशतिरित्येव ब्रूयादित्यनूद्यते, न तु न गिरागिरेति ब्रूयादिति पाठतः प्राप्तं गिरापदं प्रतिषिध्य "एरं कृत्वोद्वेयमिति इरापदं विधीयते। तद्वदत्र "षड्विंशतिरित्येव ब्रूयादिति



विधिः सम्भवति चोदकप्राप्तत्वादेवकारप्रतिहतविधिशक्तिवाच्च। प्रतिषेधश्च प्राप्तिपूर्व इति प्रकरणपाठेन वाक्यमनुमेयं "चतुस्त्रिंशदिति ब्रूयादिति। ततश्च "चतुस्त्रिंशदिति ब्रूयान्न चतुस्त्रिंशदिति वाक्यद्वयं सञ्जातम्।

एवं स्थिते वैशेषिकमन्त्रवचने संशयः-किं प्रतिषिद्धमपि वैशेषिकं पक्षे स्यादुत सर्वदा प्राकृतमेवेति। तत्र "षड्विंशतिरित्येव ब्रूयादिति वचनबलात् गिरापदवत् पाठप्राप्तं वैशेषिकं बाधित्वा सर्वदा प्राकृतमेवाध्रिगुवचन मिरापदवत् स्यादिति प्राप्ते-

ब्रूमः। श्रुतानुमितवाक्यद्वयबलात् पक्षे वैशेषिकं स्यादिति। इरापदवैषम्यं तु प्रतिपादितमिति भावः।।

(टि) उत्तराधिकरणोपोद्धाततयेदमारभ्यते-तूपर इति। शृङ्ग रहित इत्यर्थः। सिद्धान्तानुरोधेन श्रुतिं व्याचष्टे - अत्र पाठप्राप्तमित्यारभ्य सञ्जातमित्यन्तेन। गिरापदं प्रतिषिध्येति। प्रत्यक्षेण वचनेन गिरापदस्थाने इरापदे विहिते तद्गिरापदं बाधते। ततश्च अनुवाद एव गिरापदप्रतिषेधः। प्रतिषिध्येति वचनं तु यथाश्रुताभिप्रायमिति ध्येयम्। ततश्चात्र प्रतिषेध एव विधेयः न गिरा गिरेत्यत्र त्विरापदविधिरिति विवेकः।

### ॥ आश्वमेधिकसवनीयाश्वस्य चतुस्त्रिंशद्व - ॥ ङ्क्रिरूपविशेषवचनाधिकरणम् ॥

### सू. तत्प्रतिषिध्य प्रकृतिर्नियुज्यते सा चतुस्त्रिंशद्वाच्यत्वात् ॥

(मू) इदं श्रूयते- "न चतुस्त्रिंशदिति ब्रूयात् षड्विंशतिरित्येव ब्रूयादिति। तत्र संशयः - किमश्वस्य चतुस्त्रिंशद्वाजिनमिति वैशेषिकमेव पड्विंशतिर्वाजिन इति षड्विंशतिपदयुक्तं वक्तव्यं चोदकप्राप्ताध्रिगुवचनं न कर्तव्यमिति नियमः अथवा पक्षे तूपरगोमृगयोस्तु द्विपञ्चाशदनयोर्वङ्क्रय इति समस्यवचनस्य चतुस्त्रिंशदित्यस्य विकृतमेव वैशेषिकं तूपरणोमृगयोस्तु द्विपशुव्शा (ञ्चाश) दनयोर्वङ्क्रय इति समस्यवचनं, पक्षान्तरे तु तूपरगोमृगयोः द्विपञ्चाशदनयोर्वङ्क्रय इति समस्यवचनं अश्वस्य तु षड्विंशतिरस्य वङ्क्रय

इति एवमयथार्थमध्रिगुवचन उत वैशेषिकवचनपक्षे पूर्ववदेव, पक्षान्तरे तु तूपरगोमृगयोरश्वस्य समस्यवचनं षड्विंशतिरेषां वङ्क्रय इति।

तत्र "षड्विंशतिरित्येव ब्रूयादित्यनेन ऋचि चतुस्त्रिंशदित्यस्य स्थाने षड्विंशति पदविधानात् नियम इति चेत् उच्यते। "षड्विंशतिरित्येव ब्रूया"दित्यनेन षड्विंशतिरेव ब्रूयात् न समस्य ब्रूयादित्येवं समस्यवचनप्रतिषेधात् अश्वस्याध्रिगुवचनप्रयोगपक्षे यथार्थमध्रिगुवचनं स्यादिति एवं प्राप्ते।

ब्रूमः। षड्विंशतिरित्येव ब्रूयादित्यस्यानुवादकत्वस्योक्तत्वात् पक्षे अश्वस्य वैशेषिकं वचनं। पक्षान्तरे तु षडशीतिरेषां वङ्क्रय इति समस्यवचनमिति। न चतुस्त्रिंशदिति वाक्यस्यायमर्थः-न चतुस्त्रिंशदिति पाठप्राप्तं ब्रूयात् ऋग्वचनं कर्तव्यं यथा (प्र)प्तं षड्विंशतिरिति यथाप्राप्तमध्रिगुप्रैषं ब्रूयात् षडशीतिरेषामिति पक्षद्वययक्तमध्रिगुवचनं कर्तायं न तु षड्विंशतिरस्येति पदद्वययुक्तमिति। इदमधिकरणद्वयमेकमधिकरणमिति पक्षान्तरमाकरे स्थितम्॥

(टि) षड्विंशतिरित्येव ब्रूयादित्यनेनेति। यथा न गिरा गिरेत्यत्र तथेहापीत्यभिप्रायः। द्वितीयपूर्वपक्षवादी तु एवकारस्वारस्यायाह - समस्यवचन प्रतिषेधादिति। एवं सति चतुस्त्रिंशन्निषेधात् षड्विंशतिपदविधेश्च वाक्यभेदः स्यादित्याशयेनाह-अनुवादकत्वस्येति। इरापदवैषम्यं चोक्तमेव। किञ्च चतुस्त्रिंशदिति प्रतीकग्रहणेनर्चां प्रतिषद्धुं शक्नोति गिरापदेन त्वनाद्यत्वान्नर्चां ग्रहणं शक्यमित्यपि वैषम्यमिति। आकर इति। भाष्ये एकाधिकरण्यं वार्तिके तु पक्षद्वयमपीति विवेकः॥

## ॥ अग्नीषोमीयपशावुरूकशब्देन वपाभिधानाधिकरणम्॥

### सू. वनिष्ठुसंविधानादुरूकेन वपाभिधानम्॥

(मू) अध्रिगावाम्नायते- "वनिष्ठुमस्य माराविष्टोरूकं मन्यमाना इति वपोद्धरणकाले। तत्र उरूकशब्दे संशयः-किमुरूकशब्दः उलूकाख्यपक्षिवचनः। ततश्च अस्यपशोःवलिष्ठं पश्वङ्गविशेषं उलूकसादृश्यादुरूकं ऊलूकाख्यपक्षिविशेषं मन्यमाना भ्राम्यन्तो माराविष्ट



लवनं छेदनं कुरुतेति वनिष्ठोर्लवनं प्रतिषिध्यते। अथवा वपावचन उरूकशब्दः। ततश्च वपोद्धरणकाले उरूपं वपां मन्यमाना अस्य पशोर्वनिष्ठं मराविष्टेति वनिष्ठोर्लवनं वपोद्धरणकाले प्रतिषिध्यत इति। तत्र रलयोस्समानवृत्तित्वादुरूकशब्द उलूकवचनः। ततश्च वनिष्ठोर्लवनं प्रतिषिध्यत इति प्राप्ते-

ब्रूमः। वनिष्ठोर्लवितव्यस्य लवनस्य प्रतिषेद्धुमशक्यत्वादुरूकशब्दो वपावचनः। ततश्च वपोद्धरणकाले वपाभ्रान्त्या प्राप्तं वनिष्ठोर्लवनं प्रतिषिध्यत इति। तस्माद्वपावृद्धावुरूकशब्द ऊहितव्य इति। उरूणिके उरूणिकानीति वा उरूके उरूकाणीति वोह इत्याकरे स्थितम्॥

(टि) प्राप्तं वनिष्ठोर्लवनमिति। अनेनात्र पक्षे दृष्टार्थतालाभश्चेति सूचितमिति। प्रयोजनमाह तस्मादित्यादिना।

## ॥ अध्रिगौ प्रशसाशब्दस्य प्रशंसापरत्वाधिकरणम्॥

### सू. प्रशसाऽस्याभिधानम्॥

(मू) अध्रिगाविदमाम्नायते-"प्रशसा बाहूरिति। तत्र संशयः किं प्रशसेति तृतियान्तमस्याभिधानं असिना बाहू कृणुतात् छेत्तव्य इति अथवा द्वितीयाद्विवचनान्तं प्रशंसावचनं छान्दस आकारादेशः तकारलोपश्च प्राशस्त्यं च कात्स्र्न्यं प्रशसा प्रशस्तौ कृत्स्नौ बाहू कृणुतात् छेत्तव्याविति। तत्र शासशब्दस्यासौ प्रसिद्धत्वात् अस्यभिधानमिति प्राप्ते।

ब्रूमः। प्रशसेति प्रशंसावचनं तथा सति दृष्टार्थत्वलाभादिति। तश्य बाहुवृद्धौ ऊहः॥

(टि) दृष्टार्थत्वालभादिति। स्वधितिसाधके छेदने न शक्यमसेः करणत्वं प्रकाशयितुमित्यदृष्टार्थत्वं पूर्वपक्षिणः स्यादित्यभिप्रायः॥

## ॥ अध्रिगुप्रैषे श्येनादिशब्दानां कात्स्र्न्यवचनाधिकरणम्।

### सू. श्येन-शाला कश्यप-कवष-स्रेकपर्णेषु आकृतिवचनं प्रसिद्धसंनिधानात्॥

(मू) अध्रिगावेव श्रूयते-"श्येनमस्य वक्षः कृणुतादि"ति तथा "शला दोषणो कश्यषे वांसेति। तथा "कवषो रूस्रेकपर्णाष्ठीवन्ती"ति। तत्र श्येनसदृशं वक्षः कृणुतादित्यादिरर्थः । तत्र संशयः-किं वक्षः श्येनशंस्थानं कर्तव्यमिति सादृश्यं विवक्षितमुताविकलं पक्ष श्येनसदृशं भवति तत्तथैवोद्धरणीयमिति साकल्यं विवक्षितमिति। एवं शलाक श्याव कवषसेकवर्णेषु। तत्र "अमी पिष्टपिण्डाः सिंहाः क्रियन्तामित्यादि प्रयोगेषु सादृश्यविवक्षादर्शनात् सादृश्यां विवक्षितमिति प्राप्ते।

ब्रूमः। साकल्यं विवक्षितं तथा सति दृष्टार्थत्वलाभादिति। वाक्यार्थनिरूपणार्थमिदमधिकरणम्।

(टि) अध्रिगुप्रसङ्गाद्वाक्यार्थ निरूपणार्थमिदमारभ्यते अध्रिगाविति॥

**॥ दर्शार्थोद्धृताग्निलोपे प्रायश्चित्तरूपज्योतिष्मत्या अननुष्ठानाधिकरणम्॥**

**सू. प्रासङ्गिके प्रायश्चित्तं न विद्यते पदार्थत्वात् तदर्थे हि विधीयते॥**

(मू) "य एवं विद्वानग्निहोत्रं जुहोतीति विहिते अग्निहोत्रे श्रूयते "अग्नये ज्योतिष्मते पूरोडाशमष्टाकपालं निर्वपेत्।

**॥श्रीः॥**

**॥ अथ नवमाध्यायस्य चतुर्थः पादः॥**

**"षड्विंशतिरस्य वङ्क्रयः" इत्यादौ सामस्योहाधिकरणम्॥**

**सू. षड्विंशतिरभ्यासेन पशुगणे तत्प्रकृतित्वाद्**
**गुणस्य प्रविभक्तत्वादविकारे हि तासा**
**मकात्र्स्येनाभिसम्बन्धो विकारान्न समासः**
**स्यादसंयोगाच्च सर्वाभिः॥**

(मू) सन्ति द्विपश्वादयः पशुगणाः "मैत्रं श्वेतमालभेत वारूणं कृष्णमपां चौषधीनां च सन्धावन्नकाम" इत्यादयः। प्रकृतौ चाग्नीषोमीये ऽध्रिगाविदं श्रूयते "षड्विंशतिरस्य वङ्क्रयः ता अनष्ठ्योच्यावयतादिति। अस्य



पशोःवङ्क्रयः पार्श्वास्थीनि षड्विंशतिः षड्विंशतिसङ्ख्यानि सन्ति। ताः पङ्क्ती अनुष्ठ्य अनुष्ठाय अनु क्रमेण गणयित्वा उच्चावथात् उद्धरतादित्यर्थः। तदेतत् षड्विंशतिरित्यादि द्विपश्वादिषु पशुगणेषु चोदकेन प्राप्तम्। तत्र पच्चधा संशयः। किं षड्विंशतिरस्येत्यनयोः पदयोरभ्यास उताविकारेण प्रयोगः अथवा एकवचनद्विवचनाभ्यामूहितव्यं किंवा अस्येत्यस्याभ्यासः आहोस्वित् सर्वपशुगताष्पङ्क्तीस्समस्य तासामियत्ता वचनमिति।

तत्र षड्विंशतिरस्या वङ्क्रय इति वाक्यस्य षड्विंशतिसङ्ख्या पशुसम्बन्धप्रकाशनार्थत्वात् प्रतिपशु भिन्नं तत्सम्बन्धं प्रकाशयितुं सम्बन्धिवाचिनोः षड्विंशतिरस्येत्यनयोः षड्विंशतिः षड्विंशतिरस्यास्य पङ्क्तय इत्येवमभ्यास इति चेत्। उच्यते। अकरणभूतस्यास्य मन्त्रस्यादृष्टार्थत्वात् षड्विंशतिरस्य वङ्क्रय इत्येवमविकारेणैव प्रयोग इति। अत्र वदामः। अकरणेऽपि मन्त्रस्य गमितृणामन्यूनमवदानोद्धरणाय पशुपार्श्वसाकल्यस्मरणरूपदृष्टार्थत्वात् प्रधानभूतां षड्विंशतिसङ्ख्यां प्रकाशयितुं षड्विंशती अनयोः वङ्क्रय इत्येवं वा षड्विंशतय एषां वङ्क्रय इत्येवं एकद्विवचनबहुत्वाभ्यामूहितव्यमिति। अत्रोच्यते। अस्य वाक्यस्य चोदितव्यपशोः प्राधान्येन प्रकाशनार्थत्वात् प्रतिपशु भेदेन प्रकाशयितुं षड्विंशतिरस्यास्या वङ्क्रय इत्येवमस्येत्यभ्यास इत्येवं प्राप्ते।

ब्रूमः। अस्य वाक्यस्य (चोदितस्य पशोः प्राधान्येन प्रकाशनार्थत्वात्) प्रथमान्तपदोपस्थाप्य प्रधानभूतवङ्क्रीयत्ताप्रकाशनार्थत्वात् द्विपञ्चाशदनयोः वङ्क्रयः अष्टसप्ततिरेषां वङ्क्रय इत्येवमादि सर्वपशुगता वङ्क्रीस्समस्य तासामियत्ता वचनमिति।

इदं त्ववधेयम्-द्वेधा सङ्ख्याशब्दाः प्राक् विंशतेः सङ्ख्येयप्रधाना द्वौ त्रय इत्यादयः। विंशतेरूर्ध्वं तु उभयप्रधानाः। तत्र यदा संख्येयप्रधानाः तदा विनापि षष्ठ्या सामानाधिकरण्यं भवति यथा विंशतिर्गाव इति। यदा तु सङ्ख्याप्रधाना तदा तु षष्ठ्यैव सामानाधिकरण्यं यथा विंशतिर्गवामिति। एकार्थपरत्वं चसामानाधिकरण्यम। तत्र यस्ताग्निरूद्धृतोऽहुतेऽतेऽग्निहोत्र उद्रायेदिति। उद्धृतः अग्निहोत्रं होतुं गार्हपत्यादुद्धृत्याहवनीये निहितः

अहुतेऽग्निहोत्र उद्वायेत् शाम्येत् तदा प्रायश्चित्तयमियमिष्टि: कर्तव्येत्वर्थ:। तत्र संशय:-किं यदा दर्शपूर्णमासेनोद्धृतोऽग्निरग्निहोत्रकालेउद्वाति तदेयमिष्टि: कर्तव्या उताग्निहोत्रार्थोद्धृताग्निनाशे ऽस्या निमित्तत्वं तस्यासंजातत्वान्न कर्तव्येति। तत्र उद्वानस्य निमित्तस्य सञ्जातत्वात् न कर्तव्येति प्राप्ते।

ब्रूम:। प्रकरणादग्निहोत्रार्थोद्धृताग्निनाशो निमित्तम्। तस्यासञ्जातत्वान्न कर्तव्येति। अत्रादृष्टार्थादारादुपकारकात् सामवाचकानि दृष्टार्थत्वात्गरीयांसीत्यापि सिद्धमित्यापि बोध्यम्॥

(टि) ऊहसिद्ध्यर्थं पदार्थावान्तरकार्यनिरूपणं प्रस्तुतम्। तत्प्रसङ्गादिदानी मिष्टे: किमपूर्वं कार्यमुताग्निसंस्कार इति चिन्त्यते। तत्र न्यायमालनुरोधेनाधिकरणमारचयति तत्र संशय इत्यादिना। अग्निहोत्रार्थोद्धृताग्निनाश इति। कृत्स्ननाशो निमित्तं। एकदेशनाशस्य सदातनत्वेन निमित्तत्वाभावादिति बोध्यम्। ननु प्रकरणादग्निहोत्राङ्ग त्वमेवावगम्यते, न त्वग्निहोत्रार्थोद्धृताग्निनाशस्य निमित्तत्वं। प्रकरणेन निमित्तस्य विशेषणासम्भवादित्यत्राहात्रेत्यादिना। अयमाशय:-सत्यं प्रकरणा दग्निहोत्राङ्गत्वमेव लभ्यते, नत्वग्निहोत्रार्थोद्धृताग्निनाशस्य निमित्तत्वं तथापि सामवायिकत्वलिप्सयाग्निसंस्कारकत्वेन तस्या अङ्गत्वमिति कल्प्यते। न ह्यन्यार्थसंस्कारकत्वे ऽन्यार्थत्वं सम्भवतीत्यग्निहोत्रार्थोद्धृत नष्टाग्निसंस्कारकत्वमित्यवसीयते। ततश्च तादृशाग्निनाशस्य निमित्तत्वमिति पर्यवसितमिति। तदुक्तं न्यायमालायां-"अग्निहोत्रार्थोद्धृतस्यैवाग्नेरुद्वानं तन्निमित्तमिति प्रकरणादवगम्यते। अनया चेष्ट्याग्निहोत्रार्थोद्धृताऽग्नि: पुनरुत्पाद्यते। तथा सत्यग्निहोत्रस्येयमिष्टि: सामवायिकमङ्गं भवतीति। भाष्य वार्तिक तन्त्ररत्नशास्त्रदीपिकासु किमग्निविशिष्टोद्वान निमित्तमुतोद्वान विशिष्टोऽग्निरिति विचार्य उद्वायेदिति लिङ्गश्रुत्योद्वानस्य वाक्यगम्याग्निनिमित्तत्वतिरस्कारेण निमित्तत्वावगमादुद्वानस्य चानङ्गत्वेन



संस्कार्यत्वाभावादग्नेश्च विशेषणत्वेन कार्यान्वयाभावादारादुपकारिके यमिष्टि रग्निहोत्रस्येति दर्शार्थोद्धृतस्याप्युद्वाने कर्तव्येति पूर्वपक्षं कृत्वाग्निसम्बद्धस्योद्वानस्य सदातनत्वेनानिमित्तत्वा दग्नेरुद्वानव्याप्तेरनित्यत्वेन चोद्वानव्याप्तोऽग्निरिष्टे र्निमित्तं। तस्योद्वानपरीतस्य कार्ययोग्यस्योत्पत्त्यर्थेयमिष्टिरग्निहोत्रस्य सामवायिकमङ्गम्। अग्निहोत्रार्थस्य चाद्धृतस्योत्पादनं कुर्वत्यग्निहोत्राङ्गं स्थान्नान्यार्थस्य। तस्माद्दर्शार्थेनोद्धृतेऽग्नावुद्वाते नैतत् प्रायश्चित्तमिति सिद्धान्तितम्। तदेव युक्ततरम् सुगमत्वात्तु न्यायमालानुसृतमिति। दृष्टार्थत्वादिति। इदं च प्रायिकाभिप्रायम्। अदृष्टार्थत्वेऽपि सामवायिकस्य प्रोक्षणादेरुपकार्योपकारकसम्बन्धस्य क्लृप्तस्य लाभाद्वाक्यविनियोगाच्चप्रकरणविनियोज्यां कल्प्यसम्बन्धादारादुपकार काद्बलीयस्त्वमिति बोध्यम्॥

**॥ धार्योद्वाने प्रायश्चित्तरूपज्योतिष्मत्यननुष्ठानाधिकरणम्॥**

**सू. धारणे च परार्थत्वात्॥**

(मू) इदमाम्नायते - "धार्य्यो गतश्रिय आहवनीयमिति। तत्र गतश्रीशब्दार्थस्त्वेवं श्रूयते। तत्र यो वै गतश्रिय श्री शुश्रुवान् ग्रामणी राजन्य" इति। तत्र ध्रियमाणोऽग्निरग्निहोत्रकालेयदोद्वायति तदा सेयं ज्योतिष्मतीष्टि:कर्तव्या न वेति संशय:। तत्राग्निहोत्रार्थाग्र्युद्वानस्य निमित्तस्योत्पन्नत्वात् कर्तव्येति प्राप्ते।

ब्रूम:। अन्यार्थोद्धृतस्याग्नेर्गतश्रीनिमित्तेन ध्रियमाणस्य नाशे अग्निहोत्रार्थोद्धृताग्निनाशरूपनिमित्तस्यानुत्पन्नत्वात् न कर्तव्येति। यदि पुन: सायमग्निहोत्रार्थस्याग्नेर्गतश्रियो धारणं प्रातरग्निहोत्रकाले चोद्वानं तदा किमियमिष्टि: कर्तव्या न वेति संशय:। अग्निहोत्रार्थोद्धृताग्निनाशनिमित्तस्य सञ्जातत्वात् कर्तव्येति प्राप्ते।

ब्रूम:। यदग्निहोत्रव्यक्त्यर्थोद्धृतोऽग्नि: तस्य तदग्निहोत्रव्यक्तय.. न्तनाशो निमित्तं तस्य चेहासञ्जातत्वान्न कर्तव्येति। न वेदमप्यधिकरणान्तरम्॥

(टि) इदमपि प्रासङ्गिकम्। अग्निहोत्रार्थेति।उद्धृतोऽग्निः सर्वकर्मणां प्रत्येकमुपकरोतीति तेषां प्रत्येकमेवोद्धरणमङ्गं परिषद्भोजनवदित्यग्निहोत्रार्थत्वमुपकारलक्षणमेव च तादर्थ्यमित्यभिप्रायः। न्यायमालानुरोधेनाह-उद्वानस्येति। अथवा यद्यप्युद्वानं परीत एवाग्निनिमित्तं तथापि तादृशमुद्वानं निमित्तत्वेनोच्यमानं न दुष्यतीत्यभिप्रायः। अत एव शास्त्रदीपिकायां "तदुद्वाने कर्तव्येष्टिरित्युक्तम्। अन्यार्थोद्धृतस्येति। अयमाशयः-न ह्युपकारलक्षणं तादर्थ्यं किन्तु श्रुत्यादिलक्षणम्। नच गतश्रीत्वनिमित्तेन पुरुषस्योद्धरणं श्रूयते येनोद्धरणमुद्धृतो वाग्निः सर्वार्थः स्यात्, किन्तु धारणमात्रं श्रुतं, ततश्च यत्किञ्चित्कर्म विशेषोद्देशेनउद्धृतस्याग्ने र्धारणमात्रं गतश्रीत्वेन निमित्तेन करोति।यदुद्देशेन चोद्धरणं कृतं तदर्थमेवोद्धरणम्। उद्धृतश्चाग्निः। स च निमित्तवशाद्धार्यमाणःप्रसङ्गादग्निहोत्रस्योपकरोतीति न तस्याग्निहोत्रार्थत्वमिति। तदग्निहोत्रिव्यक्त्यहुत इति। अकृत्वार्थे चोद्धृताग्नावुद्वाते प्रायश्चित्तम्। इह तु सायंहोमस्य प्रयोजनस्य कृतत्वात् नास्त्यकृतार्थस्योद्वानमिति न प्रायश्चित्तमिति। न वेति। भाष्यशास्त्रदीपिकान्यायमालादिषु नास्ति वार्तिकतन्त्ररत्नादिष्वस्तीति द्रष्टव्यम्॥

### ॥दर्शार्थस्योद्धरणस्यामन्त्रकत्वाधिकरणम्॥

### सू. न तूत्पन्ने यस्य चोदनाऽप्राप्तकालत्वात्॥

(मू) अस्त्याग्निहोत्र उद्धरणमन्त्रः - "वाचा त्वाहोत्रा प्राणेनोद्गात्रा चक्षुषाध्वर्युणा मनसा ब्रह्मणा श्रोत्रेणाग्नीधैः त्वा वभिर्द्धैष्णयैः ऋत्विग्भिः उद्धरामीति। तत्र संशयः-किमयं मन्त्रो दर्शोपक्रमेऽप्युद्धरणे प्रयोक्तव्यो न वेति। तत्र दर्शार्थेऽप्युद्धृतेऽप्यग्नावग्निहोत्रस्यानुष्ठानात् प्रयोक्तव्य इति प्राप्ते।

ब्रूमः। मन्त्रप्रयोगनिमित्तभूताग्निहोत्रार्थोद्धरणकालस्यात्राभावान्न प्रयोक्तव्य। अधिवृक्षसूर्ये सायं आविस्सूर्ये प्रातश्चाग्निहोत्रार्थं वह्न्युद्धरणं विहितम्। दर्शपूर्णमासार्थं प्रातरग्निहोत्रे हुते ऽग्निहोत्रमुद्धृत्यान्वाधानं क्रियत इति बोध्यम्॥



(टि) इदमपि प्रासङ्गिकम्। अनुष्ठानादिति। अग्निहोत्रानङ्गभूते ऽप्युद्धरणे तदुपकारत्वमात्रेण यागार्थयोर्दधिपयसोः प्रणीताधर्मा इव कर्तव्य एव मन्त्र इति भावः। निमित्ताभावान्न मन्त्रप्रयोग इत्याह-मन्त्रप्रयोगेति। को ऽसावग्नि होत्रकाल इत्यत्राह अधिवृक्षेति॥

### ॥ प्रायणीयचरौ प्रधानधर्माणामननुष्ठानाधिकरणम्॥

### सू. प्रदानदर्शनं श्रपणे तद्धर्मभोजनार्थत्वात् संसर्गाच्च मधूकवत्॥

(मू) ज्योतिष्टोमे श्रुयते- "आदित्यः प्रायणीयः पयसि चरूरिति। तत्र संशयः-किमेतत् पयोऽपि प्रदानार्थं विधीयते ततश्च प्रदानधर्माः वत्सापाकरणादयः कर्तव्या उत प्रणीता कार्यचरूश्रपणार्थं पयो विधीयते ततश्च कर्तव्या इति। तत्र चरूदेवतासम्बन्धस्य चरूपयस्सम्बन्धस्य च विधाने वाक्यभेदप्रसङ्गात् इतरेतरविशिष्टं समप्रधानं चरूः पयोऽपि प्रदानार्थं वि धीयते। ततश्च प्रदानधर्माः कर्तव्या इति प्राप्ते।

ब्रूमः। पयसः सप्तमीनिर्देशात् प्रणीताकार्थचरूश्रपणार्थं पयो विधीयते। ततश्च प्रदानधर्माः न कर्तव्या इति। विशिष्टविधानाच्च न वाक्यभेदः। प्रणीताकार्यापत्त्या च प्रणीताधर्माः कर्तव्या इति सिद्धमिति बोद्ध्यम्॥

(टि) वाक्यभेदप्रसङ्गादिति। द्रव्यद्वयविशिष्टदेवतासम्बन्ध विधौ त्वेकार्थविधानान्न वाक्यभेदः। तस्मात् पयःप्रातिपदिकार्थोऽपि देवतासम्बन्धी, सप्तम्यर्थस्तु सश्रवणादर्थप्राप्तो ऽनूद्यते अभ्युदितेष्टिवदिति भावः। पयोविशिष्टचरुद्रव्यदेवतासम्बन्धस्य विधानेवाक्यभेदाभावान्न सप्तमी निर्देशस्याविवक्षितत्वं कल्पयितुं युक्तमित्याशयेनाह-सप्तमीनिर्देशादिति। तत्र चरूः प्रथमानिर्देशाद्धविः पयस्तुपञ्चमीनिर्देशात्तदाधारत्वेन सम्बध्यत इति न हविरिति बोध्यम्॥

### ॥अभ्युदयेष्टौ दधिशृतयोः प्रदेयधर्मानुष्ठानाधिकरणम्॥

### सू. अभ्युदये दोहापनयःस्वधर्मा स्यात् प्रवृत्तत्वात्॥

(मू) इदमाम्नायते- "विवा एतं प्रजया पशुभिरर्धयति वर्धयत्यस्य भ्रातृव्यं

यस्य हविर्निरूप्तं पुरस्ताच्चन्द्रमा अभ्युदेतित्रेधा तण्डुलान्विभजेद्ये मध्यमाः स्युस्तानग्नये दात्रेपुरोडाशमष्टाकपालं कुर्यात् ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधनि चरूं येऽणिष्ठा; तान् विष्णवे शिपिविष्टाय शृते चरूमिति क्वचित्तु ये क्षोदिष्ठाः तान्विष्णव इति पाठो दृश्यते। अत्र पूर्वदेवतातो ऽपनीतानां हविषां देवतान्तरसम्बन्धमात्रं विधीयते नापूर्वं कर्मान्तरं इति षष्ठ उक्तम्। इहतु दधनि चरूं शृते चरूमित्येतदुदाहरणम्। तत्रापि दधिपयसोः प्रणीतधर्माः कर्तव्या इति द्वितीयपाद उक्तम्।

तत्र संशयः-किं दधिशृतयोः प्रदेयधर्माःन कर्तव्याः उत दधिशृतयोः प्रदेयत्वेन देवतासम्बन्धमात्रविधीनां कर्तव्य इति। तत्रपूर्ववत् दधिशृतयोरपि सप्तम्या निर्देशात् न कर्तव्या इति प्राप्ते।

ब्रूमः। प्राप्ते कर्मणि दधिशृतयोः प्रणीतार्थत्वेन च चरोः चरूसम्बन्धःदेवतासम्बन्धश्चेत्यनेक सम्बन्धविधाने वाक्यभेदप्रसङ्गात् दधिशितयोः प्रदेयत्वेन प्रवृत्तयोः देवतान्तर सम्बन्धमात्रविधानात् प्रदेयदर्माः कर्तव्या इति॥

(टि) पूर्वस्यापवादः क्रियते। गतार्थत्वमाशङ्क्याह-तत्रेत्वादि द्वितीयपाद उक्तमित्यन्तेन॥

**॥पशुकामेष्टौ दधिशृतयोः प्रदेयधर्माननुष्ठानाधिकरणम्।**

**सू. अपनयो वार्थान्तरे विधानाच्चरूपयोवत्**

(मू) अस्ति पशुकामेष्टिः "(यः) पशुकामः स्यात् सोऽमावास्यायामिष्ट्वा वत्सानपाकुर्यात् ये क्षोदिष्ठाः तानग्नये सनिवतेऽष्टाकपालं निर्वपेत् ये मधयाः स्युः तान् विष्णवे शिपिविष्टाय शृते चरूं ये स्थविष्ठाः तानिन्द्राय प्रदात्रे दधनि चरूमिति। क्वचित्तु "ये मध्यमाः स्युः तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्यात् ये स्थविष्ठाः तान्निद्राय प्रदात्रे दधनि चरूं ये क्षोदिष्ठाःतान् विष्णवे शिपिविष्टाय दधनि चरूमिति पाठो दृश्यते। तत्र "शृते चरू दधनि चरूमित्येतदुदाहरणम्। तत्र संशयः-किं दधिशृतयोः प्रदेयत्वेन विधानात् प्रदेयधर्माः कर्तव्या उत प्रणीतकार्ये विधानात्न कर्तव्या इति।



तत्राभ्युदयेष्टि समानश्रुतित्वात् प्रदेयत्वेन विधानात् प्रदेयधर्माः कर्तव्या इति प्राप्ते।

ब्रूमः। दधिशृतयोः सप्तमीनिर्देशात् आदित्यचरूपयोवत् प्रणीताकार्यविधानान्न कर्तव्या इति। समानश्रुतित्वात् अभ्युदयेष्टिन्यायशङ्कायां तन्निरासार्थमिदमधिकरणम्॥

(टि) पूर्वापवादः क्रियते।गातार्थमाशङ्क्याह-समानेति।

**॥ ज्योतिष्टोमे श्रयणानां प्रदेयधर्माननुष्ठानाधिकरणम्।**

**सू. श्रयणानां त्वपूर्वत्वात् प्रदानार्थे विधानं स्थात्॥**

(मू) ज्योतिष्टोमे श्रुयते-"पयसा मैत्रावरूणं श्रीणाति सक्तुभिर्मन्थिनं धानाभिर्हारियोजनं हिरण्येन शुक्रं आज्येन आज्येन पात्नीवतमिति। तत्र संशयः-किं पयःप्रभृतीनां सोमेन सह मिश्रणं प्रदानार्थं विधीयते ततश्च सोमवत् पयःप्रभृतीनामपि प्रदेयत्वात् क्रयादयः प्रदेयधर्माः कर्तव्य उत सोमसंस्कारार्थं विधीयते ततश्च प्रदेयत्वाभावान्न कर्तव्या इति।

तत्र संस्कारार्थत्वे अदृष्टोपकारकल्पनाप्रसङ्गात् प्रदानार्थं विधीयते ततश्च सोमवत् प्रदेयत्वात् क्रयादयः प्रदेयधर्माः कर्तव्या इति प्राप्ते।

ब्रूमः। तृतीयाश्रुत्या सोमार्थसंस्कारार्थत्वावगमात् संस्कारार्थं विधीयते। ततश्च पयः प्रभृतीनां प्रदेयत्वाभावात् क्रयादयो न कर्तव्या इति॥

(टि) अदृष्टोपकारेति। प्रदानार्थत्वे तु यागनिर्वृत्तिदृष्टमेव प्रयोजनं स्यादिति भावः। तृतीयेति। द्वितीयाश्रुत्या सोमस्य प्रधानत्वावगमाच्चेति द्रष्टव्यम्। संस्कारार्थमिति। श्रुति बलाददृष्टकल्पना न दुष्यतीति भावः॥

**॥ "ईशानाय परस्वत" इत्यत्र यागान्तरविधानाधिकरणम्॥**

**सू. पर्यग्निकृतानामुत्सर्गे तादर्थ्यमुपधानवत्॥**

(मू) अश्मेधे श्रूयते - "ईशानाय परस्वत आलभत" इति प्रकृत्य "पर्यग्निकृतानारण्यानुत्सृजती"ति। परस्वच्छब्देनारण्याः पशुविशेषा

उच्यन्ते। तत्र संशयः-किमीशानायालभत इति आलम्भमात्रं विधीयते आलब्धानां च पर्यग्निविशिब्ट उत्सर्गः त्यागः पर्यग्निवाक्येन विधीयते उत ईशानवाक्येन यागो विधीयते पर्यग्निवाक्येन च तत्रैव पर्यग्निकरणान्ताङ्गरीतिगुणो विधीयते इति। तत्र इशानवाक्यस्य यागविधायकत्वेऽपि आतिरिक्तस्याप्तपर्यग्निवाक्यस्य यागविधिप्राप्तादुत्सर्गाच्चोदकप्राप्तात् पर्यग्निकरणाच्चान्यस्याप्राप्तस्य विधेयस्यालाभादीशानवाक्येनालम्भमात्रं विधीयते। पर्यग्निवाक्येन च तेषां पर्यग्निविशिष्टः त्यागो विधीयत इति प्राप्ते।

ब्रूमः। ईशानवाक्यस्य यागविधायकत्वेऽपि पर्यग्निकृतवाक्यस्य पर्यग्निकरणान्ताङ्गरीतिरूपगुणात्मकविधेयलाभात् ईशानवाक्येन देवतासम्बन्धश्रवणान्यथानुपपत्तिप्रसूतार्थापत्तिलब्धयागो विधीयते। पर्यगिनवाक्येन च तत्रैव पर्यग्निकरणान्ताङ्गरीतिरूपो गुणो विधीयत इति॥

(टि) प्रसङ्गादस्यारम्भः। अन्यस्याप्राप्तस्येति। चोदकेन सकलाङ्गप्राप्तेः पर्यग्निकरणान्ताङ्गरीतिविधाने परिसङ्ख्या स्यात्। सा च त्रिदोषदुष्टेत्यन्याय्येति भावः। द्रव्यदेवतेति। इशानायेति चतुर्थ्या देवतात्वं परस्वतो द्रव्यं वाक्यात् सम्बन्धश्चावगम्यत इत्यर्थः। पर्यग्निकरणान्तेति। ततश्च प्रत्यक्षविहितया क्लृप्तोपकार प्राकृतपर्यग्निकरणान्ताङ्गरीत्या निराकाङ्क्ष ईशानप्रयोगवचनो गृहमेधीयवत्पात्नीवतवच्च न चोदकमपेक्षते। अतो न चोदकप्राप्तपरिसङ्ख्याप्रतिपत्तिरपीति भावः॥

## ॥ "आज्येन शेषं संस्थापयति" इत्यनेन कर्मान्तर विधानाधिकरणम्॥

### सू. आज्यसंस्थाप्रतिनिधिः स्यात् द्रव्यसंयोगात्॥

(मू) "त्वाष्ट्रं पात्नीवतमालभेते"ति प्रकृत्य यत् पर्यग्निकृतं पात्नीवतमुत्सृजतीति श्रुतं प्रकृत्य श्रूयते "आज्येन शेषं संस्थापयतीति। तत्र संशयः-किं पूर्वस्मिन्नेव कर्मणि उत्सृष्टस्य पशोः स्थाने प्रतिनिधित्वेनाज्यं विधीयते उत पूर्वकर्मशेषभावात् पात्नीवतशब्दं



देवतासमर्पकमनुषज्य पात्नीवतमाज्यं कुर्यादित्येवं कर्मान्तरं विधीयत इति।

तत्र शेषसंस्थापयतिशब्दबलात् पूर्वस्मिन्नेव कर्मणि प्रतिनिधित्वेनाज्यं विधीयत इति प्राप्ते।

ब्रूमः। पर्यग्निकरणान्ताङ्गरीतिविधानात् पूर्वकर्मशेषाभावात् कर्मान्तरं विधीयत इति॥

## ॥ इति षोडशाध्याय्यां नवमाध्यायस्य॥

## ॥ चतुर्थः पादः॥

## ॥ अध्यायश्च समाप्तः॥

(टि) पूर्वाधिकरणैकदेशक्षेपेणास्यारम्भः। पात्नीवते तु पूर्वाधिकरणन्यायेनालभतिर्यागविधिरित्येतदभ्युपगच्छामः। (पात्नीवते तु) पर्यग्निकरणान्ताङ्गरीतिनैराकाङ्क्ष्यं तु न मृष्यामहे शेषसंस्थापयतिशब्दानुपपत्तेरिति पूर्वस्मिन्नेव कर्मणि प्रतिनिधित्वेनेति। अयमाशयः- "पर्यग्निकृतं पात्नीवतमुत्सृजतीत्यनेन पूर्वविहितस्य यागस्य पशुनोपक्रान्तस्याग्निषोमीयविध्यन्ते चोदकप्राप्तेऽनुष्ठीयमाने पर्यग्निकृतावस्थायामुत्सर्गः परित्यागः पशोर्विधीयते। उत्सृष्टे च पशौ द्रव्याकाङ्क्षस्य कर्मशेषस्याज्येन संस्थापनमाज्येन शेषं संस्थापयतीति वाक्येन विधीयत इति। पर्यग्निकरणेति। अयमाशयः-यदात्र त्यागमात्रं विहितमिति तन्मात्रं क्रियते तदोत्पत्तिवाक्यविहितदेवता सम्बन्धाननुष्ठानाद्देवतासम्बन्धविधिरप्रमानं स्यात्। तस्याप्रामाण्ये पूर्वस्मिन् वाक्ये यागविधित्वं न स्यात् प्रत्यक्षयज्यश्रवणात्। असति च यागेऽग्नीषोमीयविध्यन्ताप्राप्तेः पर्यग्निकृतोत्सर्गः शेषसंस्थापनं चानुपपन्नं स्यादिति वाक्यत्रयमप्यप्रमाणं स्यात्। तस्मात् पूर्वाधिकरणन्यायेन पर्यग्निकरणान्ताङ्गरीतिविधानमित्येवाभ्युपगन्तव्यमिति। पूर्वकर्मशेषाभावादिति। प्रत्यक्षविहितया पर्यग्निकरणान्ताङ्गरीत्या निराकाङ्क्षस्य कर्मणाश्चोदकाभावात्तन्मात्रानुष्ठाने समाप्तत्वान्न शेषमस्ति

यस्याज्येन समापनमुच्यतेति भावः।

कर्मान्तरं विधीयत इति। अयमाशयः- "आज्येन शेषं संस्थापयतीत्यत्र प्रकृतं पात्नीवतपदमनुषज्यते। अनुषक्तदेवतापदार्थयुक्त आज्यप्रातिपदिकार्थः संस्थापयतीति प्रत्ययार्थभावनया सम्बध्यते पात्नीवतमाज्यं कुर्यादिति। शेषसंस्थाशब्दौ च तत्सादृश्यात्। तथाहि- पूर्वयागो हि पत्नीवद्देवत्यः। स च पर्यग्निकरणान्तमात्रकरणात् सशेष इव तदनन्तरं चायमाज्यभागः पत्नीवद्देवत्य एव क्रियमाणः तस्यैव शेषसमापनमिव भवतीति। आज्येनेति तृतीया तु संस्थासम्बन्धादनुवाद एव सिद्धं कर्मान्तरमिति॥ इति केरलीये षोडशाध्यीटिप्पणे

॥ नवमस्याध्यायस्य चतुर्थः पादः॥

॥ समाप्तश्चाध्यायः॥

॥ श्रीः॥

॥ अथ दशमाध्यायस्य प्रथमः पादः॥

॥ विकृतौ लुप्तार्थप्राकृतानां बाधकसाधकं।
कृष्णलेष्ववहन्तिबाधसाधकं। वैश्वदेव चरौ
विष्णवावाहनबाधसाधकमिति वर्णकत्रयसहितं प्रथमाधिकरणम्॥

सू. विधेः प्रकरणान्तरेऽतिदेशात् सर्वकर्म स्यात्॥

(मू) सामान्यविशेषातिदेशाभ्यां प्राकृतं विकृतौ कर्तव्यमित्युक्तम्। तत्र संशयः-किं प्राकृतानामङ्गविधायकशास्त्राणां शास्त्रपदार्थभूताङ्गानां अङ्गयुपकारात्मकाङ्गप्रयोजनानां च सर्वेषामतिदेशः यद्वा प्राकृताङ्गजातस्याङ्गशास्त्रजातस्य च स्वरूपैणैवातिदेशः अङ्गप्रयोजनं तु विकृतावेव दृष्टमदृष्टं वा यथासम्भवं प्रकृताविव कल्पनम्। उभयथापि लुप्तप्रयोजनानामङ्गानां अप्यतिदेशात् प्राकृतमङ्गजातं सर्वं विकृतौ कर्तव्यम्। ततश्च बाधासम्भवात् दशमं बाधलक्षणमिदं नारम्भणीयम्।

अथवा दृष्टादृष्टरूपोपकारणामेव साक्षादतिदेशः तद्बलाच्चाङ्गानामतिदेशः



तद्द्वारा च शास्त्राणामतिदेशः ततश्च यत्र तुषविगमादिदृष्टोपकारो न सम्भवति तत्र तदतिदेशासम्भवात् तत्साधनभूतावघातादीनां अवधातादिशास्त्राणां च द्वाराभावेनानतिदेशात् लुप्तप्राकृतयोजनाङ्गानां अनतिदेशात् लुप्तप्राकृतप्रयोजनमङ्गजातं विकृतौ कर्तव्यम्। ततश्च तादृशस्य बाधसम्भवात् बाधलक्षणमारम्भणीयमिति। तत्र शास्त्रपदार्थोपकाराणां प्रकृतौ विद्यामानत्वात् सर्वेषामतिदेश इति चेत्। उच्यते। प्रकृतिवद्विकृतावपि पदार्थपूर्वकोपकारकल्पनाया एव न्याय्यत्वात् प्राकृताङ्गजास्याङ्गशास्त्रजातस्य च स्वरूपेणैवातिदेशः। तत उक्तरीत्या प्राकृतमङ्गजातं सर्वं विकृतौ कर्तव्यम्। ततश्च बाधासम्भवात् बाधलक्षणं नारम्भणीयमिति। एवं प्राप्ते। ब्रूमः। उपकाराणामेवाकाङ्क्षासत्तियोग्यतानां सत्वात्तेषा मेव साक्षादतिदेशः। तद्द्वारा पदार्थानां पदार्थद्वारा च शास्त्राणांअतिदेशः। ततश्चोक्तरीत्या लुप्तप्राकृतप्रयोजनमङ्गजातं विकृतौ नैव कर्तव्यम्। ततश्च तादृशस्य बाधसम्भवात् बाधलक्षममारम्भणीयमिति। तत्र यदेवमिति निश्चितं विज्ञानं कारणान्तरेण मिथ्येति कल्प्यते स बाधः। स च त्रिविधः प्रत्याम्नानात् प्रतिषेधात् अर्थलोपाचेति।

तत्राद्यो यथा "शरमयं बर्हिरिति प्रत्याम्नानात् कुशानां बाधः। द्वितीयो यथा "नार्षेयं वृणीत इति प्रतिषेधात् आर्षेयवरणस्य बाधः। तृतीयो यथा कृष्णलेषु तुषकणविगमरूपार्थलोपादवघातस्य बाध इति। अयमत्र विवेकः -सप्तमे अतिदेशः चिन्तितः तस्यैव विशेषोऽष्टमे चिन्तितः। नवमे तु अतिदेशप्राप्यमाणानां पदार्थानां कश्चिद्विकारो भवति नेत्येवंरूप ऊहश्चिन्तितः। अस्मिंस्तु अतिदेशविषयविशेषश्चिन्त्य इति। किमत्रोदाहरणमिति चेत्। राजसूये रत्निनामेतानि हवींषि भवन्तीति वाक्येन रत्निनामकानां देवतानां सम्बन्धित्वेन कानिचिद्धवींषि दर्शपूर्णमासप्रकृतिकानि विधाय मैत्राबार्हस्पत्ये हविषि श्रूयते "स्वयङ्कृता वेदिर्भवति स्वयं दिनं (तं) बर्हिः स्वयं कृत इध्म इति। तदिहोदाहरणमिति। तत्र वेदेरुद्धननादिकं बर्हिष लवनादिकं इध्यस्य छेदनासदेः लवनादिकं च स्वयंशब्देन वार्यत इति वेद्यादिषु उद्धननादिबाध इति।

इदं त्ववधेयम्-अस्मिन्नधिकरणे युगपत् पदार्थोपकाराणां अतिदेशः पदार्थानामेवातिदेश इति पक्षद्वयं निराकृतमिति। किञ्च सप्तमे विध्यन्तानिदेश उक्तः स च शास्त्रातिदेशः। शब्देन प्राकृतस्य प्रदानविधेर्योऽन्तिमः कथमित्याकाङ्क्षापूरकोऽशः स उच्यते। स च ब्राह्मणमिति स च कार्यातिदेशादार्थिक इति। अथवा काम्येष्टिकाण्डे श्रूयते- "प्राजापत्यं घृते चरुं निर्वपेत् शतकृष्णलामायुष्काम इति। तत्र संशयः किं सुवर्णशक्लेषु कृष्णलेषु अवघातः कर्तव्य उत नेति। तत्र मासाग्निहोत्रवत् चरुनामधेयस्यापि धर्मविधानार्थत्वात् लुप्तप्रयोजनोऽप्यवघातः श्रपणवत् कर्तव्य इति प्राप्ते।

ब्रूमः। वैशद्यरूपसादृश्येनोपपन्नस्य चरुशब्दस्यावघातादिधर्म विधायकत्वासम्भवात् लुप्तप्रयोजनोऽवघातः चोदकप्राप्तो न कर्तव्य इति। यथा कृष्णलचरौ लुप्तप्रयोजनः पाकः क्रियते तथा नामातिदिष्टावघातो ऽपि कर्तव्य इति शङ्कात्र निशक्रियते। "घृते श्रपयतीति प्रत्यक्षविधानात् पाकः क्रियते अवधातो न तथा विधीयत इति अर्थलोपान्न कर्तव्य इति।

अथवा काम्येष्टिष्वेवं श्रूयते - "वैश्वदेवं चरुं निर्वपेत् भ्रातृव्यवान् तं बर्हिषदं कृत्वा शम्यया स्फयेन व्यूहेत् इदमहममुं चामुं च व्यूहामीति यं द्विष्यात्तं ध्यायन् यदधोऽवमृज्येत यच्च स्फय आश्लिष्येत्तद्विष्णव उरुक्रमायावधेदिति। तं इज्याशेषं चरुं बर्हिषदं कृत्वा बर्हिष्यवस्थाप्य भक्षणार्थं इदमहं ब्रह्मभागं व्यूहामीत्यादि मन्त्रं पठन् शत्रुं मनसा ध्यायन् शम्यया स्फयेन च व्यूहेत् चतुर्धा कुर्यात्। तत्र व्यूहकाले यत् चरुलेशो ऽधः भूमौ अवमृज्येत निपतेत् यच्च स्फये आश्लिष्येत् लिप्येत तद्विष्णव उरुक्रमायावधेत् तेन लेशेन उरुक्रमगुणविशिष्टविष्णुदेवताकं यागं कुर्यादित्यर्थः।

तत्र संशयः-किं वैश्वदेविकदेवतावाहनकाले विष्णोरुरुक्रमस्यावाहनं कर्तव्यं उत न कर्तव्यमिति।

तत्रावाहनस्य चोदकप्राप्तत्वादावाहनं कर्तव्यमिति प्राप्ते। ब्रूमः। वैश्वदेविकयागदेवतावाहनकाले वैष्णवयागस्यानिश्चितत्वात्



तद्देवतावाहनं न कर्तव्यमिति। सोऽयं निमित्ता निश्चयात् स्वकाले प्राकृतस्यावाहनस्य बाधः, सञ्जातेतु निमित्ते पौरोडाशिकाज्यभागन्यायेन कर्तव्यमेवावाहनम्। अयं बाधोऽपि स्वकाले अर्थलोपकृत एवेति बोध्यम्॥

॥ श्रीः ॥

## ॥ अथ दशमस्य प्रथमः पादः ॥

(टि) एवं तावद्विकृतिष्वतिदिष्टानां पदार्थानामन्यथाभावात्मक ऊहश्चिन्तितः। इदानीं तु अवसरसङ्गत्या विकृतिष्वतिदिष्टानामेव पदार्थनामियत्तावधारणार्थं बाधाभ्युच्चयचिन्ता प्रस्तूयते।

ननु हेतुहेतुमद्भावो ह्यानन्तर्यप्रयोजकः यथा भेदशेषलक्षणयोः। न ह्यूहबाधयोर्मिथो हेतुहेतुमद्भावो ऽस्ति विषयभेदात्। तथाहि - यत्र हि द्रव्यान्तरे देवतान्तरे वा प्राकृतं प्रयोजनमस्ति तद्विषय ऊहः यथा कृष्णलादाववधातादेरिति। यत्रोहस्तत्र न बाधो यत्र बाधस्तत्र नोह इति विषयभेदादिति चेत्। सत्यमेवम्। तथाप्यूहस्य पदार्थगतरूपान्यथाभावात्मकत्वेन पदार्थप्रत्यासत्तेः पदार्थप्राप्तिरूपाति देशाचिन्तानन्तरं चिन्ता कृता। बाधस्तु पश्चाच्चिन्त्यते। सेयमवसरसङ्गति (त्या) या हेतु हेतुमद्भावसम्बन्धेनानेकप्राप्तौ प्रत्यासन्नचिन्तावसितिः। तदित्थम्-अवसरलक्षण एव बाधस्योहेन सम्बन्धः हेतुहेतुमद्भावस्त्वति देशेनैवेति। तदेतद्दर्शयति-सामान्यविशेषाभ्यामिति। स्वरूपेणैवेति। " सौर्येण ब्रह्मवर्चसं भावयेत्। कथं, आग्नेयस्य यान्यङ्गानि तानि कृत्वेति वाक्यार्थ इति भावः। दृष्टादृष्टेति। दृष्टादृष्टरूपकार्यवत्तासम्पादनं नाम य आग्नेययागगतो व्यापारस्तस्यैव साक्षादतिदेश इत्यर्थः। विद्यमानत्वादिति। प्रकृतिवत् कुर्यादित्यतिदेशे यद्यत् प्रकृतौ विद्यते तत्तत् सर्वमविशेषादतिदिश्यते। तत्र यत्र प्राकृता उपकारा न सम्भवन्ति यथा कृष्णलादिष्ववघातादीनां वितुषीभावादयः तत्र ते मा नामातिदिश्यन्ताम्। अवघाताद्यतिदिष्टाः पदार्थाः प्राकृतोपकारासम्भवेऽप्यदृष्ट

कुर्युरित्यभिप्राय:। एवं चाग्निशब्दस्यैव शास्त्रेण प्राप्तत्वात्तेनैव लक्षणादिना विकृतिष्वपि देवताप्रकाशनं कार्यमित्यूहोऽपि शिथिल इत्यूहाक्षेपेण बाधोपोद्घातत्वेन चास्यारम्भ इति सूचितमिति न्याय्यत्वादिति प्रकृतिवच्छब्देनोपदेशानुरूपत्वावगमादिति भाव: उपकारणामिति। उपकारजनकव्यापारणामिति यावत्। आकाङ्क्षासत्तियोग्यतानामिति। यागेनेष्टं भावयेदित्यस्य हि यथा याग: फलसाधनं भवति तथा व्याप्रियेतेत्यर्थ:। तत्र कथमिति केन व्यापारेण याग: फलसाधनतामापद्यत इत्येवं यागस्य फलजननसामर्थ्यजनको व्यापारविशेषोऽपेक्षित: न तु व्यापारमात्रं येनावघातादि व्यापाररूपेणातिदिश्येत अवघात प्रयाजादिजन्य दृष्टादृष्टोपकारसम्पादनं च यागस्य फलजनन सामर्थ्यजनको व्यापार इति स एवापेक्षित:। आसत्तिरप्युपकारसम्पादनस्यैन।

तथाहि-वैकृतं हि वाक्यं चोदनासामान्यात् प्रथमं प्राकृतं प्रधानवाक्यमुपस्थापयति। तच्च स्वार्थं स्वार्थश्चांशत्रययुक्ता भावना। तत्र साध्यसाधनांशौ विकृतिवाक्येनोपात्तत्वेनानपेक्षितत्वादनादृत्य तृतीय इतिकर्तव्यतांशो गृह्यते। स चाङ्गजन्योपकारात्मनाङ्गस्व रूपाणीति तथा कथमाकाङ्क्षापूरणयोग्यतापि यागगतव्यापारस्यैव नाङ्गस्वरूपाणमिति भाव:। केवलातिदेशविषयचतुर्लक्षणीसङ्गतिं दर्शयन् लक्षणार्थं विवेचयति-अयमत्रेत्यादिना। यत्तु पार्थसारथिमिश्रैस्तन्त्ररत्ने सिद्धान्तितं तद्दर्शयति अस्मिन्नधिकरण इत्यादिना।

अस्मिन्नेवाधिकरणे द्वितीयं वर्णकमारचयति अथवेत्यादिना। तृतीयं वर्णकं रचयति अथवेत्यादिना। चोदकप्राप्तत्वादिति। यद्यप्यस्या देवताया अप्राकृतकार्यत्वाद्यूपावटास्तरणबर्हिष इव बर्हिर्धर्मानावाहनं वैश्वदेविकचोदकेन प्राप्नोति तथापि स्वयमेवायं वैष्णवयाग औषधद्रव्यकत्वादेकदेवताकत्वादाग्नेय विकारस्सन् ततोऽङ्गानि प्रापयति। तत्र वैश्वदेविकतन्त्रमध्यपातात् सर्वाण्यङ्गानि प्रसङ्गेनोपकुर्वन्तीति न पृथक् क्रियते आवाहनं तु गृह्यमाणविशेषत्वेन प्रसङ्गेनाकृतार्थत्वात् कर्तव्यमित्याशय:। अनिश्चितत्वादिति। अयमभिप्राय:-नैमित्तिको हि



वैष्णवयाग: नैमित्तिकश्च निमित्ते सञ्जाते जायते। निमित्तं च स ।श्लेषादि तदावाहनकाले निश्चितमित्यनिश्चित सद्भावोरूक्रमयागदि ।नं प्रयोक्तुं क्षमम्। अविहं च तत् कृतमपि निष्फलमेवेति॥

### ॥ दीक्षणीयादिषु आरम्भणीयाबाधाधिकरणम्॥

**सू. इष्टिरारम्भसंयोगादङ्गभूतान्निवर्तेतारम्भस्य प्रधान संयोगात्॥**

(मू) अस्ति ज्योतिष्टोम: "ज्योतिष्टोमेन स्वर्गकामो यजेतेति। तत्र सन्ति दर्शपूर्णमासप्रकृतिकानि दीक्षणीयादीनि" आग्ना वैष्णवमेकादशकपालं निर्वपेत् दीक्षिष्यमाण: इत्येवमादीनि। अस्ति तु प्रकृतावारम्भणीयेष्टि: आग्नावैष्णवमेकादशकपालं निर्वपेत् दर्शपूर्णमासावारप्स्यमान: सरस्वत्यै चरूमित्याद्याम्नाता। सा विकृतिष्वपि कर्तव्येति द्वादशे वक्ष्यते। तत्र संशय:- किं सोमयागाङ्गभूतासु दीक्षणीयादिष्विष्टिष्वारम्भणीयेष्टि: कर्तव्या न वेति। तत्र चोदकप्राप्तत्वात् कर्तव्येति प्राप्ते।

ब्रूम:। प्रधानभूतज्योतिष्ठोमारम्भसमिद्धारम्भकाणां दीक्षणीयादीनां आरम्भणीयोपकारभूतारम्भस्य पृथगारम्भस्याभावात् लुप्तप्रयोजनारम्भणीया न कर्तव्येति॥

(टि) अस्मिन् पादे प्रायेणार्थलोपात् बाधश्चिन्त्यते। पृथगारम्भस्येति। आरप्स्यमानपुरुषसंस्कारार्था हीयमिष्टिरोदासीन्य विच्छित्त्यपरपर्यायाप्रवृत्तप्रवर्तनं चारम्भ:। ज्योतिष्टोमे च प्रवृत्तो ह्यङ्गेष्वपि प्रवृत्तो भवतीति न दीक्षणीयादीनां पृथगारम्भ इति भाव:॥

### ॥ अनुयज्ञादिष्वारम्भणीयाबाधाधिकरणम्॥

**सू. प्रधानाच्चान्यसंयुक्तात् सर्वारम्भान्निवर्ते तानङ्गत्वात्॥**

(मू) राजसूये इष्टिपशुबन्धसोमदर्विहोमा: प्रधानभूता:। तेषु ऐष्टिकेषु अनुमत्यादिषु संशय:-किमारम्भणीया कर्तव्या न वेति।

तत्र प्रधानभूतानामासां पृथगारम्भसत्वात् अलुप्तार्थारम्भणीया कर्तव्येति प्राप्ते।

ब्रूमः। इष्टिपशुसोमदर्विहोमात्मकराजसूयारम्भस्य एकस्य सर्वेषु व्यासक्तस्य इष्ट्यारम्भत्वाभावात् लुप्तार्थारम्भणीया न कर्तव्येति। अग्निष्टोममध्ये ज्योतिष्टोममाहरन्ति इति प्रत्याम्नानादत्रारम्भणीयाबाध इति पक्षोऽप्याकरे स्थित इति बोध्यम्। छेदनार्थेयमाहुतिः।

(टि) व्यासक्तस्येति। प्रकृतारम्भणीयाया इष्ट्यङ्गत्वादिष्ट्यारम्भो द्वारम्। नच सर्वेषुव्यासक्त आरम्भ इष्टिभिर्व्यपदेष्टुं शक्यते। अग्नीषोमीयहविरिव आग्नेयशब्देनेति इष्ट्यारम्भत्वाभाव इति भावः॥

**॥ आरम्भणीयायामारम्भणीयाबाधाधिकरणम्॥**

**सू. तस्यां तु स्यात् प्रयाजवत्॥**

(मू) अस्त्यारम्भणीयेष्टिः "आग्नावैष्णवमेकादशकपालं निर्वपेत् दर्शपूर्णमासावारप्स्यमाणः सरस्वत्यै चरुमित्याद्याम्नाता। तत्र संशयः- किमारम्भणीयायामारम्भणीया कर्तव्या न वेति। तस्याः पृथगारम्भसत्वात् अलुप्तार्थारम्भणीया कर्तव्येति प्राप्ते।

ब्रूमः। स्वात्मनि स्वातिदेशासम्भवात् न कर्तव्येति। आरम्भो नामौदासीन्यविच्छित्तिरिति बोध्यम्।

(टि) पृथगारम्भसत्वादिति। न ह्यस्या दर्शपूर्णमासाङ्गत्वेऽपि न दीक्षणीयादिवत् प्रधानारम्भेणारम्भः सिद्ध्यति। प्रधानारम्भात् प्राक्कर्तव्यत्वेन विहितत्वादिति भावः। एतेन गतार्थत्वशङ्काप्यधिकरणस्य निरस्तेति बोध्यम्। स्वात्मनि स्वातिदेशाभावादिति। आरम्भणीयाविधानवेलायामारम्भणीयाशून्यौ तत् कथं सातिदिश्येत। असतोऽदिष्टुमशक्यत्वादित्यर्थः। एवं वैमृधेऽपि द्रष्टव्यम्।

**॥ खलेवाल्यां यूपाहुतिबाधाधिकरणम्॥**

**सू. कर्म च द्रव्यसंयोगार्थमर्थाभावान्निवर्तेत तादर्थ्यं श्रुतिसंयोगात्॥**

(मू) ज्योतिष्टोमे अग्नीषोमीये पशौ श्रूयते-"यूपमुच्छेष्यता होतव्यं न हि दीक्षितस्याग्नेर्जुह्वति आज्यं चारणीं चादाय यूपस्यान्तिकेऽग्निं मथित्वा



यूपाहुतीर्जुहोतीति। अच्छशब्दो ... आप्तुमित्यस्यार्थः। ततश्च यूपमाप्तं छेत्तुं इष्यता होतव्यमित्यर्थः। साद्यस्के श्रूयते-"खलेवाली यूपो भवतीति। तत्र संशयः-किं साद्यस्के खलेवाल्यां यूपाहुतिः कर्तव्या न वेति।

तत्र चोदकप्राप्तत्वात् कर्तव्येति प्राप्ते।

ब्रूमः। खलेवाल्यां छेदनाभावात् लुप्तार्था यूपाहुतिर्न कर्तव्येति।

(टि) आहुतेश्छेदनार्थत्वपरिस्फूर्त्यर्थं श्रुतिं व्याचष्टे अच्छशब्द इत्यादिना। छेदनाभावादिति। यथारम्भणीयारप्स्यमान इति लृट्प्रत्ययेनारम्भाङ्गत्वं तद्द्वारेण च दर्शपूर्णमासाङ्गत्वमिति दीक्षणीयादिषु आरम्भाभावात् बाध्यते तथेहापि एष्यतेति लृट्प्रत्ययेन यूपप्राप्त्यर्थस्य गमनस्याङ्गं यूपाहुतिः तद्द्वारेण च छेदनादेशतद्द्वारेण यूपस्येति खलेवाल्यां गमनच्छेदनाद्यभावात् बाध्यत इत्यभिप्रायः॥

**॥ खलेवाल्यां स्थाण्वाहुतिबाधाधिकरणम्॥**

**सू. स्थाणौ तु देशमात्रत्वादनिवृत्तिः प्रतीयेत॥**

(मू) ज्योतिष्टोमे अग्नीषोमीये पशौ श्रूयते-"स्थाणौ स्थाण्वाहुतिं जुहोतीति। तत्र आहुतिविशेष एवं श्रूयते-"वनसा ते शतवल्शो विरोहेति आव्रश्चने जुहोति इति। तत्र संशयः-किमियं स्थाण्वाहुतिः यस्मिन् कस्मिंश्चित् स्थाणौ अग्नीषोमीयस्याशदुपकारकत्वेन कर्तव्यत्वात् खलेवाल्यं कर्तव्यां किंवा यूपाव्रश्चनस्थाणौ कर्तव्यत्वात् तद्द्वारा यूपसंस्कारकत्वात् खलेवाल्यां यूपाव्रश्चनस्थाण्वभावेन लुप्तार्थत्वान्न कर्तव्येति।

तत्र प्रकरणादग्नीषोमीयस्यारादुपकारकत्वेन कर्तव्यात् खलेवाल्यां कर्तव्या स्थाण्वाहुतिरिति प्राप्ते।

ब्रूमः। यूपमच्छेष्यता स्थाणौ स्थाण्वाहुतीर्जुहुयादित्येवं सम्बन्धवाक्यात् यूपाव्रश्चनस्थाणौ कर्तव्यत्वात् तद्द्वारा यूपसंस्कारकत्वात् खलेवाल्यां यूपाव्रश्चनस्थाण्वभावेन लुप्तार्थत्वान्न कर्तव्येति॥

(टि) आरादुपकारकतेनेति। यूपाद्वियोजितस्य स्थाणोरनङ्गत्वादनर्थकः

संस्कार इति भावः। यूपमच्छेष्यता स्थाणाविति। यूपीये स्थाणावित्यर्थः। यद्यप्यत्र सामवायिकत्वेऽप्यदृष्ट एवोपकारकस्तथापि वाक्यविनियोगात् प्रकरणविनियोज्यारादुपकाराद्बलीयस्त्वमिति सावायिकत्वकल्पनमेव युक्तम्। नहि संस्काररस्यानर्थक्यं, यूपीयस्थायणुद्वारेण यूपसंस्कारार्थत्वात्। दृष्टश्चापनीतानामपि स्रगादीनां शुचिदेशनिधानादिरूपो लोके संस्कारः। तत्र हि देवदत्तादीनामेव तं संस्कारं लौकिकामन्यन्ते। न चात्रानुपपत्तिः आचारप्रमाणत्वात्। एवमिहापिसामवायिकस्य गरीयस्त्वादेव स्थाण्वाहुतिरिति षष्ठीसमासः। तथाहि-सप्तमीसमासे तु अधिकरणकारकप्रधानस्थाणो निर्देशः। अधिकरणस्य च क्रियां प्रति गुणभूतत्वात् आहुतिः प्रधानभूतेत्यारादुपकारिका स्यात्। षष्ठीसमासे तु सम्बन्धः प्रधानमित्याहुतिः सामवायिका स्यादिति। एतेन षष्ठ्याश्शेषिविभक्तित्वं सप्तम्याः शेषविभक्तित्वं च व्याख्यातम्।

## ॥ उत्तमप्रयाजस्य संस्कारकर्मताधिकरणम् ॥

### सू. प्रवाजे च तन्न्यायत्वात्।

(मू) दर्शपूर्णमासयोरुत्तमः प्रयाज आम्नायते-"स्वाहाकारं यजतीति। तत्र संशयः-किमनेन वाचनिकस्वाहाशब्दरूपदेवताविशिष्टकर्मविधानात् आज्यभागादिदेवताभ्योऽन्यदेवताकत्वात् आज्यभागादिदेवता-संस्कारकत्वाभावात् दर्शपूर्णमासयोरारादुपकारकोऽयं उत्तमप्रयाज उतास्य कर्मणो " ये यजामहे स्वाहाग्निं स्वाहा सोममित्यादिमन्त्रवर्णात् आज्यभागादिदेवताकत्वात् आज्यभागादिदेवता-संस्कारकोऽयमुत्तमप्रयाज इति।

तत्र यागस्य देवतापेक्षित्वादुक्तरीत्या आरादुपकारक इति प्राप्ते। ब्रूमः। स्वाहाकारमिति द्वितीयान्तेन देवताभिधानात् उक्तरीत्या संस्कारकोऽयमुत्तमप्रयाज इति। तस्मात् सौर्यादिषु उत्तमप्रयाजमन्त्रे " स्वाहाग्निमित्यादौ प्राकृतदेवतावाचिपदानां अर्थलोपाद्बाध इति। इदं



त्ववधेयम्-तद्धितेन चतुर्थ्यन्तेन वा देवतोच्यते न द्वितीयान्तेन द्वितीयायाः कर्मवाचित्वात् देवतायाश्च सम्प्रदानत्वेन कर्मत्वाभावादिति॥

(टि) स्वाहाशब्देति। कारप्रत्ययान्तस्वाहाकारशब्दः शब्दपरो न त्वर्थपरः तथैव स्मरणदिति भावः। देवतापेक्षित्वादिति। " विष्णुं यजतीत्यादिवत् द्वितीयाया देवताभिधायित्वमिति भावः। देवतानभिधानादिति। " विष्णुं यजतीत्या दावनुवादत्वाल्लक्षणया द्वितीयान्तेन देवताभिधानम्। विधौ च लक्षण न्याय्येत्युक्तमेव प्रागिति देवताकाङ्क्षा च मन्त्रवर्णात् पूर्यत इति बोध्यम्॥

## ॥ अग्नियागस्य आरादुपकारकत्वाधिकरणम् ॥

### सू. तथाज्यभागाग्निरपीति चेत्॥

(मू) दर्शपूर्णमासयोः श्रूयते-" आज्यभागौ यजतीति। इदं चापरं श्रूयते - " तौ होचतुः किमावयोः ततः स्यादिति यस्यै कस्यै देवतायै हविर्निर्वपनं स्यात् तद्वा पुरस्तादाज्यस्य यजन्निति तस्माद्यस्यै कस्यै देवतायै हविर्निर्वपति तत्पुरस्तादग्नीषोमाभ्यां यजतीति तन्न सौम्येऽध्वरे पशाविति। तत्र प्रथमाज्यभागोऽग्निदेवताकः द्वितीयस्तु सोमदेवताकः। तत्र सोमदेवताक आरादुपकारक एव प्रधानदेवतासु केवलसोमस्य देवताया अभावेन प्रधानदेवतासंस्कारकर्मत्वसंभवात्. प्रथमाज्यभागे तु संशयः-किमत्र प्रथमप्रधानाष्टकपालपुरोडाशदेवताभूताग्न्युद्देशेनाज्यभागयागस्य तत्संस्कारकत्वेन विधानात् प्रधानदेवताभूताग्निदेवताकत्वात् प्रथमाज्यभागयागो देवतासंस्कारार्थ उत यागोदृशेन देवतारूपाङ्गत्वे नाग्नेर्विधानात् यागस्य प्राधान्यात् संस्कारकर्मत्वासम्भवात् दर्शपूर्णमासयोरारादुपकारक एव प्रथमाज्यभाग इति।

तत्र प्रधानदेवतास्मरणात्मकदृष्दार्थत्वलाभादुक्तरीत्या उत्तमप्रयाजवत् प्रथमाज्यभागोऽपि संस्कारार्थ एवेति प्राप्ते।

ब्रूमः। प्रथमाज्यभागस्य संस्कारकत्वे आज्यभागाविति

यागयोरग्नीषोमाभ्यमिति देवतयोश्च प्रथमस्याज्यभागस्य संकारकत्वं द्वितीयस्यारादुपकारकत्वाचाग्नेः प्राधान्ये सोमस्य गुणत्वे च समानधर्मनिमित्तस्यैकशेषस्य इतरेतरयोगद्वन्द्वस्य चानुपपत्तिप्रसङ्गात् उक्तरीत्या द्वितीयज्याभागवत् प्रथमाज्यभागोऽपि आरादुपकारक एवेति। तस्मात् सौर्यादौ नाग्नेर्बाध इति॥

(टि) पूर्वापवादोऽयम्। अनुपपत्तिप्रसङ्गादिति। किञ्च सोमापेक्षयाज्यभागावुद्दिश्याग्नीषोमाभ्यामित्युपादेयम्। अग्न्यपेक्षया तु विपरीतमिति वाक्यभेदोऽपि स्यादिति बोध्यम्।

## ॥ पशुपुरोडाशस्य देवतासंस्कराकत्वाधिकरणम्॥

### सू. पशावपीति चेत्॥

(मू) ज्योतिष्टोमे पशुरग्नीषोमीयः "आसोमं वहन्ति अग्नीना प्रतितिष्ठते तौ सम्भवन्तौ यजमानमभिसम्भवतः वरुणपाशाभ्यां वा एषोऽभिधीयते यो दीक्षितो यदग्नीषोमीयं पशुमालभते वरुणपाशाभ्यामेव निर्मुच्यत इति। तत्रेदमामनन्ति-" अग्नीषोमीयस्य वपया प्रचर्याग्नीषोमीयं पशुपुरोडाशं एकादशकपालमनुनिर्वपतीति। तत्रासोममित्यादिना वरुणपाशाभ्यामेव निर्मुच्यत इत्येतत्सहितेन लतासोमः प्रणीयमानज्वलनश्च पशोर्देवतेति प्रतिपाद्यते। तत्र संशयः-किमयं पशुपुरोडाशः पश्वङ्गभूतः पशोरारादुपकारकः उत पशुदेवतासंस्कारकत्वेन सामवायिक इति। तत्राग्नीषोमीयमिति तद्धितेन देवताया गुणत्वेन निर्देशान्न प्रधानभूतसंस्कार्यदेवताकगुणभूतसंस्कारकर्म, किन्तु गुणभूतदेवताकप्रधानकर्मकारादुपकारक इति प्राप्ते।

ब्रूमः। दृष्टार्थत्वलाभात् संस्कारकर्मेति। तस्माद्विकृतिष्वन्यदेवताकेषु अग्नीषोमयोर्बाध इति। सन्निपत्योपकारक इति चानर्थान्तरमिति बोध्यम्।

(टि) गुणत्वेन निर्देशादिति। किञ्च लताज्वलनौ हि पशोर्देवता, पुरोडाशे तु न नियोगस्तावेवेति प्रमाणमस्ति। अतोऽपि न पशुदेवतासंस्कारार्थः पुरोडाशयाग इति। दृष्टार्थत्वालाभादिति। लताज्वलनौ वान्यौ वा यैव



पशोर्देवता सैव पुरोडाशस्यापि, दृष्टे सम्भवत्यदृष्टकल्पनाया अन्याय्यत्वातिति भावः॥

## ॥ चरुशब्दस्यौदनवाचिताधिकरणम्॥

### सू. चरुर्हविर्विकारः स्यादिज्यासंयोगात्॥

(मू)" सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकाम इति श्रूयते। तत्र संशयः किं चरुशब्दः स्थालीवचनः स्थाली च कपालविकारो हविःश्रपणार्था किंवा चरुशब्दः स्थालीवचनः स्थाली च पुरोडाशविकारः कृष्णलवदनदनीयापि वचनात् प्रदेया उत चरुशब्द ओदनवचनः ओदनं च पुरोडाशविकारः प्रदेय इति।

तत्र चरुशब्दस्य लोके स्थाल्यां प्रसिद्धत्वात् स्थालीवचनः कपालविकारः स्थाली श्रपणार्था सौर्यमेव स्थाल्येवाभिधीयते। तस्येदमिति सम्बन्धे तद्धितः। सम्बन्धश्च हविर्द्वारक इति चेत्। उच्यते. असति द्रव्यदेवतासम्बन्धे यागस्यैवालाभात् द्रव्यदेवतासम्बन्धप्रतिपादकदेवतातद्धितान्तः सौर्यशब्दः तत्समानाधिकृतश्च चरुशब्दः स्थालीपचनं स्थाली पुरोडाशविकारः स्यात्। कृष्णलवदनदनीयापि स्थाली प्रदेयेत्येवं प्राप्ते।

ब्रूमः। चरुशब्दस्य वेदे याज्ञिकप्रयोगे च ओदनवचनत्वावधारणात् ओदनवचनश्चरुशब्दः ओदनस्य पुरोडाशविकारः प्रदेय इति। तस्मात् सौर्ये प्रत्याम्नानादोदनेन पुरोडाशस्य बाधस्य इति।

अत्रेदमवधेयम्-यत्र वाक्यशेषोऽस्ति तत्र वाक्यशेषोऽनुसर्तव्य इति। त्रिवृच्चर्वादिशब्दानां वाक्यशेषात् स्तोत्रीयनवकौदनाद्यर्थकत्वमिति प्रथमेऽध्याय उक्तम्। इह तु अनेकार्थत्वामन्याय्यमिति वाक्यशेषाभावस्थलेऽपि चरुशब्दस्यौदनाद्यर्थत्वमुच्यत इति॥

(टि) अतः परमापादसमाप्तेः सौर्यविषयो विचारः। प्रसिद्धत्वादिति। याज्ञिकानामप्योदनमात्रे न चरुशब्दप्रयोगः। किन्तु श्रपित ओदन एव।

ततश्च स्थालीसम्बन्धनिमित्त एवौदनेऽपि चरुशब्द इति विशेषणत्वादाकृत्यधिकरणन्यायेन स्थाल्येवभिधेयेति भावः। सा चानदनीयत्वेन हविष्ट्वयोग्यत्वाभावात् श्रपणायोग्यत्वाच्च कपालविकार इत्याह-कपालविकार इति। वेद इति। " आदित्यः प्रायणीयस्छरुरित्यत्वादिति मोदनेनेति पश्चादनुवादादोदनवचनमित्युक्तम् प्रथमेऽध्याये। ततश्च अनेकार्थत्वामन्याय्यमिति सर्वत्रौदनवचनत्वमिति। याज्ञिकप्रयोग इति। तेषां च शब्दैकगम्य धर्माधर्मव्यवहारिणां शब्दार्थाविप्लवे तात्पर्यातिशयसत्वादितरजनेभ्यः प्रत्ययितरत्वात् तेषां प्रयोगविषय एव शब्दार्थ इति निश्चीयत इत्यभिप्रायः॥

**॥ सौर्यचरोः स्थाल्यामेव पाकाधिकरणम्॥**

**सू. स कपाले प्रकृत्या स्यादन्यस्य चाश्रुतित्वात्॥**

(मू) " सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकाम इति श्रूयते। तत्र च चरुरोदनः पुरोडाशविकारश्चेति समधिगतम्। तत्र संशयः, किं चरुः स्थाल्यां कपाले वान्यस्मिन् कस्मिन् वा पक्तव्य इत्यनियमः उत कपाल एव अथवा कपालव्यतिरिक्ते यत्र क्वचित् किं वा स्थाल्यामिति। तत्र अष्टसु कपालेषु ओदनस्य पक्तुमशक्यत्वात् अनियम इति चेत्। उच्यते। चोदकप्राप्तत्वात् कपाले पक्तव्य इति। अत्रोच्यते। ओदनपाकयोरुद-



कधारणार्थत्वमुपादीयमाने कपाले अप्राकृतकार्यत्वप्रसङ्गात् न कपाले पक्तव्यः किन्तु तद्व्यतिरिक्ते यत्र क्वचिदित्येवं प्राप्ते।

ब्रूमः। चरुनिमित्तस्य पाकस्य स्थाल्यां निर्वृत्तेः स्थाल्यां पक्तव्य इति।

**॥ सौर्यचरौ पेषणबाधाधिकरणम्॥**

**सू. तस्मिन् पेषणमनर्थलोपात् स्यात्॥**

(मू) " सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकाम इति श्रूयते। तत्र संशयः-किं चरौ पेषणं कर्तव्यमुत नेति। तत्र चरौ पेषणस्य कर्तुं शक्यत्वात् पेषणं कर्तव्यमिति प्राप्ते।

ब्रूमः। कृते पेषणे ओदनत्वविघातप्रसङ्गात् न पेषणं चरौ कर्तव्यमिति॥

**॥ सौर्यचरौ संयवनबाधाधिकरणम्॥**

**सू. पिण्डार्थत्वाच्च संयवनम्॥**

(मू) " सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकाम इति श्रूयते। प्रकृतौ च श्रूयते - " प्रणीताभिर्हवींषि संयौतीति। तत्र संशयः-किमिह

चरौ संयवनं कर्तव्यमुत नेतीति। तत्र शक्यत्वाच्चोदकानुगहाय कर्तव्यमिति प्राप्ते। ब्रूमः प्रयोजनाभावान्ना कर्तव्यमिति॥

**॥ सौर्यचरौ संवपनबाधाधिकरणम्॥**

**सू. संवपनं च तादर्थ्यात्॥**

(मू) "सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकाम " इति श्रूयते। प्रकृतौ च श्रूयते- "सवितृप्रसून एवैनं त्रिः संवपतीति। तदिह संशयः किमिह चरोः संवपनं कर्तव्यमुत नेति। तत्र शक्यत्वात् चोदकानुग्रहाय कर्तव्यमिति प्राप्ते। ब्रूमः। प्रयोजनाभावान्न कर्तव्यमिति।

**॥ सौर्यचरौ सन्तापनबाधाधिकरणम्॥**

**सू. सन्तापनमधः श्रपणात्॥**

(मू) "सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकाम" इति श्रूयते। प्रकृतावङ्गारैः

सन्तापनं श्रूयते- "वसूनां रुद्राणामादित्यानां भृगूणामङ्गिरसां घर्मस्य तपसा तप्यध्वमिति। तत्र संशयः-किं चरौ सन्तापनं कर्तव्यमुत नेति। तत्र प्रकृतिवचनात् कर्तव्यमिति प्राप्ते। ब्रूमः। अधः पाकरूपप्रयोजनाभावान्न कर्तव्यमिति॥

**॥ सौर्यचरौ उपधानबाधाधिकरणम्॥**

**सू. पृथुश्लक्ष्णे वा अनपूपत्वात्॥**

(मू) "सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकाम" इति श्रूयते। प्रकृतौ च प्रथनं मार्जनं च श्रूयते उरु प्रथस्वेति पुरडाशं प्रथयतीति, "सन्तेन त्वा तनवः पच्यन्तामिति त्रिः परिसंमार्ष्टीति। तत्र संशयः-किं चरौ प्रथनं संमार्जनं च कर्तव्यमुत नेति। चोदकप्राप्तत्वात् कर्तवयमिति प्राप्ते। ब्रूमः। प्रयोजनाभावान्न कर्तव्य इति॥

**॥ सौर्यचरौ अध्यूहबाधाधिकरणम्॥**

**सू. अभ्यूहश्चोपरिपाकार्थत्वात्॥**

(मू) "सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकाम" इति श्रूयते। प्रकृतौ चाध्यूहनं श्रूयते "वेदेन भस्माङ्गारानध्यूहतीति। तत्र संशयः किं चरौ अध्यूहनं कर्तव्यमुतनेति। तत्र प्रकृतिवचनात् कर्तव्यमिति प्राप्ते। ब्रूमः। उपरिपाकरूपप्रयोजनाभावात् न कर्तव्यमिति॥

**॥ सौर्यचरौ ज्वलनबाधाधिकरणम्॥**

**सू. तथा अवज्वलनम्॥**

(मू) "सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकाम" इति श्रूयते। प्रकृतौ चावज्वलनं श्रूयते- "दर्भपुञ्जीलैरवच्वलयतीति। तत्र संशयः किं चराववज्वलनं कर्तव्यं उत नेति। प्रकृतिवद्वचनात् कर्तव्यमिति प्राप्ते। ब्रूमः। उपरिपाकरूपप्रयोजनाभावात् न कर्तव्यमिति॥

**॥ सौर्यचरौ व्युद्धृत्य आसादनबाधाधिकरणम्॥**

**सू. व्युद्धृत्यासादनं च प्रकृतावश्रुतित्वात्॥**



(मू) "सौर्यं चरुं निवेपेत् ब्रह्मवर्चसकाम इति श्रूयते। प्रकृतौ श्रूयते- "अन्तर्वेद्यां हवींष्यासादयतीति। तत् सादनं कपालेभ्यो व्युद्धृत्य क्रियते। तत्र संशयः-किं चरौ व्युद्धृत्य सादनं कर्तव्यमुत नेति। प्रकृतौ कृतत्वात् कर्तव्यमिति प्राप्ते। ब्रूमः। अर्थकृतस्यव्युद्धृत्य सादनस्य चोदकप्राप्तत्वान्न कर्तव्यमिति। इयं नवमाधिकरणी पूर्वाधिकरणप्रयोजनपरत्वात् तदन्तर्भूतैवेति पक्षान्तरम्॥

**॥ इति षोडशाध्याय्यां दशमाध्यायस्य प्रथमः पादः॥**

(टि) पाकविशेषनिमित्तश्चोदने चरुशब्दः न स्थालिसम्बन्ध निमित्तः। नच स स्थालीमन्तरेण स पाको निर्वर्तत इति स्थाल्यादरः। तत् कथमाकृत्यधिकरणन्यायेन स्थालीवचनत्वमिति। अशक्यत्वादिति। अन्यस्य च चोदकेन श्रुत्या वा प्राप्तत्वाल्लिङ्गानुसार्यपि नियम इति भावः। चोदकप्राप्तत्वादिति। यद्यष्टसु कपालेषु न शक्यते पक्तुमोदनस्तर्हि अष्टत्वं निवर्तेत। न तावता कपालमपि निवर्ति तुमर्हतीति भावः। अप्राकृतकार्येति। चोदकानुग्रहाय हि कपाले पाक आश्रितः। तत्राश्रितेऽपि न चोदकानुग्रह इति भावः। स्थाल्यां पक्तव्य इति। एवं स्थिते उत्तरैर्दशभिः सूत्रैः पूर्वाधिकरणस्य प्रयोजनमुच्यत इत्युक्त्वा पुनर्नवाधिकरण्या व्यारव्यातानि तानि सूत्राणि भाष्यकारेण। तत्रोत्तरव्यरव्यानुरोधेनाष्टाधिकरणीमारचयति सौर्यमित्यारभ्येयं नवाधिकरणीत्यतः प्राक्तनेन ग्रन्थेन। प्रवाधिक-रणेति। चरुशब्दार्थविचार प्रयोजनत्वादित्यर्थः॥

**॥ इति केरलिये षोडशाध्यायीटिप्पणे**
**दशमध्यायस्य प्रथमः पादः**
**समाप्तः॥**

**॥ श्री॥**

**॥ अथ षोडशाध्याय्यां दशमस्य द्वितीयः पादः॥**

**॥ कृष्णले चरौ पाकानुष्ठानाधिकरणम्॥**

**॥ सू. कृष्णलेषु अर्थलोपादपाकः स्यात्॥**

(मू) "प्राजापत्ये घृते चरुं निर्वपेत् शतकृष्णलमायुष्काम" इति श्रूयते।

तत्र संशयः-किं कृष्णलेषु पाकः कर्तव्य उत नेति। तत्र लुप्तार्थत्वान्न कर्तव्य इति प्राप्ते। ब्रूमः। "घृते श्रपयतीति प्रत्यक्षवचनाददृष्टार्थः पाकः कर्तव्य इति॥

॥ श्रीः ॥

॥ अथ दशमस्य द्वितीयः पादः॥

(टि) इदानीमर्थलोपापवाद आरभ्यते। अतः परं सप्ताधिकरणी कृष्णलविषया। लुप्तार्थत्वादिति। विकृत्तिः पच्यर्थः। रूपरस गन्धस्पर्शानां पूर्वेषां तिरोभावोऽपूर्वाणआं चाविर्भावो विक्लृत्तिः सा च न कृष्णलेषुसम्पादयितुं शक्यत इति भावः। कर्तव्य इति। पाको नाम विक्लृत्तितरेव। सा चानुष्णस्पर्शवद्दव्यस्योष्णीकरणमिति पक्षान्तरम्। तत्पक्षे सुतरां कर्तव्य इति भावः॥

॥ कृष्णल उपस्तस्तरणाभिघारणयोर्बाधाधिकरणम्॥

सू. उपस्तरणाभिधारणयोरमृतार्थत्वादर्थकर्म स्यात्॥

(मू) "प्राजापत्यं घृते चरु निर्वपेत् शतकृष्णलमायुष्काम" इति श्रूयते। तत्रेव कृष्णलचरौ सन्देहः-किमुपस्तरणमभिघारणं च कर्तव्यं उत नेति। तत्र चोदकपाप्तत्वत् कर्तव्यमिति प्राप्ते।

ब्रूमः। कृष्णलेषु उपस्तरणाभिघारणस्य प्रयोजन स्रुचि संसक्तिनिवारणा-त्मकस्याभावान्न कर्तव्यमिति। अत्रार्थलोपात् उपस्तरणआभिघारणयोर्बाध उक्त इति बोध्यम्॥ (टि) चोदकप्राप्तत्वादिति। अत्र "यदुपस्तृणात्यभिघारयति अमृताहुतिमेवैनां करोतीति वचनात् स्वादिमार्थे उपस्तरणा भिघारंणे। नच कृष्णलेषु स्वादिमा सम्भवतीत्यर्थलोपान्न ते कर्तव्ये इति सिद्धान्तैकदेशिपक्षः। सोऽनुपपन्नः अमृतांहुतिवचनस्यार्थवादत्वात्। चतुरवत्तसम्पत्त्यर्थमुपस्तरणा भिघारणम्। नच सेह "चत्वारि चत्वारि कृष्णलान्यवद्यति चतुरवत्तस्याप्त्यै इति कृष्णलचतुष्ट्वे"नै वचतुरवत्तावाप्तिवचनात् सिद्धेत्यर्थलोपान्न कर्तव्ये इति वाच्यम्। आप्तिवचनस्यार्थवादत्वात्। तस्मोचोदकप्राप्तत्वाचतुरवत्तिसम्पत्तिरूपप्रयोजनस्यालुप्तत्वाच द्वयामपि



कर्तव्यमिति भावः। चतुरवत्तसाम्पत्तिर्न प्रयोजनमनङ्गत्त्वात्। "चतुरवत्तं जुहोतीत्यनेनावत्तस्य होममात्रं विधीयते न चतुस्सङ्ख्यापि सा चोपस्तरणाभिघारणव्यवदानवचनप्राप्ता चतुशब्देनानुद्यत इति चतुष्ट्व स्याविहितत्वेनानङ्गत्वात् न चतुरवत्तसम्प्रपत्तिः प्रयोजनमित्याशयेनाह-स्रुचि संसक्तीति।

॥ कृष्णलचरौ भक्षसद्भावाधिकरणम्॥

सू. भक्षाणां तु प्रीत्यर्थत्वादकर्म स्यात्॥

(मू) "प्रजापत्यं घृते चरुं निर्वपेत् शतकृष्णलमायुष्काम" इति। तत्रैव संशयः- किं कृष्णलानां भक्षोऽस्ति न वेति। प्रकृतः भक्षः पुरूषप्रीत्यर्थ इति कृत्वाचिन्तेयम्। तत्र पुरूषप्रीतिरूपार्थलोपात् नास्ति भक्ष इति प्राप्ते। ब्रूमः। "चश्चूषाकारं भक्षयन्ति निर्धयन्तो भक्षयन्तीति वचनादस्ति भक्ष इति। कृष्णलेषु किप्तस्याज्यस्यात्र भक्षणं विधीयत इति शङ्कानिरासार्थमिदमधिकरणम्॥

(टि) अर्थलोपापवादार्थमेवेदमधिकरणम्। गतार्थतामाशङ्क्य परिहरति कृष्णलेष्वित्यादिना। अयमाशयः- शश्चूषाकारमिति ह्यनुकरणम्। स चानुक्रियमाणशब्द आज्यभक्षणे सिद्ध इत्यनुवादः। हिरण्यभक्षणे तु चुश्चूषाकारस्य नियमेन प्राप्त्यभावेन विधेयत्वाद्वाक्यभेद इति शङ्कितुराशयः। पूर्ववाक्ये कृष्णलानां प्राधान्यादाज्यस्य च तदङ्गत्वात्तेषामेव भक्षणवाक्येऽन्वयः। विशिष्टविधानाच्च न वाक्याभेद इति। चुश्चूषाकारादिविशिष्टं भक्षणमेवात्र विधीयत इति सिद्धान्त्यभिप्राय इति॥

॥ कृष्णलचरौ सहपरिहारविधानाधिकरणम्॥

सू. एकधोपहारे सहत्वं ब्रह्मभक्षाणां प्रकृतौ विहतत्वात्॥

(मू) कृष्णलभक्षणे श्रूयते-"एकधा ब्रह्मण उपहरति" इति।

तत्र संशयः- किमेकधेति सकृत्वं सहत्वं वा विधीयत इत्यनियमः ततश्च चोदकप्राप्तानां इडाप्राशित्रचतुर्धाकरणशंयुवाककालभक्षाणां इडाप्राशित्रचतुर्धाकरण शंयुवाककालभक्षाणां मध्ये एक एवास्य ब्रह्मणो

भक्ष एकस्मिन् काले उपहर्तव्या वेत्यप्यनियमः त सहत्वमेव विधीयते ततश्च एकस्मिन् काले सर्वे उपहर्तव्या इति, तत्र एकधाशब्दस्य सकृत्त्वे सहत्वे च प्रयोगाविशेषादुभयोरनियम इति प्राप्ते।

ब्रूमः। सहत्वं विधीयते ततश्च एकस्मिन् काले सर्वे भक्षा उपहर्तव्याः। तथा सति चोदकप्राप्त पक्षान्तरपबाधाभावादिति॥

(टि) कांस्यभोजिन्यायोऽत्र नियामक इत्याशयेनह-बाधाभावादिति॥

**॥ कृष्णलचरौ ब्रह्मणे सर्वभक्षभागार्पणाधिकरणम्॥**

**सू. सर्वत्वं च तेषामधिकारात् स्वात्॥**

(मू) कृष्णलभक्षण एव श्रूयते-"सर्वं ब्रह्मणे परिहरतीति। तत्र संशयः- किं ब्रह्मभागस्य सर्वस्य परिहारो विधीयते उत परिहरणीयस्य सर्वस्य ब्रह्मसम्बन्धो विधीयते, ततश्चाध्वर्व्यादिभ्यः पुरूषान्तरेभ्यः भक्षा अपनीयन्त इति।

तत्र चोदकप्राप्तपुरूषान्तरभक्षबाधस्य अयोग्यत्वात् ब्रह्मभागस्य सर्वस्य परिहारो विधीयत सति प्राप्ते, ब्रूमः। तथा सति वचनानर्थक्यप्रासङ्गात् परिहरणीयस्य सर्वस्य ब्रह्मसाम्बन्धो विधीयते। ततश्च पुरुषान्तरेभ्यो भक्षा अपनीयन्त इति॥

(टि) इदानीं प्रत्याम्नानाद्बाध उच्यते। अत्र सर्वं ब्रह्मणे परिहरतीति त्रिपदं वाक्यम्। तत्र सर्वताविधिः ब्रह्मसम्बन्धविधिः परिहारविधिश्चेति त्रेधा सम्भवति। तत्र यद् ब्रह्मणे परिहरति तत् सर्वमिति सर्वताविधौ वचनव्यक्तिः। यदब्रह्मणे सर्वं तत् परिहरतीति च परिहारविधौ। तत्र परिहारविपक्षमाश्रित्याह-परिहारो विधीयत इति। धात्वर्थविधिसम्भ वादयमेव पक्षो ज्यायानिति भावः। ब्रह्मभागस्य परिहरणीयस्य सर्वता सर्वस्य ब्रह्मसम्बन्धिनः परिहारस्य चोदकप्राप्त इति वचनानर्थक्यमेवं स्यादित्याशयेन सिद्धान्तमाहः- तथा सतीत्यदिना। यत् परिहरति तत् सर्वं ब्रह्मण इति ब्रह्मसम्बन्धविधिरेव। नच विशिष्टानुवाददोषः परिहरतीत्यनेनैव सर्वपरिहरणानुवादात्। सर्वग्रहणं चातन्त्रमिति भावः॥

**॥ भक्षभागानां स्वस्वकाले ब्रह्मणा भक्षणाधिकरणम्॥**



**सू. पुरूषापनयात् स्वकालत्वम्॥**

(मू)कृष्णलचरौ सर्वभक्षा ब्रह्मण उपहर्तव्याः, ते च एकस्मिन् काले उपहर्तव्या इति स्थिते, संशयः- किं युगपदुपहृता युगपदेव भक्षयितव्य उत प्रकृतिवन्नानाकाल भक्षणमिति, तत्र युगपदुपहृतत्वात् युगपदेव भक्षयितव्या इति प्राप्ते, ब्रूमः। युगपदुपहृतानामपि नानाकालं भक्षयितुं शक्य, त्वात् चोदकबाधकाय प्रकृतिवत् नानाकालमेव भक्षणमिति॥

(टि) युगपदुपहृतत्वादिति। भक्षार्थो ह्युपहार इति भावः॥

**॥ ब्रह्मभक्षे चतुर्धाकरणादीनां अभावाधिकरणम्॥**

**सू. एकार्थत्वादविभागः स्यात्॥**

(मू) प्रकृतौ चतुर्धाकरणं विधाय व्यपदेश आम्नातः- "इदं ब्रह्मण इदं होतुः इदमध्वर्योरिदमनग्रीध" इति। तत्र संशयः स किं कृष्णलेषु कर्तव्य उत नेति। चोदकप्राप्तत्वात् कर्तव्य इति प्राप्ते।

ब्रूमः। प्रकृतौ "इदं ब्रह्मण इत्यादि व्यपदिश्य चतुर्थाकरणं चतुर्णां भक्षणार्थम्। इह च सर्वं ब्रह्मणैव भक्षयितव्यमित्येवं चतुर्थाकरणव्यपदेशयोः अर्थलोपान्न व्यपदेशः कर्तव्य इति॥

(टि) चतुर्धाकरणव्यपदेशयोरिति। चतुर्णां भक्षणार्थं चतुर्धा करणं, व्यपदेशश्च चतुर्णां व्यवस्थार्थं, तदुभयमपीह लुप्तं ब्रह्मणैव सर्वस्य भक्षयितव्यत्वादिति ध्येयम्॥

**॥ ऋत्विग्दानस्यानत्यर्थताधिकरणम्॥**

**सू. ऋत्विग्दानं धर्ममात्रार्थं स्यात् ददातिसामर्थ्यात्॥**

(मू) ज्योतिष्टोमे श्रूयते गौश्चाश्वाश्चाश्वतरश्च गर्दमश्च अजाश्चावयश्च ब्रीह्यश्च यवाश्च तिलाश्च माषाश्च तस्य द्वादशशतं दक्षिणेति। इदमपरं श्रूयते - "ऋत्विग्भ्यो दक्षिणां ददाती" ति। तत्र संशयः- किमिदमृत्विग्दानमद्दष्टार्थमुतानत्यर्थमिति।

तत्र पदश्रुत्या दानकर्तव्यतामात्रावगमात् अदृष्टार्थमिति प्राप्ते।

ब्रूमः। आनतिरूपदृष्टार्थे सम्भवति अदृष्टार्थकत्वकल्पनायागात् आनत्यर्थं दक्षिणादानमिति। तस्मात् सत्रे ष्वर्थलोपादृानं न कर्तव्यमिति।

नियतपरिमाणत्व । मन्त्राददितिकर्तव्याकत्वादीनामदृष्टार्थत्वं विनानुपपत्तिरिति शङ्कां निवारयितुमिदमधिकरणम्। परिमाणनियमादिः भवत्वदृष्टर्थः न तावात सम्भवद्दृष्टार्थत्वस्य दानस्यादृष्टार्थता युक्तेति॥

(टि) अथ सत्रविषया चिन्ता। पदश्रुत्येति। दानस्य ऋत्विक्सम्बन्धाद्धि दानेनानतिकर्तव्यता प्रतियते। स च वाक्यात्। तच्च श्रुतेर्दुर्बलमिति भावः। श्रतिवाक्यबलादृष्टादृष्टफलं बलीय इत्याशयेनाह-आनतिरूपेत्यादिना। अधिकरणप्रयोजनमाह तस्मादिति॥

**॥ ज्योतिष्टोमे भक्षस्य प्रतिपत्त्यर्थताधिकरणम्॥**

**सू. शेषभक्षाश्च तावत्॥**

(मू) सन्ति ज्योतिष्टोमे भक्षो वषट्कारनिमित्तः; होमाभिषवनिमित्तः; समारव्यानिमित्तश्च। तथा दर्शपूर्णमासयोरिडाप्राशित्र चतुर्धाकरणशंयुवाककालाः। तत्रसंशयः किं ते परिक्रयार्था उत प्रतिपत्त्यर्था इति। तत्र भक्षणस्य प्रीतिद्वारानतिरूपदृष्टार्थत्वसाम्भवात् दृष्टपरिक्रियार्था भक्षा इति प्राप्ते-

ब्रूमः। देवतायै सङ्कल्पितस्य द्रव्यस्य यजमानस्यानीशानत्वात् दृष्टप्रतिपत्त्यर्था भक्षा इति। तत्र भक्षाणां प्रतिपत्त्यर्थत्वे स्थिते चतुर्धाकरणे भक्षाश्रवणात् परिक्रयार्थत्वमाशङ्क्य भक्षार्थता तृतीये साधितेति। तस्मात् भक्षाणां सत्रेषु न बाध इति।

(टि) प्रतिपत्त्यर्था इति। प्रतिपत्तिरपि दृष्टमेव प्रयोजनम्।

।अतो नादृष्टकल्पनादोषोऽपीति॥

**॥ सत्रे ऋत्विग्वरणाभावाधिकरणम्॥**

**सू वरणमृत्विजामानमनार्थत्वात् सत्रे न स्यात् स्वकर्मत्वात्**

(मू) सन्ति द्वादशाहप्रभृतीनि सत्राणि - "द्वादशाहमृद्धिकाम उपेयुरित्येवमादीनि। अस्ति च प्रकृतौ ज्योतिष्टोमे ऋत्विग्वरणं "अग्निर्होता स मे होता होतस्त्वं मे होतासीति होतारमित्येवमादि। तत् सत्रेषु कर्तव्यं वा न वेति संशयः। तत्र चोदकप्राप्तत्वात् तदनुग्रहाय कर्तव्यमिति प्राप्ते।

ब्रूमः। प्रकृतावानमनार्थं वरणं, सत्रेषु च यजमानैरात्मावरणेना



नमयितुमशक्य इत्येवमर्थलोपात् न ऋत्विग्वरणं कर्तव्यमिति। ऋत्विक्त्वमदृष्टं तदुत्पादकं च वरणमदृष्टार्थमिति शङ्कानिरासार्थमिदमधिकरणम्॥

(टि) तदनुग्रहायेति। प्रकृतावृत्विक्त्वाधानार्थ वरणं, तच्च सत्रेऽपि "ये यजमानास्त ऋत्विज इति वचनादाधातव्यं, यजमानेष्विलुप्तार्थत्वमिति भावः। नर्त्विग्वरणमिति। यागकर्तृत्वमृत्विक्त्वं, तच्च प्रकृतौ वरणविधानाद्वरणेनानतानामेव, सत्रे तु लुप्तार्थत्वाद्वरणनिवृत्ताववृतानामेवाविगुणं कर्तृत्वं, यदि कर्मकरत्वमृत्विग्त्वमिति मन्यते तदा वरणेनापि यजमानेष्वधातुमशक्यम्। परार्थं कुर्वाणा हि कर्मकराः। यजमाना हि स्वार्थं कुर्वाणा न कर्मकरा भवन्तीति अनृत्विग्भिरेव सत्रं कर्तव्यमिति भावः।

**॥ सत्रे परिक्रयाभावाधिकरणम्॥**

**सू. परिक्रयश्च तादर्थ्यात्॥**

(मू) ज्योतिष्टोमे परिक्रय आम्नातः-गौश्चाश्वश्चाश्वतरश्चगर्दभश्चाजाश्चावयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च तस्य द्वादशशतं दक्षिणेति। परिक्रयो नाम दक्षिणाद्रव्यदानेन स्वाकार्ये नियोक्तुं योग्यताकरणम्। तत्र दक्षिणादानं प्ररिक्रियार्थमित्युक्तम्। सपरिक्रयः किं सत्रेषु कर्तव्यो न वेति संशयः। तत्र चोदकप्राप्तार्थत्वात् तदनुग्रहाय कर्तव्य इति प्राप्ते, ब्रूमः। प्रकृतावानमनार्थः परिक्रयः कर्तव्य इति। "नात्र गौर्दीयत" इत्यादि द्रव्यविशेषे दाननिषेधात् परिक्रयसाधनभूतं दानं सत्रेष न निवृत्तमिति शङ्कानिरासार्थमिदमधिकरणम्। निषेधोऽनुवाद इतिन प्राप्तिं सूचयतीति॥

(टि) गतार्थत्वमाशङ्क्याहात्रेत्यादिना।

**॥ उदवसानीये दानस्य परिक्रयार्थताधिकरणम्॥**

**सू. उदवसानीयः सत्रधर्मा स्यात् तदङ्गत्वात्तत्र दानं धर्ममात्रं स्यात्॥**

(मू) अस्त्युदवसानीयाख्यः पृष्ठशमनीयो नाम यागः

"सत्रादुदवसाय पृष्ठशमनीयेन ज्योतिष्टोमेन सहस्रदक्षिणेन यजेरन्निति। तत्र संशयः- किमयं पृष्ठशमनीयः सत्राङ्गततश्च यजमानैः कर्तव्य इति दक्षिणादानमदृष्टार्थं उत सत्राङ्ग तत ऋत्विग्भिः कर्तव्य इति दक्षिणादानं

परिक्रयार्थमिति। तत्र फलवत्सत्रसन्निधावाम्नानात् सत्राङ्गमुदवसानीयः; ततश्च यजमानैः कर्तव्य इति दक्षिणादानं अदृष्टार्थमिति प्राप्ते। ब्रूमः। समाप्तस्याङ्गासम्भवात् न सत्राङ्गमुदवसानीयः। ततश्च ऋत्विग्भिः कर्तव्य इति दक्षिणादानं परिक्रयार्थमिति। यथा "वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेत्यत्र बृहस्पतिसवस्य वाजपेयाङ्गत्वं तद्वदिहापि स्यादिति शङ्कानिरासार्थमिदमधिकरणम्। तत्र पूर्वकर्मत्यागोऽर्थात् प्रतीयते, इह तु उत्पूर्वस्यास्यतेस्त्यागार्थत्वात् श्रुत्या प्रतीयत इति वैषम्यमिति।

(टि) सत्राङ्गमुदवसानीय इति। अन्यथा सत्रसंयोगः काललक्षणार्थः स्यात् फलं च कल्प्यतेति भावः। समाप्तस्येति। उदवसानं नाम त्यागः। नच त्यक्तस्याङ्गं भवति, भवति चेत्त्याग एवं नोपपद्यत इत्युदवसायश्रुतिबलात् अनङ्गत्वमिति भावः। नच लक्षणा श्रौतमेव सत्रोदवसानं निमित्तीकृत्य पृष्ठशमनीयाविधानात् फलकल्पनापि श्रुतिवशाददोष इति॥

"सत्रादुदवसाय पृष्ठशमनीयेन ज्योतिष्टोमेन सहस्रदक्षिणेन यजेरन्निति श्रूयते। तत्र सत्राङ्गं पृष्ठशमनीय इतिं समधिगतम्। तत्र संशयः- किमुदवसातृभिः सत्रिभिः पृष्ठशमनीयः संहत्यप्रयोक्तव्यः उत एकैकेन पृथक् प्रयोक्तव्य इति। तत्र यजेरन्नित्याख्यातोपात्तस्य उपादेयकर्तृगतबहुत्वस्य विवक्षितत्वात् सहप्रयोक्तव्य इति स्थिते। अन्तराचिन्ता।

(टि) सत्राङ्गमुदवसानीय इति। अन्यथा सत्रसंयोगः काललक्षणार्थः स्यात् फलं च कल्प्येतेति भावः। समाप्तस्येति। उदवसानं नाम त्यागः। नच त्यक्तस्याङ्गं भवति, भवति चेत्त्याग एवं नोपपद्यत इत्युदवसानीयश्रुतिबलात् अनङ्गत्वमिति भावः। नच लक्षणा, श्रौतमेव सत्रोदवसानं निमित्तीकृत्य पृष्ठशमतीयाविधानात् फलकल्पनापि श्रुतिवशाददोष इति॥

॥ उदवसानीयस्यर्त्विजां सत्रिभ्यो भिन्नताधिकरणम्॥

सू. तेषां तु वचनात् द्वियज्ञवत् सहप्रयोगः स्यात्॥

(मू) "सत्रादुदवसाय पृष्ठशमनीयेन ज्योतिष्टोमेन सहस्र दक्षिणेन यजेरन्निति श्रूयते। तत्र संशयः-किं सत्रिणो यजमाना एव ऋत्विजः उतान्ये



वरीतव्या इति।

तत्र उदयसायेति समानकर्तृकक्त्वाप्रत्ययस्थानिकल्यपोद व सानकतृणां सात्रिणामेव यागपृष्ठशमनीययाकर्तृत्वावगमात् सत्रिण एवर्त्विज इति प्राप्ते। ब्रूमः। अत्र समानकर्तृकक्त्वाप्रत्यय-स्थानिकल्यपाद्देश-त्यागरूपयागोदवसानयोरेककर्तृकत्वावगमेऽपि उदवसानार्त्विज्य-योरेककर्तृकत्वेप्रमाणाभावात् प्रकृतिवदन्य ऋत्विजो वरीतव्या इति॥

(टि) प्रमाणाभावादिति। किञ्च दक्षिणाश्रुतिबलादप्यन्ये वरीतव्याः। नन्वेवमङ्गत्वेऽपि दक्षिणाश्रुतेरन्ये सिद्ध्येयुः तत्र किमर्थमङ्गत्वनिराकरणमिति चेत्। सत्यं, अङ्गत्वे हि प्रधानवत् संहत्य प्रयोगः स्यात्। स मा भूदित्यङ्गत्वनिराकरणमिति॥

॥ पृष्ठशमनीये प्रत्येकं यष्टृताधिकरणम्॥

सू. एकैकशस्त्वविप्रतिषेधात् प्रकृतेश्चैकसंयोगात्॥

(मू) स्थितादुत्तरम्-उदवसानैककर्तृकत्वनोधकेन क्त्वास्थानापन्नेन ल्यपा उदवसानवदन्योन्योन्यनिरपेक्षाणामेवोदवसातृणां यागकर्तृत्वावगमात् एकैनैव प्रयोक्तव्यम्। इदं त्ववधेम्-यत्र कत्वाप्रत्ययः तत्र द्वौ प्रयोगौ गम्येते। समानाश्च कर्तारः। तत्रोत्तरप्रयोगवचनेन आख्यातेन धमात्वर्थमात्रं विधीयते तदाश्रयप्रयोगकर्तारः तद्गता सङ्ख्याचानूद्यते। तस्मादप्यत्र बहुत्वमविवक्षितमिति॥

(टि) अन्योन्यनिरपेक्षामिति। अयमाशयः-उदवसाने हि वहूनां कर्तृणां प्राप्तत्वात् प्राप्तमेव बहुत्वं विधीयते। न चाविहितमनङ्गं भवति। किञ्चोदवसानस्यार्थ प्राप्तत्वादभावरूपत्वाच्च नं कर्तृणामन्योन्यापेक्षा। किञ्चोदवसाने गम्यमानमपि बहुत्वमुद्देश्यत्वादविवक्षितया चातुवादत्वादिति भावः। एतच्च मूल एवानुपदं स्फुटीभविष्यति।

॥ कामेष्टौ दानस्यादृष्टार्थताधिकरणम्॥

सू. कामेष्टौ च दानशब्दत्॥

(मू) सारस्वते सत्रे श्रूयते-"प्रोक्षं प्रस्रवणं प्राप्य अग्नये कामाय

पुरोडामष्टाकपालं निर्वपति तस्यामश्वां च पुरुषीं च धेनुके दत्वा कारवचयं प्रति यमुनामवभृधमभ्यवयन्तीति। तत्र संशयः-किमस्यां कामेष्टौ ऋत्विजां सत्वात् असत्यपि दक्षिणाशब्दे दृष्टार्थत्वात् दत्वेति श्रूयमाणं दानं परिक्रयार्थं उत यजमानकर्तृकत्वात् आत्मनः परिक्रयासम्भवात् अदृष्टार्थं दानमिति।

तत्र सत्रेऽतिदेशेन प्राप्यमाणस्य यजमानानामार्त्विज्यस्य प्राकृतेष्ववाङ्गेषु प्राप्यमाणत्वादप्राकृतेऽङ्गेऽस्यामिष्टौ चोदकप्राप्तानां यजमानव्यमि-तिरिक्तर्त्विजां सत्वात् परिक्रयार्थं दानमिति प्राप्ते।

ब्रूमः। सत्रप्रयोगान्तःपातिन्यमस्यां अपूर्वाङ्गत्वेऽपि प्रसङ्गात् यजमानकर्तृकत्वाददृष्टार्थं दानमिति॥

(टि) अप्राकृत इति। यथा प्राकृताङ्गस्य यूपावटस्तरणबर्हिषो न बर्हिर्धर्माः प्राप्यन्ते तथेति भावः। अपूर्वाङ्गत्वेऽपीति। बर्हिर्धर्माः प्रतिस्वं पदार्थानामङ्गम्। तस्माद्युक्तंयदपूर्वेषु न भवन्तीति यजमानास्तु कर्तारः प्रयोगाङ्गत्वाद्विकृतावपि प्रयोगद्वारेण प्राप्नुवन्तीति भावः। ततः किमित्यत आह-प्रसङ्गादिति। प्रत्यक्षवचनेन वा चोदकेन वा न स्वयङ्कर्तृतात्र प्रतीयते किन्तु प्रसङ्गेनेति भावः। इतोऽपि बर्हिर्धर्मवैषम्यमिति द्रष्टव्यमिति।

### ॥ दर्शपूर्णमासयोर्द्वेष्याय दानस्यादृष्टार्थताधिकरणम्॥

**सू. द्वेष्ये चाचोदनादृक्षिणापनयः स्यात्॥**

(मू) दर्शपूर्णमासयोः श्रूयते-"यदि पत्नीः संयाजयन् कपालमभिजुहुयात् वैश्वानरं द्वादशकपालं निर्वपेत् तस्यैकहायनो गौर्दक्षिणा तं स द्वेष्याय दद्यादिति। तत्र संशयः-किमिदमेकहायनस्य दानं परिक्रयार्थमुतादृष्टार्थमिति। तत्र दक्षिणाशब्दात् परिक्रमार्थमिति प्राप्ते। ब्रूमः। द्वेष्यस्यर्त्विक्त्वासम्भवात् अनृत्विजे द्वेष्याय दानमिदमदृष्टार्थमिति॥

(टि) दक्षिणाशब्दादिति। यद्यपि दर्शपूर्णमासयोरेव नैमित्तिकमङ्गमियं वैश्वानरीष्टिस्तथापि वचनबलात् प्रधानदक्षिणातो दक्षिणान्तरं



नानुपपन्नमिति भावः। द्वेष्यस्येति। "ऋत्विगाचार्यौ नातिचरितव्यविति श्रवणादिति भावः। अदृष्टार्थमिति। दक्षिणाशब्दश्च दाने भरवनयावर्तत इति भावः॥

### ॥ जीवतामस्थियज्ञाधिकरणम्॥

**सू. अस्थियज्ञोऽविप्रतिषेधादितरेषां स्याद्विप्रतिषेधादसन्नाम्॥**

(मू) इदमाम्नायते "यदि सत्राय दीक्षितानां प्रमीयेत तं दग्ध्वा कृष्णाजिनेऽस्थीन्युपनह्य योऽस्य नेदिष्ठः स्यात् तं तस्य स्थाने दीक्षयित्वा देन सह यजेरन् ततः संवत्सरेऽस्थिनि याजयेयुरिति तत्र संशयः-योऽयं संवत्सरेऽस्थियज्ञो विहितः तत् किमस्थ्नामुत जीवतामिति।

अस्थीनि इति श्रवणात् अस्थ्नां, इतरेषां सत्रिणां तु ऋत्विक्स्थानीयत्वमिति प्राप्ते।

ब्रूमः। अस्थ्नां कथञ्चिदपि कर्तृत्वासम्थावात् इतरेषां जीवतां सत्रिणामयं याग इति। अस्थिनीति च लक्षणया एतदस्थिमता पुरुषेण सह यष्टुं प्रक्रान्ता उच्यन्त इति बोध्यम्॥

(टि) अस्थीनीति श्रवणादिति। अस्थिशब्देन शरीरशरीरिणोरभेदोपचारेण मृतं लक्षयित्वा तस्यायं यागो विधीयते। तस्मान्मृताधिकारमिदं कर्मसत्रमध्ये मरणनिमित्तं तस्यैव फलदमिति भावः। कथञ्चिदपीति। सक्षाद्वा सन्निधानादिना वेत्यर्थः। बाह्यकर्तुरधिकार इत्याशयेनाह-जीवतामिति। याजयतिश्च ये तेषां याजयितारः तदभिप्रायेण भविष्यति।

### ॥ अस्थियागे अस्थानां जपाद्यननुष्ठानाधिकरणम्॥

**सू. यदि तु वचनात्तेषां जपसंस्कारणर्थलुप्तं सेष्टि तदर्थत्वात्॥**

(मू) अस्थियागेऽस्थ्नामिति कृत्वा चिन्त्यते। तत्र किं मृताधिकारे याजमाना जपाः पवनादयश्च संस्काराः दीक्षणीयेषु कर्तव्या नेति संशयः। तत्र चोदकप्राप्तत्वात् तदनुग्रहाय कर्तव्या इति प्राप्ते। ब्रूमः। अशक्यत्वान्न कर्तव्या इति॥ तत्रायं विवेकः। यमनियमसङ्कल्पो हि दीक्षा। सा च जपा

श्चाचेतनत्वान्न शक्या। केशश्मश्र्वाद्यभावाच्च वपनादिसंस्काराः। ततश्च वपनादीनां दीक्षार्थतया इष्टेश्चार्थलोपाद्बाधः जपस्य चाशक्यत्वादिति॥

(टि) विविच्य दर्शयति-तत्रेत्यादिना॥

॥ अस्थियज्ञे शाखामानशुक्रस्पर्शानुष्ठानाधिकरणम्॥

सू. क्रत्वर्थं तु क्रियेत गुणभूतत्वात्॥

(मू) अस्थियज्ञे आस्थ्यधिकारपक्षे चिन्त्येते। प्रकृतौ "यजमानेन संमितौदुम्बरी भवतीति श्रूयते, तथा "शुक्रं यजमानोऽन्वारभत इति। तत्र संशयः-किमौदुम्बरीसंमानशुक्रान्वारम्भणादिकं यत्क्रत्वर्थं तत् यजमानस्य तत्र गुणभूतत्वात् कर्तव्यमुत न कर्तव्यमिति। तत्राचेतनामस्थ्नां स्वातन्त्र्यलक्षणकर्तृत्वासम्भवात् न कर्तव्यमिति प्राप्ते। ब्रूमः। अचेतनानामपि आख्यातोपात्तव्यपारसमवायात्मक कर्तृत्वसम्भवात कर्तव्यमौदुम्बरीसम्मानशुक्रान्वारम्भणादिकमिति। अन्वारम्भणं स्पर्शन तच्च मानं चाचेतनेनापि कर्तुं शक्यमिति न बाध्यत इति बोध्यम्॥

(टि) न चैतन्यापेक्षं कर्तृत्वं। किन्त्वनन्यापेक्षयाख्य-तोपात्तव्यापारसमवायः। स एव च स्वातन्त्र्यं, अन्यथा काष्ठादीनां ज्वलनादौ कर्तृत्वाभावापत्तेरित्याशयेनाह-अचेतनानामपीति।

॥ अस्थियज्ञेऽस्थ्नां काम्यकर्माद्यननुष्ठानाधिकरणम्॥

सू. काम्यानि तु कामाज्ञानाद्यथेतरस्यानुच्यमानानि॥

(मू) ज्योष्ठिोमे श्रूयते-"यदि कामयेत वर्षुकः पर्जन्यः स्यादिति नीचैस्सदो मिनुयादित्यादि। तत्रास्थ्यधिकारपक्षे किमेवञ्जातीयकानां गुणकामानां प्रवृत्तिः उत निवृत्तिरिति।

तत्र चोदकप्राप्तत्वाच्चोदकानुग्रहाय तेषां प्रवृत्तिरिति प्राप्ते।

ब्रूमः। अचेतनानां कामासम्भवात् लुप्तार्थानां गुणकामानां निवृत्तिरिति। गुमकामानां विकृतौ चोदकप्राप्तिरस्तीति कृत्वाचिन्तेयम्॥

(टि) कृत्वाचिन्तेयमिति दर्शयति-गुणकामानामिति॥



॥ अस्थियज्ञेऽस्थ्नां सूक्तवाकगताशासनाननुष्ठानाधिकरणम्॥

सू. ईहार्थाश्चाभावात् सूक्तवाकवत्

(मू) सन्त्यस्थियज्ञे दर्शपूर्णमासप्रकृतिकानि प्रायणीयादीनि कर्माणि। तेषु चोदकप्राप्तः सूक्तवाकः। तत्र च आयुराशास्त इत्यादिनी फलपदानि सन्ति। तानि किं वक्तव्यानि किं वा न वक्तव्यनीति संशयः।

तत्र कृत्स्नस्य सूक्तवाकस्य प्रहरणाङ्गतया प्राप्तत्वात् वक्तव्यानीति प्राप्ते। ब्रूमः। मृतस्य फलाशासनानवधारणात् लुप्तार्थान्येतानि न वक्तव्यानीति॥

(टि) मान्त्रवर्णिकफलकल्पनादेते फलनिर्देशा इत्याशयेनाह-मृतस्येति।

॥ अस्थियज्ञे होतृकामाभावाधिकरणम्॥

सू. स्युर्वा होतृकामाः॥

(मू) प्रकृतौ सन्ति होतृकामाः-"यं कामयेत पापीयान् स्यादिति नीचैस्तरां तस्य याज्याया वषट्कुर्यात् यं कामयेत वसीयान् स्यात् इति उच्चैस्तरां तस्य याज्याया वषट्कुर्यादित्यवेमादयः। तेषु संशयः-किमस्थियज्ञे प्रायणीयादिषु होतृकामाः स्युरुत नेति।

तत्र कामयितुः होतुः जीवतः कामसम्भवात् अलुप्तार्था होतृकामास्ते स्युरिति प्राप्ते।

ब्रूमः। क्रतुसम्बान्धिसर्वकामानां यजमानकामत्वात् लुप्तार्था होतृकामास्ते न स्युरिति।

वस्तुतस्तु जीवदधिकारत्वात् चोदकप्राप्तं वाञ्छाधिकरण्यामुक्तं न किञ्चिद्बाधितव्यमिति। इदं नाधिकरणान्तरमिति पक्षान्तरम्॥

(टि) कृत्वाचिन्तात्वाविस्मरणार्थमाह-वस्तुतस्त्विति॥

॥ यजमानस्य मरणेऽप सर्वस्वारस्य समापनाधिकरणम्॥

सू. सर्वास्वारस्य दिष्टगतौ समापनं न विद्यते कर्मणो जीवसंयोगात्॥

(मू) अस्ति सर्वस्वारः क्रतुः-"शुनकर्णस्तोमोऽग्निष्टोमःमरणकामो ह्येतेन यजेतानामयःस्वर्गं लोकमियामिति। तस्मिन् सर्वस्वारतृतीयसवने यजमानस्याग्निप्रवेश। आम्नायते-"आर्भवे प्रस्तूयमाने औदुम्बरं दक्षिणेन

देशेन अहतेन वाससा परिवेष्ट्य ब्राह्मणाः समापयत मे यज्ञमिति सम्प्रेष्य संविशतीति। तत्र संशयः-किं यजमाने मृते कर्मशेषं न समापयितव्यं उत समापनीयमिति।

तत्र मृतस्याकर्तृत्वात् न समापनीयमिति प्राप्ते।

ब्रूमः। पैषवचनेन होतृकर्तृत्वावधारणात् समापनीयमिति॥

(टि) हेतु (होतृ) त कर्तृत्वेति । जीवदवस्थायामपि यजमानस्यैतावदेव कर्तृत्वमिति भावः॥

### ॥ सर्वस्वारे कार्यबाध्यव्यवस्थाधिकरणम्॥

### सू. गते कर्मास्थियज्ञवत्॥

(मू) अस्ति सर्वस्वारः क्रतुः शुनकर्णस्तोमोऽग्निष्टोम "मरणकामो ह्येतेन यजेत यःकामयेतामयः स्वयं लोकमियामिति। तत्र मृते यजमाने कर्मशेषं समापनीयमित्युक्तम्। तत्र कर्मशेषे क्रियमाणे याजमानेषु संशयः-किं बाध्याबाध्यनियमः उत क्रत्वर्थं याजमानं न बाध्यं अन्यद्बाध्यमिति नियम इति।

तत्र नियामकाभावादनियम इति प्राप्ते।

ब्रूमः। अस्थियज्ञन्यायात् क्रत्वर्थं न बाध्यमन्यद्बाध्यमिति नियम इति॥

(टि) अस्त्येव नियामकमित्याह-अस्थियज्ञन्यायादिति॥

### ॥ सर्वस्वारे यजमानस्य दिष्टगतावप्यायुराशंसनाधिकरणम्॥

### सू. जीवत्यवचनमायुराशिषस्तदर्थत्वात्॥

(मू) अस्ति सर्वस्वारः शुनकर्णस्तोमोऽग्निष्टोमो "मरणकामो ह्येतेन यजेत यः कामयेतानामयः स्वर्गं लोकमियामिति। तत्रैव संशयः-किं जीवति यजमाने "आयुराशास्त " इत्याशीर्वक्तव्या उत नेति।

तत्र मरणकामस्य यजमानस्य आयुराशाभावान्नाशीर्वक्तव्येति प्राप्ते।

ब्रूमः। यावदार्भवपवमानकालं आयुराशासत्वादाशीर्वगक्तव्येति॥

(टि) आयुराशासत्वादिति। क्रतोरवैगुण्यायेति भावः।



### ॥ द्वादशाहे ऋतुयाज्यद्यनुष्ठानाधिकरणम्॥

### सू क्रिया स्याद्धर्ममात्राणाम्॥

(मू) अस्ति सत्रं द्वादशाहः-"द्वादशाहमृद्धिकामा उपेयुरिति। तत्र ऋतुयाज्यावरणमात्रेयाय हिरण्यदानं च चोदकप्राप्तम्। तत्र संशयः-किमेतद्वरणं दानं च सत्रे कर्तव्यं उत नेति। तत्र स्ववङ्कर्तृत्वात् लुप्तानत्यर्थं वरणं दानं च न कर्तव्यमिति प्राप्ते।

ब्रूमः। ऋतुयाज्यवारणस्यात्रेयाय हिरण्यदानस्य चादृष्टार्थत्वात् अलुप्तार्थमेतद् द्वयं कर्तव्यमिति। प्रत्पुदाहरममिदम्।

(टि) प्रत्युदाहरणमिति। दृष्टार्थत्वस्येति बोध्यम्॥

### ॥ पवमानेष्टौ निर्वापानुष्ठानाधिकरणम्॥

### सू.॥ गुणलोपे च मुख्यस्य॥

(मू) सन्त्यग्न्याधाने पवमानेष्टयः-"अग्नये पवमानाय पुरोडाशमष्टाकपालं निर्वपेत् अग्नये पावकायाग्नेये शुचये इति। दर्शपूर्णमासयोरग्निहोत्रहवण्यां हवींषि निर्वपतीति श्रुताग्निहोत्रहवण्यां हविर्निर्वापः पवमानेष्टिषु चोदकप्राप्तः तास्वग्निहोत्रहवणी नास्ति। ययाग्निहोत्रं हुतं सा ह्यग्निहोत्र हवणी। नच पवमानेष्टिकाले अग्निहोत्रं हुतमिति।

एवं स्थिते संशयः-किं निर्वापोऽपि न कर्तव्यः उत कर्तव्य इति।

तत्राग्निहोत्रहवण्यभावात् निर्वापोऽपि न कर्तव्य इति प्राप्ते।

ब्रूमः। गुणलोपे मुख्यलोपस्याय्यत्वात् निर्वापः कर्तव्य इति॥

(टि) गुणलोप इति। अग्निहोत्रहवण्यसम्भवान्न चोदकेन प्राप्यते। अप्राप्तायाश्च नाङ्गत्वम्। अतस्तदभावेऽपि न निर्वापस्य वैगुण्यमिति भावः।

### ॥ वाजपेये मुष्टिलोपाधिकरणम्॥

### सू. मुष्टिलोपात्तु सङ्ख्यालोपस्तद्गुणत्वात् स्यात्॥

(मू) अस्ति वाजपेयः-"शरदि वाजपेयेन स्वाराज्यकामो यजेतेति। तत्र श्रूयते-"बार्हस्पत्यः सप्तदशशरावः क्षीरेचरुर्भवतीति। अस्ति तु प्रकृतौ

चतुस्सङ्ख्या मुष्टिद्रव्यं च "चतुरो मुष्टिन्निर्वपतीति। तदुभयमिह चोदकप्रा। तत्र चतुर्भिर्मुष्टिभिः सप्तदशशरावपरिमितचरुः सम्पादयितुं न शक्यत इत्यवश्यबाधितव्ये संशयः-किमुभयं बाधितव्यमुतानियमेन। तत्राप्यविशेषादनियमः अन्यतरत् बाधितव्यं किं वा सप्तदशसङ्ख्यया चतुस्सङ्ख्या बाधितव्या अथवा शरावद्रव्येण मुष्टिद्रव्यं बाधितव्यमिति। तत्राविशेषादुभयं बाधितव्यमिति चेत्। उच्यते। आर्थिकबाधे एव बाधेनोपपत्तौ उभयबाधनस्यान्याय्यत्वादन्यतरत् बाधितव्यम्। तत्राप्य विशेषादनियम इति। अत्रोच्यते। सङ्ख्याया द्रव्यं प्रति गुणत्वात् सप्तदशसङ्ख्याया चतुस्सङ्ख्या बाधितव्येति, एवं प्राप्ते।

ब्रूमः। चतुस्सङ्ख्यामुष्टिद्रव्ययोः उभयोरपि द्वितीयाश्रुत्यव-गतनिर्वापाङ्गभूतयोः तुलयप्रधानत्वयोर्मध्ये मुष्टिद्रव्यस्य जघन्यत्वात् शरावद्रव्येण मुष्टिद्रव्यं बाधितव्यमिति। अत्रेदमवधेयम्-सप्तदशशरावपरिमाणं यागद्रव्यविषयं चतुर्मुष्टिपरिमाणं तु निर्वापद्रव्यविषयमिति विषयभेदान्न बाधो यद्यपि तथापि चुतर्भिर्मुष्टिभिः सप्तशरावश्चरुः सम्पादयितुं शक्यत इत्यर्थात् बाधः। एवं विधश्चार्थिकबाध इत्युच्यते। यद्यत्र विषयैक्यमस्ति तर्ह्युभयमुभयेन बाध्यत एव। तस्मात् एकविषयत्वेनान्यतरबाधेन निर्वाह इति। अयं च प्रत्याम्नानात् बाध इति॥

(टि) आर्थिकबाध इति। सप्तदशसङ्ख्या शरावपरिमाणं च यागद्रव्यपरिच्छेदकम्। चतुस्सङ्ख्या मुष्टिश्च निर्वापाङ्गम्। अतो विषयभेदान्न साक्षाद्बाधः। किन्तु चतुर्भिर्मुष्टिभिः सप्तदशशरावश्चरुर्न सम्पादयितुं शक्यत इत्यर्थाद्बाध इति भावः। एतच्चानुपदमेव वक्ष्यति॥

**॥ धेन्वाधिशब्दानां गोवाचिताधिकरणम्॥**

**(मू) औत्पत्तिके तु द्रव्यतो विकारः स्यादकार्यत्वात्॥**

(मू) क्वचित् श्रूयते-"द्यावापृथिव्यां धेनुमालभेत मारुतं



वस्तमैन्द्रमृषभमिति। तत्र धेनुशब्दो वत्सशब्दः ऋषभशब्दश्च गोद्रव्यसाधारणगुणवचना एव। तत्र संशयः-किं धेन्वादिशब्दा लक्षणया चोदकप्राप्ताजद्रव्ये वर्तन्ते यथाजमृषभमित्यादिषु तथा, ततश्च चोदप्राप्तमजद्रव्यं न बाध्यते अथवा श्रुत्युक्तगुणसम्पादनार्थमशाब्दमपि गोद्रव्यं प्राप्तं तद्विरोधादजद्रव्यं बाध्यत इति।

तत्र गोद्रव्यस्योपदेशेन चाप्राप्तत्वात् एते शब्दाः लक्षणया चोदकप्रपाप्ताजाद्रव्ये विशेषणार्थं वर्तन्ते। ततश्चाजाद्रव्यं न बाध्यते। "अजा धेनुरजा वत्सोऽजऋषभश्चलब्धव्य इति प्राप्ते।

ब्रूमः। धेन्वादिशब्दानां गोगताधानादिगुणवाचित्वात् श्रुत्युक्तगोनिष्ठाधानादि सम्पादनार्थं गोद्रव्यं प्राप्तं तद्विरोधादजद्रव्यं बाध्यते धेनुर्गौर्वत्सो गौ ऋषभो गौश्च लब्धव्या इति॥

(टि) धेन्वादिशब्दा यद्यपि गोरसाधारणं गुणं वदान्ति तथापि न गोर्वाचका इत्याशयेनाह-गोद्रव्यस्येति। विशेषमार्थमिति। यथाजमृषभमित्यादि तद्वदिति भावः। आनुमानिकचोदकानुरोधेन प्रत्यक्षश्रुतानां शब्दानां लक्षणावृत्तिर्न न्याय्येत्याशयेनाह-श्रुत्युक्तेति। अजमृषभमित्यत्राजस्य श्रुतत्वान्न लक्षणाया अन्याय्यत्वमिति भावः।

**॥ वायव्यं श्वेतमित्यत्राजस्यैवालम्भनाधिकरणम्॥**

**सू. नैमित्तिके तु कार्यत्वात् प्रकृतेः स्यात्तदापत्तेः॥**

(मू) इदमामनन्ति-"वायव्यं श्वेतमालभेत भूतिकाम इति। तत्र संशयः-किं यः कश्चित् श्वेतगुणसम्बद्ध आलब्धव्य उताज इति।

तत्र श्वेतशब्दस्य साधारणगुणवाचित्वात् यः कश्चित् श्वेतगुणसम्बद्धः आलब्धव्य इति प्राप्ते।

ब्रूमः। अजद्रव्ययस्य चोदकप्राप्तत्वविशेषसत्वात् अज एव श्वेतगुणसम्बद्ध आलब्धव्य इति। साधारणगुणवचनेषु श्रूयमाणेषु विरोधाभावान्न चोदकप्राप्तस्याजस्य बाधनमिति प्रत्युदाहरणमेतत्॥

(टि) चोदकाविरोधे सति तद्बाधाशङ्का मन्देत्याशयेनाह

साधारणगुणेत्यादिना। प्रत्युदाहरणमिति। असाधारणग्रहणमस्येति शेषः॥

॥ खलेवालीतण्डुलयोः खादिरव्रैहत्वानियमाधिकरणम्॥

सू. विप्रतिषेधे तद्वचनात् प्राकृतगुणलोपः स्यात्तेन च कर्मसंयोगात्॥

(मू) साद्यस्के श्रूयते-"खलेवाली यूपो भवतीति, तथा "चित्रायामिष्टौ श्रूयते-"दधि मधुघृतमापो धानास्तण्डुलाः तत्संसृष्टं प्राजापत्यं भवतीति। तत्र खलेवाल्यां तण्डुलेषु च संशयः-किं खादिरादयः तत्संस्काराः छेदनादयः व्रीह्यादयः तत्संस्कारा अवघातादयश्च चोदकप्राप्ता न बाध्यन्ते यदि खदिराद्यन्यतमं छेदनादिभिः यूपं कृत्वा स खलेवाली कर्तव्या यो यूपः छेदनादयः खलेवालीषु भवतीति वचनव्यक्तिः यूपानुवादेन खलेवालीत्वं विधीयते व्रीह्यादयश्चावघाता दिभिस्तण्डुलीकर्तव्यास्ततो न बाध्यन्ते अथवा चोदकप्राप्ता बाध्यन्ते यदि या खलीवाली उत्तरवेदिभूते खले पूर्वमवस्थिता खादिर्यखादिरी वा यूपशब्दलक्षिते यूपकार्ये विधीयते या खलेवाली सा यूपो भवतीति च वचनव्यक्तिस्ततः खादिरादयः तत्संस्काराश्च बाध्यन्ते व्रीहयः अवघातादयश्च न बाध्यन्ते। ततश्च प्रै (व्रै) हा अप्रै (व्रै) हा वा लोकसिद्धास्तण्डुला उपादातव्या इति। तत्र खदिरादीनां चोदकप्राप्तत्वाचोदकानुग्रहाय न ते बाध्यन्त इति प्राप्ते।

ब्रूमः। यूपानुवादेन खलेवालीत्वविधाने अदृष्टार्थत्वप्रसङ्गात् खलेवाली यूपकार्ये विधीयते। ततश्च खादिरादयो बाध्यन्ते। प्रकृतिद्रव्योपादाने प्राप्ते "व्रीहिभिर्यजेतेति नियमविधानात् अप्राप्ते प्रकृतिद्रव्योपादानेऽत्र व्रीह्यादयो न प्राप्यन्ते। ततश्च लोकसिद्धा एव तण्डुला उपादातव्या इति कथमत्र प्रकृतिद्रव्योपादानप्राप्तिरिति चेत्।

उच्येत। प्रकृतौ हि पुरोडाशो हविर्विधीयते। तत्र लोकसिद्धं पुरोडाशमुपादाय यागः कर्तव्यः किं वा किञ्चित् प्रकृतिद्रव्यमुपादाय श्रपणादिना पुरोडाशं कृत्वा तेन यागः कर्तव्यः इत्येवं पर्यालोचनायां श्रपणविधानप्रसङ्गात् किञ्चित् प्रकृतिद्रव्यमुपादाय पुरोडाशं कृत्वा तेन यागः कर्तव्यः इत्यवसीयते। ततः किं तत् प्रकृतिद्रव्यमुपादेयमित्यत्र



"व्रीहिभिर्यजेतेति नियम्यते, ततश्च श्रपणकर्तव्यताबलेन प्रकृतिद्रव्यप्राप्तिः तत्प्राप्तौ च नियम इति। इह तु तण्डुलविधानात् श्रपणमर्थलोपात् निवर्तते। तन्निवृत्तौ च न तद्बलेन प्रकृतिद्रव्यप्राप्तिः तदप्राप्तौ च नियम इति व्रीह्यप्राप्तौ कुतोऽवघातादिप्राप्तिरिति। ततश्च यत्र श्रवणं तत्र व्रीह्यादिप्राप्तिरिति सिद्धमिति।

(टि) चोदकप्राप्तत्वादिति। किञ्च यूपकार्ये खलेवालीविधौ यूपशब्दस्य तत्कार्ये लक्षणा स्यात्। यथा "यजमान प्रस्तर इत्यत्र यजमानशब्दस्य तद्वत्। खलेवालित्वविधौ तु गौणत्वमित्यतोऽपि न खादिरादिबाध इति। अदृष्टार्थत्वेति। अदृष्टकल्पनातो वरं गौण्याश्रिता, तस्या दृष्टत्वादिति भावः॥

॥ खलेवाल्यां तक्षणाद्यननुष्ठानाधिकरणम्॥

सू. परेषां प्रतिषेधःस्यात्॥

(मू) साद्यस्के श्रूयते-"खलेवाली यूपो भवतीति। तत्र खलेवाल्यमेव सशयः-किं छेदनं तक्षणं जोषणं निखननमुच्छ्रयणं च कर्तव्यमुत न कर्तव्यमिति। तत्र शक्यत्वाचोदकानुग्रहाय कर्तव्यमिति प्राप्ते।

ब्रूमः। लुप्तार्थत्वान्न कर्तव्यमिति। तथाहि-न छिन्ना श्लक्ष्णीभूता निखातोच्छ्रिता हि खलेवाली, जोषणं नाम यूपीयवृक्षस्य लक्षणसत्वेन सेव्यत्वनिश्चयः। समजातत्वामशाखाजत्वं बहुपर्णसाखत्वं अप्रतिशुष्काग्रत्वं असुषिरत्वं च यूपीयवृक्षलक्षणं, तच्च जोषणं वृक्षावस्थायामेव कर्तव्यं न विकृतावस्थायाम्। खलेवाली च विकृतेति भ्रष्टावसरत्वान्न कर्तव्यमिति॥

(टि) लुप्तार्थत्वादिति। क्रियमाणमपि तक्षणादिकं न प्रकृतिकार्यं कुर्यात् तत् कथं चोदकानुग्रह इति भावः।

॥ खलेवाल्यां पर्यूहणादिसंस्काराणामनुष्ठानाधिकरणम्॥

सू. अर्थाभावे संस्कारत्वं स्यात्॥

(मू) साद्यस्के श्रूयते-"खलेवाली यूपो भवतीति। तत्र खलेवाल्यामेव

संशयः-यत् "ब्रह्म सबिन्त्वेति मन्त्रेण पांसुभिः पर्यूहणं यच्च "ब्रंह दंहेति मन्त्रेण मैत्रावरुणदण्डेन भ्रमेः समीकरणात्मकं बृंहणं यच्चोन्नम्भयेति मन्त्रेण पांसुभिः पर्यूहणं यच्चापि सम्भवत्प्रयोजनं, यच्चादृष्टार्थमञ्जन प्रोक्षणादि तच्च किं खलेवाल्यां कर्तव्यमुत नेति।

तत्र यूपे खलेवाल्यां यूपकरणासम्भावात् लुप्तार्थं यूपकरणार्थपर्यूहनादि न कर्तव्यमिति प्राप्ते।

ब्रूमः। पर्यूहणादे दृढताभावस्य दृष्टप्रयोजनस्य अञ्जनादेरदृष्टस्य च सम्भवात् अलुप्तार्थं पर्यूहणादि कर्तव्यमिति। नहि यूपो नाम कश्चित् पदार्थोऽस्ति येन यूपकरणासम्भवः स्यात्. किन्तु दृष्टादृष्टासंस्कारगणो यूपशब्दवाच्यः। तत्र येषामर्थलोप छेदनादीनां ते न कर्तव्याः। अलुप्तार्थानां तु पर्यूहणादीनां निवृत्तौ प्रमाणाभावात्ते कर्तव्या इति स्थितम्॥

(टि) प्रसङ्गाद्यूपशब्दवाच्यमाह नहीत्यादिना॥

**॥ पेषणस्य प्राकृतताबोधकत्वं॥**

**॥ महापितृयज्ञे धानास्ववधातानुष्ठानबोधकत्वं पेषणस्य प्राकृतताबोधकत्वमिति मतद्वयसहिताधिकरणम्॥**

**सू. अर्थेन च विपर्यासे तादर्थ्यात्तत्वमेव स्यात्॥**

(मू) अस्ति महापितृयज्ञः-"सोमाय पितृमते पुरोडाशं (अष्टा) षट्कपालं निर्वपति पितृभ्यो बर्हिषद्भ्यो धानाश्च पितृभ्योऽग्निष्वात्तेभ्योऽभि वान्यायै दुग्धे मन्थमिति। तत्र धानासु संशयः-किं धानासु हन्तिः कर्तव्य उत नेति।

अत्र धानात्वाविधानप्रसङ्गान्न कर्तव्य इति प्राप्ते।

ब्रूमः। पूर्वं हन्ति पश्चात् पाक इत्येवं क्रमविपर्यासे धानात्वविधानासम्भवात् तथा हन्तिः कर्तव्या इति।

अथवा न धाना उदाहरणम्। तत्रैव मन्थ उदाहरणम्। मृतवत्साधेनुरभिवान्या। द्रवद्रव्ये प्रक्षिप्य मथिताः सक्तवो मन्थम्। तत्र भर्जितेषु तण्डुलेषु सक्तुसम्पादनाय पेषणमिति। पूर्वं पाकः पश्चात् पेषणम्। प्रकृतौ तु पूर्वं पेषणं पश्चात् पुरोडाशपाकं इति क्रमविपर्यासः। तत्र पेषणे



संशयः। किमिदं पेषणं प्राकृतपेषणादन्यल्लौकिकं पेषणं ततश्चात्र प्राकृता पेषणधर्माश्च कर्तव्या इति।

तत्र पुरोडाशनिर्वर्तक पाकविशेषरूपार्थलोपात् निवृत्तात् प्राकृतपेषणादन्यत् पाकोत्तरकालमर्थप्राप्तं लौकिकमिदं पेषणं ततश्च प्राकृतपेषणधर्माः न कर्तव्या इति प्राप्ते।

ब्रूमः। द्वितीयाश्रुत्यावगतहविरर्थत्वास्य प्राकृतस्य पेषणस्यार्थलोपाभावात् प्राकृतमेव पेषणं क्रियते। इह तु अर्थादेव तत् पश्चात् क्रियत इति क्रममात्रस्यन्यम्। नच क्रमान्यत्वे पदार्थस्यान्यत्वं भवतीति सधमर्मकं पेषणमिति।

अथवा कृष्णलेषु संशयः-किं "घृते श्रपयतीति अपूर्वः पाको विधीयते ततः कृष्णलेषु प्राकृता पाकधार्मा न भवन्ति, अथवा प्राकृतस्य पाकस्य प्रतिप्रसवो विधीयते ततः पाकधर्माः भवन्तीति।

तत्र प्रतिप्रसवविधौ वाक्यभेदादपूर्वः पाको विधीयते ततः कृष्णलेषु पाकधर्मा भवन्तीति प्राप्ते।

ब्रूम। लाघवात् घृतानुवादेन पाकप्रतिप्रसवमात्रं विधीयते। ततः पाकधर्मा भवन्तीति। न वेदमधिकरणान्तरम्॥

**॥ इति षोडशाध्याय्यां दशमाध्यायस्य॥**

**॥ द्वितीयः पादः॥**

(टि) भाष्यकारमतेनाधिकरणमारचयति किं धानास्वित्यादिना। प्रकृतावपि पूर्वं हन्तिः पश्चात् पाक इति न क्रमविपर्यास इति भाष्योदाहरणमनुपपन्नमिति मत्वाचार्यैरन्यदुदाहृतं तद् दर्शयति अथवेत्यादिना अर्थकृते विपर्यासे पेषणस्य तत्कार्यत्वानानन्यथात्वात् भवन्त्येव धर्मा इत्यस्वरसादन्यदुदाहृतमाचार्यैस्तद् दर्शयति अथवेत्यादिना॥

**॥ इति केरलीये षोडशाध्यायीटिप्पणे॥**

**॥ दशमस्याध्यायस्य॥**

॥ द्वितीयः पादः ॥

॥ अथ दशमाध्यायस्य तृतीयः पादः ॥

॥ पश्वादौ सामिधेन्यादि प्राकृतेतिकर्तव्यतानुष्ठानाधिकरणम् ।

सू. विकृतौ शब्दवत्वात् प्रधानस्य गुणानामधिकोत्पत्तिः संनिधानात् ॥

(मू) ज्योतिष्टोमे अग्नीषोमीये पशौ श्रूयते- "एकादश प्रयाजान् यजति एकादशानूयाजान् यजतीति, तथा चातुर्मास्ये "स्वर्गकामो यजेतेति विहितेषु चातुर्मास्येषु श्रूयते-"नव प्रयाजा नवानूयाजा"इति, तथा "वायव्यं श्वेतमालभेत भूतिकाम इति विहिते वायव्ये पशौ श्रूयते "हिरण्यगर्भः समवर्तताग्र इत्याघारमाघारयतीति । एवमन्यत्रापि प्राकृतमङ्गं, अप्राकृतगुणयुक्तं यत्र श्रूयते तदुदाहरणं, अवभृथस्त्वनुदाहरणमित्यप्याकरे स्थितम् ।

तत्र संशयः-किमेतैरेकादशत्वादिगुणविशिष्टप्रयाजादि विधानात् तेन निराकाङ्क्षत्वात् चोदकेन प्राकृतीतिकर्तव्यता न प्राप्यते, अथवा चोदकप्राप्तप्रयाजाद्यनुवादेन एकादशत्वादिगुणमात्रं विधीयते । ततश्च प्राकृतीतिकर्तव्यता चोदकेन प्राप्यत इति ।

तत्र प्रकारमात्रातिदेशात् अनतिदिष्टप्रयाजानुवादेन गुणविधानासम्भवात् तेन निराकाङ्क्षत्वाच्चोदकेन प्राकृतीति कर्तव्यता न प्राप्यत इति प्राप्ते ।

ब्रूमः । प्रकराद्वारा कर्मणामप्यतिदेशप्राप्तत्वात् चोदकप्राप्त प्रयाजाद्यनुवादेन गुणमात्रं विधीयते । ततश्च प्राकृतीतिकर्तव्यता चोदकेन प्राप्यत इति ॥

॥ श्रीः ॥

॥ अथ दशमस्य तृतीयः पादः ॥

(टि) प्रकारमात्रेति । नहि पदार्थाः स्वरूपेणातिदिश्यन्ते येन तदनुवादेन गुणविधिः स्यादिति भावः गुणविशिष्टेति । एवं च धात्वर्थविधानात् श्रुत्यनुग्रह इत्यपरमप्यनुकूलमिति द्रष्टव्यम् । निराकाङ्क्षत्वादिति । प्रयाजादयः प्रकृतौ क्लृप्तोपकारा विकृतौ श्रूयमाणा गृहमेधीयाज्यभागवदित्थम्भावाकाङ्क्षां पूरयन्तोऽतिदेशं निरुन्धन्तीति भावः । गुणमात्रमिति । नहि सत्यां गतौ



विशिष्टविधिगौरवं न्याय्यम् । वाक्यार्थविधिदोषश्चोभयोः समानः श्रुत्यर्थविधिलिप्सया धात्वर्थविधानमङ्गीकुर्वताप्यप्राप्तगुणश्रवणस्याप्रमाद पाठाद् गुणस्यापि विधानमभ्युपगन्तव्यमिति । ततश्च गुणसङ्क्रान्तशक्तिकोऽयं विधिर्विहिष्टविधिगौरवपरिजिहीर्षया धात्वर्थस्य कथञ्चिदन्यतः प्राप्तिमपेक्षमाणश्चोदकेन प्रकारप्राप्तिद्वारा प्राप्यमाणं धात्वर्थं स्वप्रकृतिनानूद्य गुणमात्रं विधत्त इति भावः ॥

॥ हिरण्यगर्भमन्त्रस्योत्तराघारगुणताधिकरणम् ॥

सू. हिरण्यगर्भः पूर्वस्य मन्त्रलिङ्गात् ॥

(मू) अस्ति वायव्यः पशुः-"वायव्यं श्वेतमालभेत भूतिकाम इति । तत्र वायव्ये पशौ श्रूयते-"हिरण्यगर्भः समवर्तताग्र इत्याधारमाधारयतीति । तत्र प्राकृताधारानुवादेन मन्त्ररूपगुणविधिरिति स्थितम् । प्रकृतौ द्वावाघारौ प्राजापत्योऽमन्त्रकः प्रथमः द्वितीयस्त्वैन्द्रः समन्त्रकः । एवं स्थिते संशयः- किं पूर्वस्मिन्नाघारे अयं मन्त्ररूपगुणविधिः उतोत्तरस्मिन्निति ।

तत्र हिरण्यगर्भरूपप्रजापतिलिङ्गत्वात् पूर्वस्मिन्निति प्राप्ते ।

ब्रूमः । उत्तरस्मिन् मन्त्रकार्यस्यादृष्टस्य क्लृप्तत्वात् तत्रैव मन्त्रविधिः न तु कल्प्यादृष्टे पूर्वस्मिन्निति । मन्त्रलिङ्गं त्विन्द्रेऽप्युपपन्नम् । "यो ह वै खलुवाव प्रजापतिः स उ वावेन्द्र इति बोध्यम् ॥

(टि) हिरण्यगर्भरूपेति । "प्रजापतिर्वै हिरण्यगर्भः प्रजापतेरनुपरूपत्वायेति वाक्यशेषाद्धिरण्यगर्भशब्दस्य प्रजायतिलिङ्गत्वमवसीयत इति भावः । भाष्ये त्वेक इत्यस्य लिङ्गत्वमुक्तमिति । उपपत्तिमेवाह यो ह वा इति । वाक्यशेषोऽपि प्रजानां पतिः प्रजापतिरिति इन्द्र एवोपपन्न इति ध्येयम् ॥

॥ चातुर्मास्येषु सोमेष्वासादन नियोजनयोः प्राकृतगुणविधित्वाधिकरणम् ॥

सू. संस्कारे तु क्रियान्तरं तस्य विधायकत्वात् ॥

(मू) सन्ति चातुर्मास्याः सोमाः । तत्र श्रूयते-"उत्करे वशजिनमासादयति परिधौ पशून्नियुञ्जन्तीति । तत्र संशयः किमप्राकृतमासादनान्तरं

नियोजनान्तरं च अदृष्टार्थमुत्करविशिष्टं परिधिविशिष्टं च विधीयते उत प्राकृतयोरेव दृष्टार्थयोरासादननियोजनयोः उत्कररूपपरिधिरूपौ गुणौ विधीयेते इति।

तत्र धात्वर्थविधिसम्भवादासादनान्तरमुत्करविशिष्टं नियोजनान्तरं परिधिविशिष्टं चादृष्टार्थं विधीयत इति प्राप्ते।

ब्रूमः। गुणमात्रविधानसम्भवे विशिष्टविधानस्यान्याय्य त्वात् प्राकृतयोरेव दृष्टार्थयोर्गुणौ विधीयेते इति॥

(टि) धात्वर्थेति। किञ्चोत्करस्य तीक्ष्णाग्रत्वात्तुङ्गत्वाच्च परिधेश्चानुशयत्वाद् दृष्टाकार्यमासादनं नियोजनं च न शक्यं कर्तुमित्यपि द्रष्टव्यम्। न चाशक्यता पृथ्वग्रतामुत्करसय स्थविमानं च परिधेरापाद्य प्राकृतकार्यसम्पानादिति भावः।

**॥ अग्निचयने प्राकृतवैकृतेभय दीक्षाहुतीनामनुष्ठानाधिकरणम्॥**

**सू. षड्भिर्दीक्षयतीति तासां मन्त्रविकारः श्रुतिसंयोगात्॥**

(मू) अस्त्यग्निः-"य एवं विद्वानग्निं चिनुत इति। तत्राग्नौ प्रकृतितो दीक्षाहुतयः षट प्राप्ताः। तासां षट् मन्त्राश्च प्रकृतित एव प्राप्ताः "आकूत्यै प्रयूजेऽग्नये स्वाहा मेधायै मनसेऽग्नये स्वाहा दीक्षायै तपसेऽग्नये स्वाहा सरस्वत्यै पूष्णेऽग्नये स्वाहापो देवीर्बृहतीर्विश्वशम्भुवो द्यावापृथिवी उर्वन्तरिक्षं बृहस्पनितर्नो हविषा वृधेम स्वाहाविश्वे देवस्य नेतुर्मर्तो वृणीत सख्यं विश्वे राय इषुध्यसि द्युम्नं वृणीत पुष्यसे स्वाहेत्येताः अग्नौ चापरे षट्मन्त्रः। ते च दीक्षार्थतया विनियुक्ताः। "षड्भिर्दीक्षयतीति दीक्षाहुतीनां चाभ्यासः श्रूयते "द्वादशजुहोतीति। तत्र संशयः-किं वैकृतैर्मन्त्रैः प्राकृता बाध्यन्ते उत समुचीयन्त इति।

तत्र कार्यैक्यात् प्रत्यक्षश्रुतैः प्रत्यक्षवचनविहितैः वैकृतैर्मन्त्रैश्चोदकप्राप्ताः प्राकृता मन्त्रा बाध्यन्त इति प्राप्ते।

ब्रूमः। "द्वादश जुहोतीति वचनलब्धाभ्यासवशेन होमानां द्वादशत्वात् वैकृतैः षड्भिर्मन्त्रैः प्राकृता षट् मन्त्राः समुचीयन्त इति। अत्र "षड्भिः



दीक्षयतीति दीक्षाङ्गत्वं श्रुतं न होमाङ्गत्वम्। तच्च स्वाहाकारलिङ्गात् मन्त्राणां दीक्षाङ्गत्वसिद्धये द्वारनिर्वाहार्थं कल्प्यते। ततश्च वैकृतानामपि होमाङ्गत्वे प्रत्यक्षवचनाभावात् तुल्यबलत्वान्न प्राकृतबाधकत्वं नापि विकल्पः होमानां द्वादशत्वात्। अतः समुच्च इति बोध्यम्।

(टि) बाध्यन्त इति। ततश्च वैकृतानामैव होमाङ्गत्वात्तैरेवाभ्यस्तैर्द्वादशापि होतव्या इति भावः। नच होमाङ्गत्वंमन्त्राणां किन्तु दीक्षाङ्गत्वम्। तच्च सकृत्प्रयुक्तेषु सिध्यतीति नाभ्यासेन प्राकृतबाधे प्रामाण्यमस्तीत्याशयेनाह द्वादशेत्यादिना।

**॥ पुनराधानेऽग्न्याधानदक्षिणानां निवृत्त्यधिकरणम्॥**

**सू. अग्न्याधानस्य नैमित्तिके गुणविकारे दक्षिणादानमधिकं स्याद्वाक्यसंयोगात्॥**

(मू) अस्ति पुनराधेयः "भाग्ययशः श्रीकामानां पुनरादधीत योऽग्नीनाधाय भाग्यज्यानिं पुत्रज्यानिं वा जीयते स पुनरादधीतेति। स काम्यो नैमित्तिको वाग्न्याधेयस्य गुणविकारः। तत्र श्रूयते-"पुननिष्कृतो रथो दक्षिणा पुनरुत्स्यूतं वासः पुनरुत्सृष्टोऽनड्वानि-ति। तथाधाने दक्षिणाः श्रूयन्ते- "एका देया षट-देयाः द्वादश देयाः चतुर्विंशतिर्देयाः षष्टिर्देयाः शतं देयं सहस्रं देयं अपरिमितं देयमिति।

तत्र संशयः-किमत्र प्राकृतीनामग्न्याधेयदक्षिणानां समुच्चय उत निवृत्तिरिति।

तत्र एककार्यत्वे सत्यपि "उभयीर्ददातीति समुचय उत निवृत्तिरिति।

तत्र एककार्यत्वे सत्यपि "उभयीर्ददातीति समुचयवचनात् समुचय इति प्राप्ते।

ब्रूमः। "उभयीर्ददातीति श्रुत्या श्रुतविधिशब्दस्य विध्यन्तरवाक्यशेषभूतस्य समुचयविधानासामर्थ्यात् दुर्बलानां प्राकृतीनां अग्न्याधेयदक्षिणानां निवृत्तिरिति॥

(टि) अथापादसमाप्तेर्दक्षिणाविचारः। निवृत्तिरिति। उभयीर्ददातीति निर्देशः कथमिति चेदुच्यते, अग्न्याधेयं हि कृत्वा पुनराधेयः क्रियते। तेन

पूर्वदत्तसम्प्रदीयमानापेक्षयेति॥

**॥ आग्रयणे वासोवत्साभ्यामन्वाहार्यस्य निवृत्त्यधिकरणम्॥**

**सू. वासो वत्सं च सामान्यात्॥**

(मू) "आग्रयणं भवति हुताद्यजमानस्यापराभावाय नवानामैन्द्राग्नः पुराणानामाग्नेयः सौम्यः श्यामाकः वैश्वदेवः पयसि चरुः द्यावापृथिव्य एककपाल इति। तत्राग्रयणे श्रूयते-"वासो दक्षिणा वासः प्रथमजो दक्षिणेति। अस्ति च प्रकृतौ-"अन्वाहार्यो दक्षिणेति। सोऽन्वाहार्य इह चोदकेन प्राप्यते।

तत्र संशयः-किं वासो वत्सं प्राकृतस्यान्वाहार्यस्य निवर्तकमुतानिवर्तकमिति।

तत्र विरोधाभावादनिवर्तकमिति प्राप्ते, कार्यसामान्यान्निवर्तकमिति। उत्तरविवक्षार्थमिदम्॥

(टि) पौनरुक्त्यमाशङ्क्याह - उत्तरविवक्षार्थमिति॥

**॥ आग्रयणे वासोवत्सयोरन्वाहार्य धर्मानुष्ठानाधिकरणम्॥**

**सू. अर्थापत्तेस्तद्धर्मा स्यान्निमित्ताख्याभिसंयोगात्॥**

(मू) आग्रयणे श्रूयते-"वासो दक्षिणा वासः प्रथमजो दक्षिणेति। तत्रैव संशयः-किं वाससि वत्से चान्वाहार्यधर्माः सम्प्रैषादयः कर्तव्या उत नेति। तत्रान्वाहार्यनिबन्धनत्वान्न कर्तव्या इति प्राप्ते।

ब्रूमः। वाससो वत्सस्य चान्वाहार्यकार्यापत्तेः कर्तव्या इति। इदमप्युत्तरविवक्षार्थम्॥

(टि) इदमप्यधिकरणं पूर्ववदेवेत्याह-इदमिति॥

**॥ आग्रयणे वाससि पाकाभावाधिकरणम्॥**

**सू. दाने पाकोऽर्थलक्षणः॥**

(मू) आग्रयणे श्रूयते-"वत्सः प्रथमजो दक्षिणेति। तत्रान्वाहार्यधर्माः कर्तव्या इति समधिगतम्। तत्र संशयःकिं वत्सस्यान्वाहार्यधर्मः पाकः कर्तव्य उत नेति। तत्र शक्यत्वाच्चोदकानुग्रहाय कर्तव्य इति प्राप्ते।



ब्रूमः। वत्से पक्त्वा दीयमाने श्रुतवत्सदानहानाश्रुतमांसदानप्रसङ्गात् न पाको वत्सस्य कर्तव्य इति॥

**॥आग्रयणे वाससि पाकाभावाधिकरणम्॥**

**सू. पाकस्य चान्नकारित्वात्॥**

(मू) आग्रयणे श्रूयते - "वासो दक्षिणे"ति। तत्राप्यन्वाहार्य धर्माः कर्तव्या इति समधिगतम्। तत्रापि संशयः-किं वाससि पाकः कर्तव्यो वा न वे ति।

तत्र श्रुतहानाश्रुतापत्तिरूपविरोधाभावात् कर्तव्य इति प्राप्ते।

ब्रूमः। अन्नसम्पत्तिरूपपाकप्रयोजनाभावात् वाससि न पाकः कर्तव्य इति॥

(टि) अन्नसम्पत्तीति। अनेन पाकस्य प्रकृतौ दृष्टार्थत्वमप्युक्तम्॥

**॥ आग्रयणे वासोवत्सयोरभिघारणाभावाधिकरणम्॥**

**सू. तथाभिघारणस्य॥**

(मू) आग्रयणे श्रूयते-"वासो दक्षिणा वासः (वत्सः) प्रथमजो दक्षिणेति। तत्रान्वाहार्यधर्माः कर्तव्या इति समधिगतम्। तत्र संशयः-किं वासोवत्सेऽभिघारणं कर्तव्यमुत नेति। तत्राविरोधात् कर्तव्यमिति प्राप्ते। ब्रूमः। स्वादिमसम्पत्तिरूपाभिघारणदृष्टप्रयोजनाभावाद् वासोवत्से नाभिघारणं कर्तव्यमिति॥

(टि) स्वादिमेति। अनेनादृष्टार्थत्वं वारितम्॥

**॥ ज्योतिष्टामे गमामेव द्वादशशतस्य दक्षिणत्वाधिकरणम्।**

**सू. द्रव्यसंनिधौ सङ्ख्या तेषां गुणत्वात् स्यात्।**

(मू) ज्योतिष्टोमे श्रूयते-"गौश्चाश्वश्चाश्वतरश्च गर्दभश्चाजाश्चावयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च तस्य द्वादशशतं दक्षिणेति। तत्र संशयः-किमेकैस्य गवादिद्रव्यस्य द्वादशशतसङ्ख्या उत एकस्य, यदैकस्य तदा नियमो यस्य कस्यचित् अथवा माषाणां किं वा सर्वसम्पादनीया द्वादशशतसङ्ख्या आहोस्वित् एकजातीयस्य यदा एकजातीयस्य तदा नियमः यस्यकस्यचित्। उत पशूनां यदा पशूनां तदापि

किमनियमः येषां केषांचित् आहो गवामिति।

तत्र तस्येति षष्ठ्यन्तेन गवादिद्रव्याणि प्रधानत्वेनोद्दिश्य गवादिद्रव (व्य) गुणत्वेन विधीयमानाया द्वादशसङ्ख्यायाः प्रतिप्रधानमावृत्तत्सम्भवात् एकैकस्य गवादिद्रव्यस्य द्वादशसङ्ख्येति चेत्। उच्यते। वाक्यभेदपरिहाराय गवादिद्रव्यद्वादशसङ्ख्योभयविशिष्टदक्षिणाविधानात् द्वादशशतसङ्ख्या विशिष्ट दक्षिणानुष्ठानसिध्यर्थमेकस्य द्वादशशतसङ्ख्या, तत्राविशेषादनियम इति। अत्रोच्यते। आनान्तर्यात् माषाणामिति। अत्र वदामः। द्रव्यसंख्योभयविशिष्टदक्षिणाविधाने दक्षिणापरिच्छेदिकायाः सङ्ख्यायाः सर्वेषु सहितेषु निर्वेष्टुं युक्तत्वात् सर्वसम्पादनीया सङ्ख्येति। अत्राभिधीयते। तस्येति द्रव्यपरामर्शकस्य एकवचनत्वादेकजातीयस्य तत्रापि विशेषाभावादनियम इति।

अत्र ब्रूमः। मेयानां व्रीह्यादीनां आढकादिपरिमाणान्तरापेक्षसङ्ख्याव्यवहारयोग्यानां स्वरूपतो भृतित्वभावात् अजानामवीनां च बहुवचननिर्दिष्टत्वात् अश्वादीनां च "न केसरिणो ददातीति प्रतिषिद्धत्वात् परिशेषान्मुख्यत्वान्महोपकारत्वाच्च तद्वत्तेन गौः परामृश्यत इति॥

(टि) प्रसङ्गादिदमारभ्यते उपोद्घातत्वेन वा। न ह्येकेन वाक्येन गवादीनां दक्षिणात्वेन विधानं तदङ्गत्वेन च सङ्ख्याविधानं सम्भवतीत्याशयेनाह-वाक्यभेदेति। द्रव्यसङ्ख्योभयविशिष्टेति। अयमाशयः-यद्यपि माषाणामानन्तर्यं तथापि न तस्येति प्रतिनिर्देष्टुं शक्यन्ते, बहुत्वाज्ज्ञातावेकवचनमिति चेन्न चशब्दश्रुत्यात्यान्यसहितानां माषाणां निर्दिष्टत्वेन बहुत्वात्। तथा च तस्येति क्रतुनिर्देशोऽङ्गीकर्तव्यः। गवादिसमाहाराभिप्रायं वैकवचनम्। तत्र क्रतुनिर्देशपक्षे यद्यपि चशब्दो न स्यात् तथापि दक्षिणाश्रुत्या गवादिविशिष्टा द्वादशशतसङ्ख्याविशिष्टा च सहितान्येव गवादीनी, दक्षिणा नैकैकम्। एकवचनं समाहाराभिप्रायमिति पक्षे तु सहितानां दक्षिणात्वमिति स्पष्टमेवेति। द्रव्यपरामर्शकस्येति। नहि तस्य (च्छ) शब्देन क्रतुः परामृश्यते। तथा सति स्ववाक्यगतेन द्रव्येण



क्रतुः परामृश्यते। तथा सति स्ववाक्यगतेन द्रव्येण सम्बन्धस्य प्रवृत्तिविशेषकरसमर्थस्य लभ्यमानस्य त्यागः प्रकृतेन क्रतुना प्रवृत्तिविशेषकरत्वाभावेनानर्थकस्य सम्बन्धस्य स्वीकारश्च स्यात्। तदुभयमप्यनुपपन्नम्। नापि समाहाराभिप्रायं कल्पयितुं युक्तं तस्याशाब्दत्वात्। तस्मात् द्रव्यमेव तस्यशब्देन परामृश्यत इत्यभिप्रायः। गौः परामृश्यत इति। गवादीनि द्रव्याणि तस्य च गौर्द्वादशशतं दक्षिणेति वाक्यार्थ इति भावः॥

## ॥ विभज्य गोदक्षिणाया दानाधिकरणम्॥

### सू. तस्य दानं विभागेन प्रदानानां पृथक्त्वात्॥

(मू) ज्योतिष्टोमे श्रूयते-"गौश्चाश्वश्चाश्वतरश्च गर्दभश्च अजाश्चावयश्च व्रीहयश्च तिलाश्च माषाश्च तस्य द्वादशशतं दक्षिणेति। तत्र गवां द्वादशशतं दक्षिणेति समधिगतम्। तत्र संशयः-किमेषा दक्षिण विभज्याविभज्य वा दातव्या किं वा विभज्यैव उत विभज्यैवेति।

तत्र विशेषाश्रवणात् विभज्य वाविभज्य वेति अनियम इति चेत्। उच्यते। "ऋत्विग्भ्यो दक्षिणां ददातीति दानाङ्गत्वेन ऋत्विग्बहुत्वस्य विवक्षितत्वात् अविभज्येत्येवं प्राप्ते।

ब्रूमः। "अग्नीधे ददातीत्यादिभिर्विभज्य दानस्य दर्शितत्वात् विभज्यैव दातव्येती॥

(टि) इदमप्युत्तरविवक्षार्थमधिकरणम्। दर्शितत्वादिति। किञ्च दानस्यर्त्विगानत्यर्थत्वाच्चतुर्थ्या प्राधान्यभिधानाच्चर्त्विजां प्राधान्यं प्रतिप्रधानं चावृत्तेरेकैकस्येदं दानं न चानियमः। आनत्यर्थं हीदं दानं, दीयमाने च द्रव्य उपभोगक्षमे सत्येवानतिर्भवति नान्यथा। अत आत्मीयं द्रव्यमृत्विजामुपयोगक्षमं कुर्यादिति दानविधेरर्थः। विभक्तं च ददता सम्पूर्णमिदमनुष्ठितं भवति। नान्यथा। विभागापेक्षत्वात्तेषामुपभोगस्य। किञ्च तुथो वो विश्ववेदा विभजत्विति मन्त्रवर्णाच्छागन्योयेना विभागस्सिद्धयति। यत्र त्वेकमेव द्रव्य दक्षिणा तत्रासम्भवादविभज्य दानमिति।

॥ ज्योतिष्टोमे समख्यानुसारेण दक्षिणाविभागाधिकरणम्॥

सू. समं स्यादश्रुतत्वात् ॥

(मू) ज्योतिष्टोमे श्रूयते-"गौश्चाश्वश्चाश्वतरश्च गर्दभाश्चाजाश्चावयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च तस्य द्वादशशतं दक्षिणेति। तत्र विभज्य दातव्यमिति समधिगतम्। तत्र संशयः-किं समो विभाग उत प्रयासानुरूपः अथवा समाख्यानरूप इति। तत्र विशेषाश्रवणात् समो विभागः स्यादिति चेत् उच्यते लौकिकन्यायात् प्रयासानुरूप इतीति प्राप्ते।

ब्रूमः। द्वादशाहदीक्षाक्रमवाक्यगताध्वर्व्वा (ध्वर्या) दिसमाख्यानात् समाख्यानुरूपो विभाग इति।

(टि) प्रसक्तानुप्रसक्तं पूर्वोक्तविभागोपोद्बलकं चेदमारभ्यते किं सम इत्यादिना॥

॥ भूनाम्नि धेनुदानेन निखिलदक्षिणाबाधाधिकरणम्॥

सू. तस्य धेनुरिति गवां प्रकृतौ विभक्तचोदितत्वात् सामान्यात्तद्विकारः स्याद्यथेष्टिर्गुणशब्देन॥

(मू) अस्ति भूर्नामैकाहः-"अथैष भूदेवस्त्रिवृदेव सवः तस्य विश्ववत्यस्स्तोत्रिया इति। तत्र श्रूयते-धेनुर्दक्षिणेति। तत्र संशयः-किं प्रकृतौ गवादीनां प्रत्येकं दक्षिणात्वात् गोर्लिङ्गेन धेनुत्वेन धेनुर्गवामेव निवर्तिका उत सहितानां दक्षिणात्वात् कृत्स्नस्य गवाश्वादेर्निवर्ति केति।

तत्र दक्षिणाशब्दस्य प्रत्येकं सम्बन्धात् प्रत्येकं दक्षिणात्वात् गोर्लिङ्गेन धेनुत्वेन धेनुर्गवामेव निवर्तिकेति प्राप्ते।

ब्रूमः। गवादीनां चशब्दोक्तसमुच्चयविशेषितानां दक्षिणासम्बन्धात् सहितानां दक्षिणात्वात् कृत्स्नस्य गवाश्वादेः निवर्तिका धेनुरिति॥

(टि) इदानीं दक्षिणाबाधाबाधौ चिन्त्येते-प्रत्येकं सम्बन्धादिति। अयं भावः-गवादिशब्दा जातिशब्दा, दक्षिणाशब्दस्तु गुणवचनः। भूतित्वगुणेन वर्तनाज्जातिगुणयोश्च जातिर्विशेष्यत्वेन गुणस्तु विशेषणत्वेनेति प्रसिद्धं नीलमुत्पलमित्यादिषु। यच्च विशेष्यं तत् प्रधानम्। अतो गवादीनां विशेष्यतेवेन प्राधान्याद् गुणभूता दक्षिणा प्रत्येकं तैः सम्बध्यते। गवादयो



दक्षिणारूपाः कार्या इतीति। चशब्दोक्तेति। किञ्चात्र चशब्दाभावेऽपि न प्रत्येकं दक्षिणासम्बन्धः। तथाहि-यदि दक्षिणाशब्दो गुणवचनो गवादीनां विशेषणं स्यात् तदा गुणस्य द्रव्योपसर्जनत्वात् गुणवचनानामाश्रयतो लिङ्गवचनानीति स्मरणात् प्रधानभूतानां द्रव्याणां गवादीनामाश्रयभूतानां बहुत्वाच्च दक्षिणाशब्दो दक्षिणाशब्दो बहुवचनान्तः स्यात्। स्वप्राधान्ये त्वानतिकरस्यैकत्वाद्युक्तमेकवचनम्। गवादीनि तु तद्विशेषणानि। नहि विशेषणवशेन विशेष्ये लिङ्गसंख्यं भवति यथाग्नीषोमौ देवतेति। तस्माद् दक्षिणाशब्दस्यैकवचनान्तत्वेन गवादिविशेषणत्वाभावाद्विशेष्यत्वेन प्राधान्यान्न गुणभूतैः गवादिभिः प्रत्येकं सम्बन्ध इति। किञ्च गवादीनां प्राधान्ये दानमदृष्टार्थं स्यात्। तस्मादनेकगवाद्यात्मिकैकैव दक्षिणा विधीयते। गवादिरूपया भृत्या दृष्टं प्रयोजन मृत्विगानमनं कर्तव्यमिति। सहितानां दक्षिणात्वादिति। प्रकृताविति शेषः॥

॥ "एकां गामित्यनेन गोगतसङ्ख्याबाधाधिकरणम्॥

सू. एकां पञ्चेति धेनुवत्॥

(मू) "यस्य सोममव (प) हरेयुरेकां गां दक्षिणां दद्यादभिदग्धे पञ्च गा इति श्रूयते। तत्र संशयः-किमेका पञ्च च श्रूयमाणा गावः एकां दद्यात् पञ्च दद्यादिति सङ्ख्ययोर्ददाति क्रियान्वयात् कृत्स्नस्य गवादिदाक्षिण्यस्य निवर्तिका उत किं एकां गां पञ्च गाव इति सम्बन्धात् गवां निवर्तिका इति।

तत्र द्वितीयाश्रुतिसामर्थ्यात् ददातिक्रिययान्वयात् कृत्स्नस्य दाक्षिण्यस्य निवर्तिका इति स्थितेऽन्तराचिन्ता॥

(टि) अत्र "त्रिवसेति सूत्रद्वयं न्यायान्तरं सम्भवन्न तिरोधातव्यमित्यभिप्रेत्य अन्तरागर्भिणीत्वेन व्याख्याय पुनस्सूत्रवाक्यभेदो मा भूदिति लिङ्गत्वेन व्याख्यातं भाष्यकारेण। तत्राद्यपक्षं दर्शयति-स्थितेऽन्तरेत्यादिना॥

॥ साद्यस्के त्रिवत्सेन सोमक्रयसाधनमात्रबाधाधिकरणम्॥

सू. त्रिवत्सश्च।

(मू) अस्ति साद्यस्क्रेयार्थः वत्सः "त्रिवत्सः साण्डस्सोमक्रयणः

स्पर्धमानानामिति। सन्ति तु प्रकृतौ सोमक्रयार्थानि द्रव्याणि-"अजया क्रीणाति हिरण्येन क्रीणाति ऋणभेन क्रीणाति अश्वशफेन क्रीणाति "इत्येवमादीनि। तानि चात्र क्रीणाति ऋषभेन क्रीणाति अश्वशफेन क्रीणाति "इत्येवमादीनि। तानि चात्र चोदकप्राप्तानि तत्र वर्षत्रये पेतः पुंगवः त्रिवत्सः साण्ड इति। तत्र संशयः-किमयं त्रिवत्सः यः साण्डः स त्रिवत्स इति साण्डानुवादेन पुङ्गवे त्रिवत्सस्य वयंसो विधानात् पुंगवस्य ऋषभस्य निवर्तक उत यः सोमक्रयणः स त्रिवत्स इति सोमक्रयानुवादेन। तत्र एकपदोपात्तयोः त्रिवत्सत्वरूपवयोविशिष्ट द्रव्यपुंलिङ्गयोर्विधानात् सर्वेषां क्रयार्थानां द्रव्याणां निवर्तक इति।

तत्र पुंगवत्व सामान्याच्चोदकप्राप्तर्षभपुङ्गवसाण्डानुवादेन पुंगवे वयोविधानात् पुंगवस्य ऋषभस्य निवर्तक इति प्राप्ते।

ब्रूमः। क्रियासम्बन्धलाभात् सोमक्रयणानुवादेन विशिष्टद्रव्यलिङ्गयोर्विधानात् सर्वेषां निवर्तकम्। साण्डशब्दस्तु नित्यानुवाद इति। नेदमधिकरणान्तरमिति पक्षान्तरं किन्तु पूर्वपक्षे लिङ्गमिति॥

स्थितादुत्तरम्। एकत्वपञ्चत्वसंख्ययोर्ददातिक्रियान्वये सति गोशब्दस्य पाक्षिकानुवादत्वप्रसङ्गात् सङ्ख्ययोर्गोसम्बन्धात् गवामेव निवर्तिका इति। अत्र वाक्यलक्षणगोसङ्ख्यासम्बन्धविधानात् द्वादशशतसङ्ख्या-सम्बद्धगोनिवृत्तिरिति बोध्यम्॥

(टि) पूर्वपक्षलिङ्गमिति। यथा त्रिवत्सस्सर्वक्रयद्रव्यनि वर्तकस्तथा गौरपि सर्वदाक्षिण्यनिवर्तिकेति प्रदर्शनार्धमित्यर्थः। एकत्वपञ्चत्वे-त्यादेरयमाशयः-यदि चोदकप्राप्तेषु बहुष्वेकां दद्यादिति विधीयेत तदा किं तदेकामिति विवक्षायामनिर्देशाद् गवादिषु यत्किञ्चिदिति स्यात्। ततश्च गामित्यश्वादीनामुपलक्षणार्थं स्यात् अथवा पाक्षिकानुवादः। तदुभयमप्यन्याय्यम्। अथ तत्परिजिहीर्षया एकां दद्यात्तां च गामिति विधीयेत तदा तस्यां द्वादशशतसङ्ख्या चोदकप्राप्तेति एकपञ्च शब्दावनर्थकौ स्याताम्। विधाने च वाक्यभेदः। अथ गां दद्यादिति



विवक्षितैकसङ्ख्या गौर्विधीयेत धेनुवत्। तदा एकशब्दस्यानुवादत्वादानर्थक्यं, पञ्चशब्दस्त्वनुपपन्न एव स्यात्। तस्माच्छब्दानर्थक्य परिजिहीर्षया श्रुतिलक्षणमपि क्रियासम्बन्धं परित्यज्य वाक्यलक्षणो गोसङ्ख्यासम्बन्ध एवं विधीयत इत्यभ्युपगन्तव्यमिति। अत्रोक्तेषु दोषेषु पाक्षिकानुवादत्वमेव न्यूनदोषमिति तदेव पूर्वपक्षिणोऽभिमतमित्याशयेन तदुपन्यस्तमिति द्रष्टव्यम्। यदुक्तं वाक्यलक्षणविधानमिति तदेव दर्शयति-अत्रेत्यादिना॥ यत्तु त्रिवत्सवदिति तन्न। तत्र साण्डानुवादेन त्रिवत्सत्वविधावग्नीषोमीयादावतिप्रसङ्गात् क्रय एव त्रिवत्सो विधीयत इति वैषम्यादिति॥

## ॥ अश्वमेधे प्राकाशेनाध्वर्युभागबाधाधिकरणम्॥

### सू. प्राकाशौ तथेति चेत्॥

(मू) अश्वमेधे श्रूयते-"हिरण्मयौ प्राकाशावध्वर्यवे ददातीति। प्राकाशो दीपस्तम्भो दर्पणो वा। तत्र संशयः-किं प्राकाशौ कृत्स्नस्य क्रतुदाक्षिण्यस्य निवतकौ प्राकाशौ ददातीति सम्बन्धात् उत प्राकाशावध्वर्यव इति सम्बन्धादध्वर्युभागस्य निवर्तकाविति। तत्र कृत्स्नस्य निवर्तकौ द्वितीयाश्रुतिसामर्थ्यात् प्राकाशौ ददातीति ददातिक्रियासम्बन्धात् इति प्राप्ते।

ब्रूमः। अध्वर्युशब्दानर्थक्यभयात् प्राकाशावध्वर्यव इति सम्बन्धात् अध्वर्युभागस्य निवर्तकौ प्राकाशाविति। अत्र प्राकाशयोरध्वर्युणा सम्बन्धे अध्वर्योः सम्प्रदानत्वात् न तद्वाचकादध्वर्युशब्दात् षष्ठीति॥

(टि) दि्वतीयाश्रुतीति। अत एवाव्यवहितान्वयो बाध्यते। अध्वर्युशब्दश्चाध्वर युनक्तीति कथञ्चिद्वृत्विग्परतयाव्याख्येय इति भावः। प्राकाशावध्यर्यव इति। क्रियान्वयनिमित्तो यः पश्चात्तनः सम्प्रदानस्याध्वर्योः सम्प्रदेययोश्च प्राकाशयोः मिथः सम्बन्धः सोऽत्र विधीयत इत्यर्थः। अथवा पूर्वमेवाध्वर्युप्राकाशविशिष्टं दानं विधीयते तेन चाध्वर्य्वानितिसिद्धेर्लुप्तार्थत्वात्तद्भागनिवृत्तिरिति न कृत्स्ननिवृत्तिरिति॥

॥ उपहव्ये श्यावाश्वेनाखिलदक्षिणाबाधाधिकरणम् ॥

**सू. धेनुवच्चाश्वदक्षिणा स ब्रह्मण इति पुरुषापनयो यथा हिरण्यस्य ॥**

(मू) उपहव्यो निरुक्तः तेनाभिवास्यमानं याजयेत्। अग्निष्टोमो यज्ञः पञ्चदशस्तोमो रथन्तरसामाश्वः श्वेतो दक्षिणाउपहव्यो निरुक्तस्तेनाभिशस्यमानं याजयेत् उक्थ्यो यज्ञस्सप्तदशस्तोमो बृहत्पृष्ठोऽश्वश्यावो रुक्मललाटो भ द्क्षिणएत्युपहव्यमेकाहं तस्य दक्षिणां च विधाय श्रूयते "स ह्यनिरुक्तः स ब्रह्मणे देय इति।

तत्र संशयः-किमयमश्वो ब्रह्मभागस्य निवर्तकः उत कृत्स्नस्य क्रतुदाक्षिण्यस्येति।

तत्र "स ब्रह्मणे देय इति वचनात् ब्रह्मभागस्य निवर्तकः यथा प्राकाशावध्वर्युभागस्य तथेति प्राप्ते,

ब्रूमः। अस्मिन् क्रतावश्वो दक्षिणा अश्वेनानतिः कायमित्येवमानत्यर्थतयाश्वस्य विधानात् आनत्यर्थकतया चोदकप्राप्तस्य कृत्स्नस्य क्रतुदाक्षिण्यस्य निवर्तकोऽश्वो धेनुवत्। "स ब्रह्मणे देय इत्युत्तरवाक्येन तु पुरुषान्तरेभ्योऽपनयः क्रियत इति। तस्मात् पुरुषान्तराणां न दक्षिणेति स्थितम्॥

(टि) स्थितमिति। प्रकारान्तरेण तेषामानतिः कर्तव्येति भानः॥

॥ सोमचमसेन कृत्स्नदक्षिणापुरुषान्तरयोर्बाधाधिकरणम् ॥

**सू. तथा च सोमचमसः ॥**

(मू) ऋतपेये श्रूयते-"औदुम्बरः सोमचमसो दक्षिणा सप्रियाय सगोत्राय सब्रह्मणे देय इति। तत्र संशयः किमयं सोमचमसो ब्रह्मभागस्य निवर्तकः उत कृत्स्नस्य क्रतुदाक्षिण्यस्येति।

तत्र "सब्रह्मणे देय इति वचनात् ब्रह्मभागस्य निवर्तक इति प्राप्ते।

ब्रूमः। पूर्वन्यायात् कृत्स्नस्य निवर्तक इति।

अत्र पशुदानादिप्रतिषेधः श्रूयते। स चासत्यां प्राप्तौ न सम्भवतीति



कृत्स्ननिवर्तकत्वमित्याशङ्कानिरासार्थमिदमधिकरणम्। सोमचमसस्तुत्यर्थोऽर्थवाद इति॥

ऋतपेये श्रूयते-"औदुम्बरः सोमचमसो दक्षिणा सप्रियाय सगोत्राय ब्रह्मणे देय इति। तत्र सोमचमसो ब्रह्मणे देय इत्येकं वाक्यमिति कृत्वा चिन्त्यते। तत्र संशयः-किमयं सोमचमसः कृत्स्नस्य क्रतुदाक्षिण्यस्य निवर्तक उत ब्रह्मभागस्येति। तत्र सोमचमसस्य दक्षिणया ब्रह्मणा च संयोगात् कृत्स्नस्य निवर्तकः पुरुषान्तरापनीतश्चेति प्राप्ते।

ब्रूमः। एकवाक्यत्वे तु चमसस्य पुरुषविशेषब्रह्मसंयुक्तदक्षिणात्वविधानात् ब्रह्मभागस्यैव निवर्तक इति।

वस्तुतस्तु-एकवाक्यत्वाभावात् कृत्स्नस्य निवर्तक इति स्थितम्। इदमपि नाधिकरणान्तरमिति पक्षान्तरम्।

(टि) विशेषाशङ्कां दर्शयति अत्रेत्यादिना। कृत्स्नस्य निवर्तक इति। अन्यथा दक्षिणाशब्दस्य दक्षिणावयवे ब्रह्मभागे लक्षणा स्यादिति भावः। एकवाक्यत्वे हि अयमर्थः-ब्रह्मणे दक्षिणात्वेन सोमचमसो देय इति। यदि सोमचमसोऽस्य क्रतोर्दक्षिणा नान्यत् स च ब्रह्मणे देयो नान्येभ्य इत्यर्थस्तदा भिन्नमेव वाक्यं नैकमित्याशयेनाह एकवाक्यत्व इत्यादिना। यत्तु लक्षणा स्यादिति तन्न। तथाहि भृतिवचनो दक्षिणाशब्दः। स च कर्मापेक्षयापि प्रवर्तते। तदत्र ब्रह्मसंयोगाद् ब्रह्मापेक्षया च ब्रह्मभागस्य भृतित्वात्तत्र मुख्यैव दक्षिणैति न लक्षणाप्रसङ्गः। यद्यस्मिन् कर्मणीयं भृतिरिति क्रत्वपेक्षया दक्षिणाशब्दस्तदैव ब्रह्मभागस्य क्रतुदक्षिणत्वयवत्वात् लक्षणा स्थान्न त्वेवमिति॥

॥ वाजपेये रथस्य भागनियामकताधिकरणम् ॥

**सू. यजुर्युक्ते त्वध्वर्योर्दक्षिणा विकारः स्यात् ॥**

(मू) वाजपेये श्रूयते-"यजुर्युक्त रथमध्वर्यवे ददातीति। रथशकटादीनि सप्तदश द्रव्याणि प्राकृतगवाश्वादिविकारत्वेनात्र विहितानि। तेषु च प्रतिद्रव्यं सप्तदशसङ्ख्या विहिता। तत्र सप्तदशसु रथेषु मुख्यं रथं यजमानारोहणाय

"इन्द्रस्य वज्रोऽसीत्यादिभिर्यजुर्मन्त्रैः सज्ञीकरोति, सोऽयं यजुयुक्तो रथः तमध्वर्यवे ददातीत्यर्थः।

तत्र संशयः-किमयं यजुर्युक्तो रथोऽध्वर्युभागस्य निवर्तकः उत नेति।

तत्र प्राकाशन्यायात् अध्वर्युभागस्य निवर्तक इति प्राप्ते।

ब्रूमः। यजुर्युक्तमिति वाक्यस्य भागनियमविधायकत्वात् नाध्वर्युभागस्य निवर्तको यजुर्युक्तो रथ इति। अयमत्र वाक्यार्थः - यद्यजुर्युक्तं रथं ददाति तदध्वर्यवे नान्येभ्य इति, न चायमर्थः यदध्वर्यवे ददाति तद्यजुयुक्तं रथमेव नान्यदिति।

**॥ इति षोडशाध्याय्यां दशमाध्यायस्य ॥**

**।। तृतीयः पादः ॥**

(टि) भागनियमेति। न ह्यत्र प्राकाशाविवापूर्वो यजुर्युक्तोऽध्वर्य्वानतिकृतेने विधीयते ये नतद्वत् तद्भागो निवर्तेत किन्तु वाक्यान्तरेणानियमेन प्राप्तो नियम्यत इति भावः॥

**॥ इति केरलीये षोडशाध्यायीटिप्पणे ॥**

**॥ दशमाध्यायस्य ॥**

**॥ तृतीयः पादः ॥**

**॥ श्रीः ॥**

**॥ अथ षोडशाध्याय्यां दशमस्य चतुर्थः पादः ॥**

**॥ नारिष्टहोमादिभिः नक्षत्रेष्ट्यादीनां समुच्चयाधिकरणम् ॥**

**सू. प्रकृतिलिङ्गासंयोगात् कर्मसंस्कारं विकृतावधिकं स्यात् ॥**

(मू) अस्त्यग्निः-"य एवं विद्वानग्निं चिनुत इति। तत्राग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निर्वपेदित्यादिना नक्षत्रेष्टिः विहिता। तत्रोपहोमा विहिताः "सोऽत्र जुहोति इति। मन्त्राश्चाम्नाताः-"अग्नये स्वाहा कृत्तिकाभ्यः स्वाहा अम्बायै स्वाहा दुलायै स्वाहा नितत्न्यै स्वाहाभ्रयन्त्यै स्वाहा मेघयन्त्यै स्वाहा चुपुणीकायै स्वाहेत्येवमादयः। सन्ति तु प्रकृतौ



नारिष्टहोमाः-"षट् नारिष्टहोमान् जुहोतीति। तथा श्येने श्रूयते-"लोहितोष्णीषा लोहितवसना निवीता ऋत्विजः प्रजरन्तीति। अस्ति तु प्रकृतौ -"निवीतं मनुष्याणां प्राचीनावीतं पितृणामुपवीतं देवानामुपव्ययते देवलक्ष्ममेव तत् कुरुते इति।

तथा पृष्ठये षडहे श्रूयते-"मध्वाशयेत् घृतं वेति। अस्ति तु प्रकृतौ "पयोव्रतं ब्राह्मणस्य यवागू राजन्यस्यामिक्षा वैश्यस्येति। तत्र तक्षत्रेषु नारिष्ठाःश्येने चोपवीतं पृष्ठ्ये पयोव्रतादि चोदकप्राप्तम्।

तत्र संशयः-किं वैकृतैरुपहोमादिभिः प्राकृतानां नारिष्ठहोमादीनां निवृत्तिरुतानिवृत्तिः समुच्चय इति। तत्र निवीत ऋत्विज इत्येतदनुदाहरणं, उपहोमाद्येव तूदाहरणं इति।

तत्र उपहोमादीनां नारिष्ठहोमादिकार्याकरत्वात् नारिष्ठहोमादीनां निवृत्तिरिति प्राप्ते।

ब्रूमः। प्रत्यक्षानुमानाभावे विधानस्वशब्दप्रतिषेधात्मक-कार्यापत्तिप्रमाणपञ्चकान्यतमस्येहाभावान्नारिष्ठाद्यकार्यकरैः उपहोमादिभिः नारिष्टहोमादीनां निवृत्तिः समुच्चय इति। समुच्चय एवाभ्युच्चय इत्युच्यते॥

**॥ श्रीः ॥**

**॥ अथ दशमस्य चतुर्थः पादः ॥**

अथ देवताभिधानं यावपदभ्युच्चयचिन्ता। अनुदाहरणमिति। ज्योतिष्टोमे उपवीताभावादिति भावः। अभावादिति। नच होमत्वादिना नारिष्ठादिकार्यमुपस्थापयितुमर्हति साधारणत्वात्। नच नक्षत्रेष्टावुपहोमावधानेन निराकाङ्क्षत्वात् गृहमेधीयवत् प्राकृतमित्यम्भावं नापेक्षते तक्षत्रेष्टिरिति वाच्यम्। सन्निपातिनां द्रव्यदेवतासंस्काराणामलाभावेन कथम्भावस्यापरिपूर्णत्वादिति॥

**॥ शरमयबर्हिषा कौशबर्हिर्बाधसाधकं, रथघोषतुन्दुभिघोषाभ्यां दर्भमन्त्रयोरुभयोर्बा धबोधकं इति वर्णकद्वयसहितमधिकरणम् ॥**

**सू. चोदनालिङ्गसंयोगे तद्विकारः प्रतियेत प्रकृतिसंनिधानात् ॥**

(मू) इदमाम्नायते-"सोमारौद्रं चरुं निर्वपेत् कृष्णानां व्रीहीणां अभिचरन्निति। तत्र श्रूयते-"शरमयं बर्हिर्भवतीति। तत्र संशयः-किं शराः कुशान्निवर्तयन्ति उत नेति। तत्रोभयोः कुशशरयोः प्रमाणावगतत्वाविशेषात् समुच्चयः न शराः कुशान् निवर्तयन्तीति प्राप्ते। ब्रूमः। बर्हिदशब्दलक्षितकुशकार्ये विधीयमानां शराणां प्राकृतकुशकार्यकरत्वाविसंवादात् शराः कुशान् निवर्तयन्तीति। इदं नाधिकरणान्तरमिति पक्षान्तरम्। अस्ति वाजपेयः-"वाजपेयेन स्वाराज्यकामो यजतेति। तत्र श्रूयते-"रथघोषेण माहेन्द्रस्य स्तोत्रमुपाकरोति दुन्दुभिघोषेण माहेन्द्रस्य स्तोत्रमुपाकरोतीति। अस्ति तु प्रकृतौ "उपावर्तध्वमिति दर्भाभ्यां स्तोत्रमुपाकरोतीति। तदिह चोदकप्राप्तम्। तत्र संशयः-किं रथघोषेण दुन्दुभिघोषेणेति समाहारद्वन्द्वः ततश्च रथो दून्दुभिः त्वत् रथदुन्दुभ्योः तद्घोषस्य च स्तोत्रोपाकरसाधनत्वात् घोषो नादः शब्दत्वसामान्यान्मन्त्रस्य निवर्तकः दुन्दुभिश्च द्रव्यत्वसामान्यादुभयोर्निवर्तकः उत षष्ठीतत्पुरुषः ततश्च रथस्य दुन्दुभेश्च यो घोषः तस्योपाकरणसाधनत्वात् घोष एव मन्त्रस्य दर्भयोश्च निवर्तक इति ।

तत्र षष्ठीतत्पुरुषपक्षे पूवपदस्य लक्षणाप्रसङ्गात् समाहारद्वन्द्वः। ततश्चोक्तरीत्या घोषो मन्त्रस्य निवर्तकः रथोदुन्दुभिश्च दर्भयोरिति प्राप्ते। ब्रूमः। समाहारद्वन्द्वाश्रयणे पदद्वयेऽपि लक्षणाप्रसङ्गात् षष्ठीतत्पुरुषः। ततश्चोक्तरीत्या घोष एव मन्त्रस्य दर्भयोश्च निवर्तक इति।

इदं त्ववधेयम् - समाहारद्वन्द्वे पदद्वयेऽपिलक्षणातत्पुरुषे तु पूर्वपदे, इतरेतरद्वन्द्वे तु लक्षणा युगपदधिकरणवचनता पक्षे तु इतरेतरद्वन्द्वेऽपि पदद्वये लक्षणा कर्मधारये तु न लक्षणेति। इदमपि नाधिकरणान्तरमिति पक्षान्तरम्॥



तत्र षष्ठीतत्पुरुबपक्षे पूर्वपदस्य लक्षणाप्रसङ्गात् समाहारद्वन्द्वः। ततश्चोक्तरीत्या घोषो मन्त्रस्य निवर्तकः रथो तुन्दुभिश्च दर्शयोरिति प्राप्ते। ब्रूमः। समाहाद्वन्द्वाश्रयणे पदद्वयेऽपि लक्षणाप्रसङ्गात् षष्ठीतत्पुरुषः। ततश्चोक्तरीत्या घोष एव मन्त्रस्य दर्भयोश्च निवर्तक इति।

इदं त्वधेयम्-समाहारद्वन्द्वे पदद्वयेऽपिलक्षणा तत्पुरुषे तु पूर्वपदे। इतरेतरद्वन्द्वेऽपि लक्षणातत्पुरुषे तु पूर्वपदे। इतरेतरद्वन्द्वे तु लक्षणा युगपदधिकरणवचनतापक्षे तु इतरेतद्वन्द्वे तु लक्षणा युगपदधिकरणवचनता पक्षे तु इतरेतरद्वन्द्वेऽपि पदद्वये लक्षणा कर्मधारये तु न लक्षणेति। इदमपि नाधिकरणान्तरमिति पक्षान्तरम्॥

(टि) समुच्चय इति। अतिदेशोपदेशाभ्यामवगतत्वादिति शेषः। वर्णकान्तरं दर्शयति अस्ति वाजपेय इत्यादिना। समाहारदद्वन्द्व इति । अत्रपक्षे न रथदुन्दुभ्योरेव घोष आदर्तव्यः घोषस्याविशेषणात् येन केनचिद्घोषेण कार्यसिद्धेरिति द्रष्टव्यम्॥

### ॥ बार्हस्पत्यग्रहादिभिः प्राकृतैन्द्रवायवादि ग्रहाणां समुच्चयाधिकरणम् ॥

**सू. सर्वत्र तु ग्रहाम्नानमधिकं स्यात् प्रकृतिवत् ॥**

(मू) बृहस्पतिसवे श्रूयते-"बार्हस्पत्यं ग्रहं गृह्णातीति विष्णुदेवत्यं गह्णातीति महाव्रते श्रूयते "अर्कं गृह्णति शुक्रं गृह्णातीति अश्वमेधे श्रूयते "सुवर्णरजताभ्यां महिमानौ गृह्णतीति। सन्ति तु प्रकृतावैन्द्रवायवादयो ग्रहाः इह चोदकप्राप्ताः। तत्र संशयः - किं प्राकृतानां बाध उत समुच्चय इति । तत्र ग्रहाणां यागनिर्वर्तकानां एककार्यत्वात् चोदकप्राप्तानां प्राकृतानां बाध इति प्राप्ते।

ब्रूमः। ग्रहणस्यादृष्टार्थत्वात् यथा प्रकृतावैन्द्रवायवादीनां समुच्चयः तथा प्राकृतवैकृतानां समुच्चय इति। अत्रेदमवधेयम्-"बार्हस्पत्यं ग्रहं गृह्णातीत्यत्र चोदकप्राप्तग्रहानुवादेन देवताविधौ तु ग्रहाणां बहुत्वात् बहुवचनेन भाव्यं एकवचनं च श्रूयते। सोऽयमभिधानबाधः विशिष्टविधौ तु गौरवमात्रमिति

विशिष्टविधिरेव न्याय्य इति॥

(टि) येषामन्योन्यमनपेक्ष्यैककार्यत्वं तेषामेव विकल्पबाधौ नान्येषामित्याशयेनाह-अदृष्टार्थत्वादिति। विनापि ग्रहणेन यागनिर्वृत्तेर्न ग्रहणस्य यागार्थत्वम्। किन्त्वदृष्टार्थत्वमेव। न चैकेन ग्रहणेन यददृष्टं क्रियते तदेवान्येनापि क्रियत इति प्रमाणमस्तीत्येककार्यत्वे प्रमाणाभावान्न विकल्पबाधावित्यभिप्रायः। ननु "बार्हस्पत्यं ग्रहं गृह्णातीत्यादौ एकां गामि त्यादाविव चोदकप्राप्त गृहणानुवादेन देवतामात्रविधानादनुदाहरणत्वम्। यद्यपि ग्रहणविधौ श्रुतिर्देवताविधाने च वाक्यं तथाप्याप्राप्ताया देवताय अवश्यविधेयत्वेन विशिष्टविधिगौरवपरिहाराय देवतामात्रं विधीयत इत्यनुदाहरणत्वमेव। "शुक्रं गृह्णातीत्यादि तु भवतूदाहरणमित्यत्राह अत्रेदमित्यादिना। भाव्यमिति। यद्यप्यनुवाद्यगता सङ्ख्या न विवक्षिता तथापि बहुषु बहुवचनेनैव भाव्यं यथाग्नेया ग्रहा भवन्तीति तथेति भावः। नहि पशुत्वं सवनीयकार्यकरत्वोपस्थापकम् अनेकसाधारण्या-दित्याशयेनाह देवतेत्यादिना। न च प्राकृतपशवनुवादेन गुणविधिः सम्भवति देवतान्तरस्य सङ्ख्यान्तरस्य च विधाने वाक्यभेदप्रसङ्गादित्याशयेनाह-कर्मान्तराणमिति॥

**॥ वाजपेये प्रजापत्यपशुभिः क्रतुपशूनां समुच्चयाधिकरणम्॥**

**सू. प्राजापत्येषु चाम्नानात्॥**

(मू) वाजपेये श्रूयते-"सप्तदश प्राजापत्यान् पशूनालभत इति। सन्ति तु प्रकृतावाग्नेयादयः क्रतुपशवः तत्र चोदकप्राप्ताः। तत्र संशयः-किं प्राकृताः प्राजापत्यैर्बाध्यन्ते उत समुचीयन्त इति। तत्र पशुत्वरूपप्रकृतिलि-ङ्गसंयोगावागतप्राकृतकार्यकरत्वात् बाध्यन्त इति प्राप्ते।

ब्रूमः। त्रित्वस्यानेकसाधा रणस्यानुयाजकार्यक रत्वोपस्थापक-लिङ्गत्वाभावात् कर्मान्तरभूतैः आमनहोमैरनूयाजाः समुचीयन्त इति॥

(टि) कर्मान्तरभूतैरिति। नच "यत्तिस्रो जुहोति तदामनमसी त्यादिमन्त्रैरित्यनूयाजाननुद्य तेषु मन्त्रविधिरिति वाच्यम्।



त्रित्वविशिष्टहोमानुवादेन विशिष्टानुवादाद्वाक्यभेदापत्तेरिति।

अत्र पूर्वाधिकरणसिद्धान्तस्थाने उत्तराधिकरणसिद्धान्तः लिखितः। उत्तराधिकरणपूर्वपक्षः च न लिखित। अतः आहत्य "साग्रहणीष्टौ आमनहोमैरनुयाजानां समुच्चयत्वप्रतिपादकस्य (10-4-5) अधिकरणस्य पूर्ववक्षः नास्ति, तथा "वाजपेये प्रजापत्यपशुभिः क्रतुपशूनां समुच्चयत्व प्रतिपादकस्य (10-4-4) अधिकरणस्य सिद्धान्तश्च नोपलभ्यते॥)

**॥ महाव्रते पत्न्युपगानेनर्त्विगुपगानस्य समुच्चयाधिकरणम्॥**

**सू. उपगेषु शरत् स्यात् प्रकृतिलिङ्गसंयोगात्॥**

(मू) गवामयने महाव्रतं नामैकाहः। तत्र भक्ष (दिक्षु) दुन्दुभयो नदन्तीत्यादि विधाय श्रूयते - "पत्नय उपगायन्ति काण्डवीणाभिरुपगायन्तीति। प्रकृतौ तु ऋत्विज उपगायन्तीति श्रूयते। तदुपगानं ऋत्विजश्चोपगातारः इह प्राप्यन्ते। तत्र संशयः-किमत्र चोदकप्राप्ते सामगानस्योपगानं कर्तव्यमिति समानविषयत्वात् चोदकप्राप्ता उपगानं कुर्वन्त ऋत्विजो बाध्यन्ते उत प्रत्यक्षविहितानन्तरविपरिवर्तमानदुन्दुभ्यादिवादित्रनादस्य वर्ति काण्डवीणाविशिष्टमुपगानं विधीयते ततश्च दुन्दुभ्यादिवादित्र नादो पगानं कुर्वन्ति भिन्नविषयत्वान्न बाध्यन्त इति। तत्र गानशब्दस्य शारीर्यां गीतौ प्रसिद्धत्वाच्चोदक प्राप्ते शरीरसामगानोपगाने पत्न्योः विधीयन्ते (येते) ततश्चोक्तरीत्या ऋत्विजो बाध्यन्त इति प्राप्ते। ब्रूमः। गानशब्दस्य वादित्रनादात्मकतन्त्रीगानेऽपि प्रयोगात् वादित्रनादस्योपगानमत्र विधीयते। ततश्चोक्तरीत्या ऋत्विजो न बाध्यन्त इति। उपगानं च उपचयात्मकं गानमिति बोध्यम्॥

(टि) उपचयात्मकमिति। ननु गानस्योपचयमुपगानम्। अतो न शारीरस्य गानस्य शरीरमेव गानमुपचयो भवति नान्यत्। शारीरं चोपगानं प्राप्तमेवेत्यविधेयत्वात् पत्नीमात्रविधानमिति शङ्क्यमिति भावः॥

**॥ अज्जनाभ्यञ्जने नवनीताभ्यञ्जनस्य गोगलवाभ्यञ्जनादिभिः समुच्चयाधिकरणम्॥**

**सू. संस्कारे चान्यसंयोगात्**

(मू) अस्त्यञ्जनाभ्यञ्जनसंज्ञक एकान्नपञ्चाशद्रात्रः सत्रविशेषः। तत्र श्रूयते-"गौगुलवेन प्रातःसवने आज्जतेऽभिवाञ्जते पैतुदारवेण माध्यन्दिने सवने सौगन्धिकेन तृतीयसवन इति। अस्ति तु प्रकृतौ नवनीतेनाभ्यञ्जनम्। तदिह चोदकप्राप्तम्। तत्र संशयः - किं तत् प्राकृतवैकृतयोरुभयोरपि दृष्टार्थत्वात् प्राकृतं वैकृतेन बाध्यत इति प्राप्ते। ब्रूमः। दृष्टार्थत्वेऽपि एककार्यत्वाभावान्न बाध्यत इति। तथाहि- नवनीताभ्यञ्जनं स्नेहनार्थं सुखप्रचाराय गौगुलवाद्यभ्यञ्जनं तु अरूक्षीकरणार्थमिति नैककार्यत्वमिति॥

(टि) एककार्यत्वाभावादिति। नच प्राकृतेऽभ्यञ्जने गुणविधिः। प्रातस्सवन (गौल्गु) गुग्गुलवाद्यनेक गुणश्रवणादिति द्रष्टव्यम्

**॥ महाव्रते अहतवाससस्तार्यादिभिः समुच्चयाधिकरणम्**

**सू. आच्छादने त्वैकार्थ्यात् प्राकृतस्य विकारःस्यात्॥**

(मू) महाव्रते श्रूयते-तार्प्यं (र्यं) यजमानः परिधत्ते दर्भमयं पत्नीति। घृताक्तः कम्बलः तार्प्य (र्य) मित्युच्यते। अस्ति तु प्रकृतौ - "अहतं वासः परिधत्त" इति। तदहतं वास इह चोदकप्राप्तम्। तत्र संशयः-किं तार्यं दर्भमयं च कौपीनाच्छादनार्थं विधीयते ततः कौपीनाच्छादनार्थस्याहतस्य वासस एककार्यत्वान्निवृत्तिः अथवा तार्यदर्भमययोः कौपीनाच्छादनायोग्यत्वात् अधिकं तार्यादि परिधानं विधीयते तत एकार्यत्वाभावात् न निवृत्तिः किन्तु समुच्चय इति। तत्र परिदधातेः कौपीनाच्छादने प्रयोगात् तार्यं दर्भमयं च कौपीनाच्छादनार्थं विधीयते। ततश्चोक्तरीत्या अहतस्य निवृत्तिरिति प्राप्ते।

ब्रूमः। "कम्बलं परिधत्त इत्युपरिवासस्यपि परिदधातिप्रयोगदर्शनात् तार्यदर्भमययोश्च कौपीनाच्छादनायोग्यत्वात् अधिकं विधीयते। ततश्चोक्तरीत्या नाहतस्य निवृत्तिः किन्तु समुच्चय इति।

अत्रेदमवधेयम्-नाप्याचारप्राप्तस्योत्तरीयस्य स्थाने तार्यादि विधीयते वासेबहुत्वाददर्शनादबाधेनोपपत्तौ वाधस्यान्याय्यत्वाच्चेति॥

(टि) अनुवादेति। वासांसि विववृत इति शेषः॥



**॥ महाव्रते रथन्तरादिसाम्नां श्लोकादिसामभिः समुच्चयाधिकरणम्॥**

**सू. सामस्वर्थान्तरश्रुतेरविकारः प्रतीयेत॥**

(मू) महाव्रत एव श्रूयेत - "श्लोकेन पुरस्तात् सदसः स्तुवते अनुश्लोकेन पश्चात् क्रौञ्चेन चात्वालमपे (वे) क्षमाणा" इति। तत्र संशयः - श्लोकादिभिः सामभिः प्राकृतानां गायत्र्यादिसाम्नां निवृत्तिः उत अनिवृत्तिरिति। स्तुत्यर्थत्वान्निवृत्तिरिति प्राप्ते।

ब्रूमः। स्तुतिरेवत्र विधीयते। तस्य अदृष्टार्थत्वात् अनु(अनु) वृत्तिः समुच्चय इति। उत्तरविवक्षार्थमिदम्॥

(टि) स्तुतिरेवात्र विधीयत इति। नहि प्राप्तस्तुत्यनुवादेन सामान्तरं पुरस्तादित्यादि देशान्तरं च शक्यं विधातुं वाक्यभेदप्रसङ्गादिति भावः॥

**॥ विकृतिविशेषे प्राकृतसाम्नां कौत्सादिभिः बाधाधिकरणम्॥**

**सू. अर्थे त्वश्रूयमाणे शेषत्वात् प्राकृतस्य विकारः स्यात्॥**

(मू) क्वचिच्छ्रुयते-"कौत्सं भवति काण्वं भवति वसिष्ठस्य जनित्रे भवतः शुद्धाशुद्धीये भवतः भार्गयशसीये भवतः कौञ्चानि भवन्तीति। तत्र संशयः- किं कौत्सादिभिः सामभिः प्राकृतानि सामनि बाध्यन्ते नवेति। तत्र स्तुवत इत्येवं स्तुत्यर्थत्वेनाविधानात् स्तुत्यर्थानि प्राकृतानि सामानि न बाध्यन्त इति प्राप्ते।

ब्रूमः। स्तुत्यर्थत्वेनाविहितत्वेऽपि कौत्सादीनां लिङ्गप्रकरणाभ्यां स्तुत्यर्थत्वसम्भवात् बाध्यन्त इति। इदमपि नाधिकरणान्तरमिति पक्षान्तरम्॥

(टि) लिङ्गेति। साम्नामृगक्षराभिव्यक्तिसामर्थ्यमत्र लिङ्गमिति ध्येयम्। भाष्यकारेणेदं सूत्रं पूर्वाधिकरण एव शङ्कोत्तरत्वेनापि ख्यातम्। तद्दर्शयति- इदमपीति॥

**कौत्सादिभिः व्यवस्थयैकादि बाधाधिकरणम्॥**

**सू. सर्वेषामविशेषात्॥**

(मू) क्वचिच्छ्रूयते-"कौत्सं भवति काण्वं भवति वसिष्ठस्य जनित्रे भवतः शुद्धाशुद्धीये भवतः भार्गयशसीये भवतः क्रौञ्चानि भवन्ती"ति। तत्र कौत्सादीनि प्राकृतनिवर्तकानीति समधिगतम्। तत्र संशयः-किं कौत्समित्याद्येकवचननिर्दिष्टं जनित्रे इत्यादिद्विवचनान्तनिर्दिष्टे क्रौञ्चानीति बहुवचनान्तनिर्दिष्टानि च सर्वाणि सामानि प्राकृतानां सर्वेषां निवर्तकानि उत एकवचनान्तनिर्दिष्टमेकस्य निवर्तकं द्विवचनान्तनिर्दिष्टे द्वयोः बहुवचनान्तनिर्दिष्टानि बहूनामिति यथासङ्ख्य निवर्तकानीति। तत्राविशेषात् सर्वाणि सर्वनिवर्तकानीति प्राप्ते। ब्रूमः। यथासङ्ख्यं निर्वत्तावपि वैकृतसामोपदेशस्यार्थवत्वे सिद्धे इतरनिवृत्तौ प्रमाणाभावात् यथासङ्ख्यं निवर्तकानीति॥

(टि) अविशेषादिति। इदमस्य निवर्तकमिदमस्येति वचनं नास्तीति भावः॥

॥ विवृद्धाविवृद्धस्तोमक्रतुषु क्रमेण प्राकृतसामबाधाबाधाधिकरणम्॥

**सू. स्तोमविवृद्धौ त्वधिकं स्यात् अविवृद्धौ द्रव्यविकारः स्यादितरस्याश्रुतित्वाच्च॥**

(मू) सन्ति वृद्धिस्तोमकाः क्रतवः-"एकविंशेनातिरात्रेण प्रतिष्ठाकामं याजयेत् त्रिणवेनौजस्कामं त्रयस्त्रिंशेन श्रीकाममिति। तथा "द्वात्रिंशाः पवमानाः अभिषेचनीयस्ये"ति। तत्र श्रूयते-नव राजसामानीत्यादि। तथा अवृद्धिस्तोमकाः हीनस्तोमकाः क्रतवः पुनस्तोमादयः

तथा- **पुनस्तोमस्य सवनं मध्यमं द्वादशं स्मृतम्।**
**कार्यौ नव दशस्तोमौ अभितः सवने उभे॥**

इति। तत्र संशयः-किं वैकृतैः राजसामादिभिः स्तोमविवृद्धौ स्तोमानौ च प्राकृतानां निवृत्तिः उत हानौ निवृत्तिः विवृद्धानिवृत्तिः समुचय इति। तत्र सोमोत्पत्त्यर्थवत्वायागमेन सङ्ख्यापूरणात् प्रत्यक्षश्रुतै राजसामादिभिः विवृद्धौ हानौ च प्राकृतानां निवृत्तिरिति प्राप्ते।

ब्रूमः। स्तोमविवृद्धौ प्राकृतानामबाधेन वैकृतानां सम्भवात् न निवृत्तिः,



स्तोमहानौ च निवृत्तिरिति। अत्र विवृद्धिरेव वोदाहरणम्॥

इदं त्ववधेयम्: अश्रुतानामागमं कृत्वा चोदकप्रमाणप्राप्तानां बाधो न न्याय्य इति। तस्मादविवृद्धौ प्रत्यक्षश्रुतैः "कौत्सं भवती"त्यादिभिः तावत्सङ्ख्यानां प्राकृतानां उद्धापात् तेषां चापवादः विवृद्धौ तु प्रत्यक्षश्रुतानां राजासामादीनामावाप इति स्थितम्॥

(टि) सोमो (स्तो) त्पत्यर्थवत्वायेति। निवृत्तिरित्यनेन सम्बन्धः। आगमेन सङ्ख्यापूरणं वक्ष्यति। ततश्च तेनैव वृद्धौ पूरितायां प्रत्यक्षश्रुतानि राजसामानि विवृद्धावेव कालमलभमानानि प्राकृतबाधेन वर्तन्त इत्यर्थः। आगमेन सङ्ख्यापूरणादित्यनेन प्रत्यक्षश्रुतानां प्राकृताबाधेन निरवकाशत्वमुक्तमिति बोध्यम्। अत्र वृद्धिरेवेति। हीनस्तोमकोदाहरणं तु प्रत्युदाहरणाभिप्रायेणेति भावः॥

**॥ पवमाने विवृद्धाविवृद्धस्तोमक्रतूनां सामावापोद्वापाधिकरणम्॥**

**सू. पवमाने स्यातां तस्मिन्नावापोद्वापदर्शनात्**

(मू) वृद्धिस्तोमकाः अवृद्धिस्तोमकाश्च क्रतव उदाहरणम्। तत्रावापोद्वापयोः संशयः-किं यस्मिन् कस्मिंश्चित् स्तोत्रे प्रत्यक्षश्रुतानामावापः यतः कुतश्चित् स्तोत्रात् चोदकप्राप्तानामुद्वाप इत्यनियमः उत पवमानेष्वेवावापोद्वापाविति।

तत्राविशेषादनियम इति प्राप्ते। ब्रूमः-"त्रीणि ह वै यज्ञस्योदराणि गायत्री बृहत्यनुष्टुप् अत्र ह्येवावपन्ति अत एवोद्वपन्तीति पवमानस्तोत्रासाधारयणभूत गायत्रीबृहत्यनुष्टुब्विषयावापोद्वापविधानात् पवमानेष्वेवेति। इदं त्ववधेयम्-यत्र स्तोत्रान्तरेष्वपि प्रत्यक्षविधिना वा लिङ्गाद्वा स्तोमविवृद्धिः स्यात्तत्राभ्यासेन सङ्ख्या पूरणीया आवापोद्वापौ त्वेवकारश्रवणबलात् पवमानेष्वेव। तत्रापि गायत्रीबृहत्यनुष्टुप्स्वेवेति॥

(टि) अविशेषादिति। यत्र क्वचन निवेशे वैकृतानामर्थवत्त्वात् प्राकृकानामुद्वापस्य निवेशनिबन्धनत्वाच्चाविशेषत्वमिति। "त्रिण (त्रीणि) ह वा इतिवचनं तु हि शब्दोपब्दोपबन्धाद्वर्तमानापदेशाच्च न विधायकमिति

भावः। विधानादिति। आवापोद्वापविषयविशेषस्याप्राप्तत्वात् स्तुतिकल्पितविधिशक्तिकं विधायकमेवेदं वाक्यमिति भावः।परिसङ्ख्याविधिश्चायं न्यायात् सर्वत्र प्राप्तेः। नच त्रिदोषत्वं, तस्या एवकारेण श्रुतत्वात्। अतोऽगत्या स्तोत्रान्तरेष्वगत्याभ्यासेन पुरणम्। तदेतदाह इंद त्वित्यादिना॥

**॥ यागादौ विधिशब्देनैव देवताभिधानाधिकरणम्॥**

**सू. विधिशब्दस्य मन्त्रत्वे भावः स्योत्तेन चोदना॥**

(मू) स्तो दर्शापूर्णमासौ-"दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति। तत्र दर्शपूर्णमसयोः श्रूयते-"यदाग्नेयोऽष्टकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवती"ति। सन्ति चाग्नेरभिधानानि अग्निः शुचिः पावको धुमकेतुः कृशानुः वैश्वानरः शाण्डिल्य इत्येवमादीनि। तत्र संशयः-किमग्निवाजिषु निगमेषु येन केनचिदग्नेरभिधानशब्देनाग्नेरभिधानं कर्तव्यमित्यनियम उत विधिगतेनाग्निशब्देनैवेति।

तत्र येन केनचिदग्न्यभिधानशब्देनाग्न्युद्देशसिद्धेरनियम इति प्राप्ते।

ब्रूमः। विधिगतशब्दोच्चारणस्य विधानाद्विधिगतेनैव शब्देनाभिधानं कर्तव्यमिति।

अत्रेदमवधेयम्-अग्न्यर्थो देवता कर्तव्य इति चोदनार्थः किन्तु अग्नय इत्युच्चार्याष्टाकपालं त्यजेदित्यर्थः। ततश्च शब्दस्वरूपमत्र वाक्यार्थन्वयित्वेन विधीयते। तद्विधाने चार्थस्य देवतात्वं प्राप्तमनूद्यते. ततश्चायमत्र सिद्धान्तः येन शब्देनोद्दिश्य हविस्त्यज्यते तस्यार्थः तस्य देवता नापि केवलोऽन्याद्यर्थो देवता नापि शब्दमात्रमितीति॥

(टि) अतः परमापादसमाप्तेरभिधानविषया चिन्ता। येन केनेति। देवतात्वं विधाय विधिसमवेताग्न्यादिशब्दो निवर्तते। शब्देनोद्दिश्यमानस्यैव देवतात्वमिति प्रयोगवेलायां देवतात्वसम्पादनाय शब्दोच्चारणमापतति। तन्नियमे तु नास्ति प्रमाणमित्यभिप्रायः। अवश्यं हि सर्वत्र स्वव्यापारे पुरूषो नियोक्तव्यः अन्यत्र नियोक्तुमशक्यत्वात् तदत्र शब्दोच्चारणं पुरुषव्यापार



इति तत्रैव नियोक्तव्यः। ततश्चार्थादर्थस्य देवतात्वमपि सिध्यतीति लाघवम्। अर्थस्य देवतात्वे शब्दोच्चारणे च विधीयमाने तु गौरवमित्यभिप्रेत्याह-विधिगतेति। पूर्वपक्षसिद्धान्तवादिनोरभिमत वाक्यार्थं दर्शयति अत्रेदमित्यादिना॥

**॥ अतिदेशस्थलेऽपि वैधशब्देनैव देवताभिधानाधिकरणम्**

**सू. तथोत्तरस्यां ततौ तत्प्रकृतित्वात्॥**

(मू) "सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकाम इति श्रूयते। सन्ति च सूर्यस्याभिधानानि सूर्य आदित्यो भास्करः सविता दिवाकर इत्येवमादीनि। तत्र संशयः-किं विकृतिषु उज्ञित्यादिनिगमेषु येन केनचिद्विधिगतशब्देन वादित्यादिशब्देन वाभिधानं कर्तव्यमित्यनियमः उत विधिगतेनैवेति। तत्र हविस्त्यागमात्रे सूर्यशब्दस्य विधानादन्यत्रानियम इति प्राप्ते। ब्रूमः। प्रकृतावाग्नेयप्रयोगे अग्निशब्दोच्चारणविधानात् तास्थानापन्नेन विधिगतेन सूर्यशब्देनैव सौर्यप्रयोगे चोदकप्राप्तेषु अग्निशब्दयुक्तेषु उज्जित्यादिनिगमेष्व भिधानं कर्तव्यमिति। प्रकृतौ त्याग एवाग्निशब्दविधानं उज्जित्यादिषु तु अग्निशब्दपाठसामर्ध्यात् तत्प्रयोग इति शङ्कां निरसितुमिदमधिकरणम्। प्रकृतावग्निशब्द संयुक्ता निगमा एवोदाहरणम्॥

(टि) प्रयोग इति। अयमाशयः-यागकरणके भावनापरनामके प्रयोगेऽङ्गानि सम्बध्यन्त इति व्याख्यातम् सप्तमनवमाध्याययोः। तस्मादग्निशब्दयुक्तः प्रयोगः कर्तव्य इति शास्त्रार्थः। स तु कियत्कृत्वः केषुचित् प्रदेशेषु उच्चारयितव्य इत्यपेक्षायां याज्यानुवाक्यादुज्ञित्यादिपाठाच्च तावत्कृत्वस्तेषु प्रदशेषूच्चारणीय इत्यवगम्यते। अग्निशब्दस्थानापन्नश्च सूर्यशब्द इति॥

**॥ आधानेऽग्नेः सगुणेनाभिधानाधिकरणम्॥**

**सू. प्राकृतस्य गुणश्रुतौ सगुणेनाभिधानं स्यात्॥**

(मू) अस्त्याधानं " य एवं विद्वानग्निमाधत्त"इति। तत्र पवमानहवींषि श्रूयन्ते-"अग्नये पवमानाय पुरोडाशमष्टाकपालं निर्वपेत् अग्नये पावकायग्नये शुचय" इति। तत्र वाचिषु निगमेषु संशयः - किमेक एवाग्निशब्दो वक्तव्य

उत उभौ वक्तव्यौ अग्नये पवमानाय निर्वपामीत्येवमादीति।

तत्र एकेनैव देवतानिर्देशस्य सिद्धत्वाच्चोदकप्राप्तोऽग्निशब्दः एक एव वक्तव्य इति प्राप्ते। ब्रूमः। शब्दस्यैव भावनापरपर्याय-प्रयोगाङ्गत्वेन विधानादुभौ वक्तव्याविति विधिशब्ध एव वक्तव्यो न त्वन्य इति विवक्षितम् न तु विधिशब्दः सर्वो वक्तव्य इति शङ्कानिरासार्थमिदमधिकरणम्॥

(टि) विनिगमकमाह-चोदकप्राप्त इति। न ह्यर्थस्य देवतात्वं विधीयते किन्तु शब्द एव भावनाङ्गत्वेन विधीयत इत्युक्तमिति दर्शयति-शब्दस्येति॥

**॥ आधानाज्ययोरग्नेर्निर्गुणेनाभिधानाधिकरणम्॥**

**सू. बुधन्वान् पवमानयद्विशेषनिर्देशात्॥**

(मू) अस्त्याधानं "य एवं विद्वानग्निमाधत्त" इति। तत्र पवमानेष्टयः श्रूयन्ते- अग्नये पवमानाय पुरोडाशमष्टाकपालं निर्वपेत् अग्नये पावकायाग्नये शुचय इति। तत्राज्यभागौ प्रकृत्य श्रूयते-"बुधन्वानाग्नेयः कार्यः पावकवान् सौम्य इति। तत्र संशयः - किमत्राग्नेयशब्देन सौम्यशब्देन च देवतां निर्दिश्य बुधन्वत्ता पावकवत्ता च देवताविशेषणत्वेन विधीयते ततश्च बुधन्वत्तया पावकवत्तया च गुणेन देवतायास्सगुणमभिधानं निगमेषु कर्तव्यं बुधन्वन्तमग्निमावहपावकवन्तं सोममावहेत्यादि उताग्नेयशब्देन सौम्यशब्देन च मन्त्रं निर्दिश्य मन्त्रविशेषणतया बुधन्वत्ता पावकवत्ता च विधीयते ततश्च प्रकृवन्निर्गुणमेवाग्निमावह सोममावहेत्याद्यभिधानं कर्तव्यं देवतायाः अविकृतत्वादिति। तत्र मन्त्रवर्णप्रकरणाभ्यां देवतायाः प्राप्तत्वात् उक्तप्रकारेण देवता गुणत्वेन विधीयते ततश्च सगुणमभिधानं कर्तव्यमिति प्राप्ते।

ब्रूमः। तद्धितवृत्तस्योपसर्जनीभूतस्याग्नेः सोमस्य च विशेषणत्वेन विधानायोगादुक्तरीत्या मन्त्राविशेषणतया विधीयते ततश्च निर्गुणमभिधानं कर्तव्यमिति॥

(टि) प्राप्तत्वादिति। अयमत्र श्रुत्यर्थः-आग्नेय आज्यभागो बुधन्वान्बुधशब्दयुक्तः कार्य इति। तस्य च देवताद्वारेण



बुधशब्दवत्तेत्यनेन प्रकोरणानर्थक्यतदङ्गन्यायेन वा देवताया एव बुधन्वत्ता विधीयत इति। भावः। विशेषणत्वेनेति। न ह्युपसर्जनस्य विशेषणं सम्भवतीति भावः। मन्त्रविशेणतयेति। अयमाशयः - मन्त्रान्तराण्यपि अग्निलिङ्गानि सोमलिङ्गानि च प्रकरणे विद्यन्ते। तत्राग्नेयशब्देन सौम्यशब्देन च मन्त्रमेव निर्दिश्य बुधन्वत्ता पावकवत्ता च साक्षादेव विधीयते। एवं च चोदकप्राप्ता देवता न विकृता भवतीति चोदकानुग्रहश्चेत्यपरमप्यनुकूलमिति॥

**॥ गवानुबन्धपृषदाज्यहोमयोः विधिशब्दाभ्यां एव उस्रावनस्पतिशब्दाभ्यामभिधानाधिकरणम्॥**

**सू. विधिनिगमभेदात् प्रकृतौ तत्प्रकृतित्वात् विकृतावपि भेदः स्यात्॥**

(मू) ज्योतिष्टोमे श्रूयते-"गौरनूबन्ध्य इति। तथा पशौ स्विष्टकृद्विकारः श्रूयते-"पृषदाज्येनवनस्पतिं यजतीति। सन्ति च गोरभिधानानि उस्रोस्त्रिया अही मही अदितिरिडेत्येवमादीनि। सन्ति च वनस्पतेरभिधानानि वृक्षः पादपो नगो द्रुम इत्येवमादीनि। प्रकृतौ च विधिनिगमयोर्भेदो दृश्यते। तथाहि-पशौ तावत् " अग्नीषोमीयं पशुमालभत इति पशुशब्देन विधिः। "छागस्य वपाय मेदस" इति छागशब्देन निगमः। तथा "अग्निं स्विष्टकृतं यजती"ति सन् स्विष्टकृच्छब्देन स्विष्टकृति विधिः, "ये दैव्य ऋत्विजः तेभिरग्न इत्यस्विष्टकृच्छब्दको निगमः। अनूबन्ध्ये छागस्य वपाया इति मन्त्रश्चोदकप्राप्तः। "तत्रोस्राया वपाया" इति मन्त्रान्तरमाम्नातम्। एवं स्थिते संशयः-किं निगमेषु विधिशब्दादन्येन येन केनचिदभिधानं कर्तव्यमुतानूबन्ध्यस्य द्रव्यत्वेन विधिशब्दनियमाभावेन येन केनचिदभिधाने प्राप्ते उस्राशब्दस्य प्रकरणाम्नानात् उस्राशब्देनाभिधानम्। वनस्पत्तौ तु देवतात्वाद्विधिशब्देनैवाभिधानमिति। तत्र विधिनिगमभेदात् विधिशब्दादन्येन केनचिदभिधानमिति प्राप्ते। ब्रूमः। प्रकृतावार्थिको विधिनिगमभेदः न तु वाचनिकः। आर्थिकस्य चोदकेनानतिदेशात् उक्तरीत्या उस्राशब्देन विधिशब्देन चाभिधानमिति॥

(टि) विधिशब्दनियमाभावेनेति। नहि द्रव्ये विधिशब्दनियमो विधीयते देवतायां तु विधीयत इत्यर्थः। प्रकृताविति। यच्चप्रकृतौ कृतं तद्विकृतौ कर्तव्यमन्यथा चोदकविरोधादिति भावः। येन केनचिदिति। उस्राया वपाया इति पाठमात्रं न विधिरिति भावः। उस्राशब्देनेति। प्रकरणपाठसामर्थ्यादित्याभिप्रायः॥

॥ अवभृतोऽग्नीवरुणयोः सस्विष्टकृच्छब्देनाभिधानाधिकरणम्।

सू. स्विष्टकृद्देवतान्यत्वे तच्छब्दत्वान्निर्वतैत

(मू) "वारुणैककपालेनावभृतं यन्तीति विहितेऽवभृथे श्रूयते-अग्नीवरुणौ स्विष्टकृतौ यजतीति। तत्र संशयः-किं स्विष्टकृच्छब्दः अग्नौ रूढः ततः स्विष्टकृदाख्याग्निकार्ये अग्नीवरुणौ कर्तव्याविति वचनव्यक्तिः ततो निर्गुणयोर्देवतात्वात् निगमेषु अग्नीवरुणावावहेत्याद्यस्विष्टकृच्छब्दकं वचनं कर्तव्यं अथवा स्विष्टं करोतीति स्विष्टकृदिति यौगिकः प्रकृतावग्नौ स्विष्टकृच्छब्दः ततश्च स्विष्टकृद्गुणेन सगुणामग्निदेवतां यजति तत् अग्नीवरुणौ यजति न केवलमग्निमिति वचनव्यक्तिः ततः स्विष्टकृद्गुणेनाग्नीवरुणयोर्विधानात् तयोः सगुणयोरेव देवतात्वात् निगमेषु अग्नीवरुणौ स्विष्टकृतौ आवहेत्यादि सस्विष्टकृच्छब्दकं वचनं कर्तव्यमिति।

तत्र भूतस्य स्विष्टकरणस्याग्नावभावात् उक्तरीत्या स्विष्टकृच्छब्दकं वचनमिति प्राप्ते।

ब्रूमः। भूतकालमात्रासम्भवेऽपि स्विष्टकृत्करणयोगसम्भवादुक्तरीत्या अग्नीवरुणयोर्निगमेषु स्विष्टकृच्छब्दकं वचनं कर्तव्यमिति॥

(टि) अग्निकार्य इति। स्विष्टकृच्छब्दोऽग्निकार्यलक्षणार्थ इति भावः। असम्भवेऽपीति। प्रयोगान्तरापेक्षया भूतकालताप्युपपद्यत एव द्रष्टव्यम्। योगसम्भवादिति। सम्भवति योगे न समुदायप्रसिद्धौ प्रमाणमस्तीति भावः॥

॥ अग्नीषोमीये पशौ सर्वत्रैव प्रयोगे निर्गुणेनाग्नि शब्दनाग्नेरभिधानाधिकरणम्॥



सू. सगुणस्य गुणलोपे निगमेषु यावदुक्तं स्यात्॥

(मू) ज्योतिष्टोमे अग्नीषोमीये पशौ श्रूयते-"अग्नीषोमीयस्य वपया प्रचर्याग्नीषोमीयं पशुपुरोडाशं निर्वपती"ति। तत्र पशुपुरोडाशे चोदकप्राप्तस्विष्टकृति स्विष्टकृत्त्वरूपगुणलोपः श्रूयते "अग्निं यजतीति। तत्र संशयः किमयं गुणलोपो यागमात्रे उत सर्वेषु निगमेष्विति।

तत्र यजतीति यागे गुणलोपश्रवणात् यागमात्रे गुणलोप इति प्राप्ते।

ब्रूमः। भावनापरपर्यायप्रयोगे गुणलोपविधानात् सर्वेषु निगमेषु गुणलोप इति।

(टि) इदानीं लोपविषयश्चिन्त्यते किमित्यदिना।

अनुयोजेषु स्विष्टकृद्यागस्य संस्कारकर्मताधिकरणम्॥

सू. स्विष्टकृदावापिकोऽनुयाजे स्यात् प्रयोजनवदङ्गानामर्थसंयोगात्॥

(मू) दर्शपूर्णमासयोस्त्रयोऽनूयाजाः स्विष्टकृद्देवत्यः "अग्निं स्विष्टकृतं यजतीति। तत्र संशयः-किमयं स्विष्टकृद्यागः दर्शपूर्णमासयोरा रादुपकारकःउत स्विष्टकृते समवद्यतीत्यस्यावापिकस्य संस्कारक इति। तत्र दर्शपूर्णमासाङ्गभूतयोः स्विष्टकृतोर्मिथोऽङ्गाङ्गित्वाभावादारादुपकारक इति प्राप्ते।

ब्रूमः। देवतास्मरणरूपदृष्टप्रयोजनलाभात् संस्कारक इति। तस्माद्विकृतिषु स्विष्ट कृद्देवतान्यात्वे अनूयाजस्विष्टकृतो बाध इति।

(टि)संस्कारक इति। नच विनिगमनाविरहः। आवापिकस्य स्विष्टकृतो द्रव्यप्रतिपत्त्येष्टदेवतास्मरणेन च कृतार्थत्वान्नानूयाजस्विष्टकृद्देवता संस्कारार्थत्वं अनूयाजस्य तु दृष्टप्रयोजनान्तराभावा दावापिकसंस्कारार्थत्वमिति।

॥ दर्शपूर्णमासयोर्याज्यापुरोनुवाक्ययोः संस्कारकर्मताधिकरणम्

सू. अन्वहेति च शस्त्रवत्कर्म स्याच्चेदनान्तरात्॥

(मू) दर्शपूर्णमासयोः श्रूयते-"तिष्ठान्याजयामन्वाहासीनः

पुरोनुवाक्यामिति," "तिष्ठन्पुरोनुवाक्यामन्वाहासीनो याज्यामिति वा। तत्र संशयः - किमिदं याज्यापुरोनुवाक्योच्चारणं अदृष्टार्थमर्थकर्म उतार्थप्रतिपत्तिरूपदृष्टार्थं संस्कारकर्मेति।

तत्रोच्चोरणविधिसामर्थ्याददृष्टार्थमर्थकर्मेति प्राप्ते। ब्रूमः। अर्थप्राप्तोच्चारणमनूद्य तिष्ठन्नासीन इति स्थानासनगुणयोर्विधानात् संस्कारकर्मेति॥

(टि) उच्चारणविधिसामर्थ्यादिति। अर्थप्रतिपत्त्यर्थत्वे तु रुपादेव प्राप्तमुच्चारणं न विधातव्यमिति भावः। प्राप्तत्वादेवात्र उच्चारणं न विधातव्यमित्याशयेनाह-अर्थप्राप्तेति।

॥ मनोतायामूहाभावाधिकरणम्॥

सू. मनोतायं तु वचनादविकारः स्यात्॥

(मू) अस्ति वायव्यादयो विकृतयः पशवः "वायव्यं श्वेतमालभेत भूतिकाम" इत्येवमादयः। अस्ति तु प्रकृतावग्नीषोमीये पशौ मनेतामन्त्रः त्वं अग्ने प्रथमो मनोतेति। स विकृतिषु चोदकप्राप्तः। तत्र संशयः-किं यथादेवतमूहितव्यो मनोतामन्त्रः उताविकारेण प्रयोक्तव्य इति। तत्र मनोतास्थाग्निशब्दस्याग्निद्वारेण लक्षणयाग्नीषोमदेवताप्रकाशनार्थत्वात् विकृतिषूहितव्य इति प्राप्ते। ब्रूमः। "यद्यन्यदेवत्यः पशुराग्नेय्येव मनोता कार्या"ति वचनस्य विकृत्यर्थत्वादविकारेण प्रयोक्तव्य इति। तस्माद्विकृतिष्वग्निशब्दस्याबाध इति। ज्योतिष्टोमे आग्नेय सवनीयपशुः नास्तीति कृत्वाचिन्तेयमिति बोध्यम्॥

(टि) अग्निद्वारेणेति। "यद्यप्यन्यदेवत्यः पशुराग्नेय्येवमनोतेति वचनेन अग्नीषोमीये पशौ केवलाग्निदेवत्या मनोता सामर्थ्यादुत्कष्यमाणा वार्यते। यद्यपि द्विदेवत्यः पशुस्तथाप्येकदेवत्या मनोता कार्या नोत्कृष्टव्येति। न चैवमदृष्टार्थत्वादनूहः लक्षणयाग्नीषोमप्रकाशनेन दृष्टार्थत्वादित्यभिप्रायः। वचनं विनापि लक्षणया स्मरणं संभवतीत्याशयेनाह-यद्यन्य-देवत्य इति। विकृत्यर्थत्वादिति। यथादेवतमूहे प्राप्ते तन्निवारणार्थमिदं



वचनमित्यभिप्रायः। कृत्वाचिन्तेति। ज्योतिष्टोम एवाग्नेयः पशुरस्ति चेन्नोत्कर्षशङ्केति न पूर्वपक्षोत्थानमिति भावः।

॥ कण्वरथन्तरस्य स्वयोनौ गानाधिकरणम्॥

सू. पृष्ठार्थेऽन्यद् रथन्तरात् तद्योनिपूर्वत्वात् स्यादृचां प्रविभक्तत्वात्॥

(मू) अस्ति वैश्यस्तोमः - "वैश्यो वैश्यस्तोमेन यजेते"ति। तत्र श्रूयते- कण्वरथन्तरं पृष्ठं भवतीति। तत्र बृहद्रथन्तरोभयविकारः कण्वरथन्तरमित्युक्तम्। तत्र संशयः - किं कण्वरथन्तरं बृहद्योनौ रथन्तरयोनौ वा गेयमित्यनियम उत रथन्तरपोनावेव अथवा स्वयोनाविति। तत्र प्राकृतवृहद्रथन्तरयोनिभूतयोः ऋचोरिह चोदकप्राप्तयोर्विशेषाभावात् अनियम इति चेत्। उच्यते। रथन्तरशब्दसामर्थ्यात् रथन्तरयोनावित्येवं प्राप्ते।

ब्रूमः। उत्तराग्रन्थे कण्वरथन्तरयोनिभूताया ऋचः पठितत्वात् तस्यामेव स्वयोनौ गेयमिति। "पुनानः सोमे" त्यृक् कण्वरथन्तरस्य योनिरिति॥

(टि) कण्वस्य रथन्तरं कण्वरथन्तरमिति यौगिकोऽयंशब्दः अरथन्तरे च रथन्तरशब्दो मासाग्निहोत्रवद्धर्मातिदेशार्थ इत्याशयेनाह- रथन्तरशब्दसामर्थ्यादिति। पठितत्वादिति। क्रत्वर्थश्चोत्तराग्रन्थं नादृष्टार्थ इति भावः। स्वयोनाविति। एवं चाम्नानसिद्धक्वर्यरित्यागगर्न्तरसञ्चरश्च न कल्पितो भवति। कौत्सादीनां तु योनिरुत्तराग्रन्थे न पठितेति तेषां प्रकृतिष्वेवर्क्षु गानमिति भावः॥

॥ कण्वरथन्तरस्य स्वयोन्युत्तरयोर्गानाधिकरणम्॥

सू. कार्यत्वादुक्तरयोर्यथाप्रकृति॥

(मू) कण्वरथन्तयोरेवोत्तरयोर्गाने संशयः-किं बृहथुदुत्तरयोः रथन्तरयोर्वा कण्यरथन्तरस्य गानमिति अनियम उत रथन्तरोत्तरयोरेवाथवा स्वयोन्युत्तरयोरिति। तत्र चोदकप्राप्त्यविशेषादनियम इति चेत्, उच्यते। रथन्तरनामसाम्यात् रथन्तरोत्तरयोरिति प्राप्ते।

ब्रूमः। उत्तराग्रन्थपाठात् स्वयोन्युत्तरयोरिति। उत्तरयोर्गाने आम्नानसिद्धपरित्यागस्यावश्यकत्वे चोदकप्राप्तबाधो न युक्त इति शङ्कानिराकरणार्थमिदमधिकरणम्॥

**(टि) गतार्थत्वं परिहरति उत्तरयोरित्यादिना॥**

**॥ अग्निष्टुति स्तुतशस्त्रयोरविकाराधिकरणम्॥**

**सू. ग्रहाणां देवतान्यत्वे स्तुतशस्त्रयोः कर्मत्वादविकारः स्यात्॥**

(मू) अस्त्यग्निष्टुदेकाहः। तत्र श्रूयते-"आग्नेया ग्रहाभवन्ती"ति। सन्ति तु प्रकृतौ नानादैवत्यानि स्तुतशस्त्राणि। तान्यत्र चोदकप्राप्तानि। तत्र संशयः-किमूहितव्यानि उताविकारेण प्रयोक्तव्यानीति। तत्र संस्कारकर्मत्वादूहितव्यानीति प्राप्ते। ब्रूमः। तेषां प्रधानकर्मत्वस्य द्वितीये वर्णितत्वात् अविकारेण प्रयोक्तव्यानीति। द्वितीयसिद्धस्य प्रयोजनकथनमेतत्॥

(टि) प्रयोजनकथनार्थमिदमधिकरणमित्याह-द्वितीयेति।

**॥ चातुर्मास्येषु आज्यशब्दस्य अविकारेणावाहनाधिकरणम्॥**

**सू. उभयपानात् पृषदाज्ये दध्नः स्यादुपलक्षणं निगमेषु पातव्यस्योपलक्षणत्वात्॥**

(मू) अस्ति (सन्ति) चातुर्मास्यानि-"चातुर्मास्यैः स्वर्गकामो यजेते"ति। तत्रानूयाजान् प्रकृत्य श्रूयते-"पृषदाज्येनानूयाजान् यजती"ति। सन्ति तु प्रकृतौ आज्यशब्दयुक्ता निगमाः देवार्ग आज्यपार्ग आवहे"त्येवमादयः। आज्यशब्देन च प्रकृतौ प्रयाजानूयाजदेवता उच्यन्ते। ते च निगमा अत्र चोदकप्राप्ताः। तत्र संशयः-किमत्र दध्याज्योभयं हविः तत आज्यपानित्यस्य आज्यदधिपानिति विकारः कर्तव्य उत दध्येव हविः ततः पृषदाज्यपानिति आहोस्विति आज्यमेव हविः तत्र तु पृषत्ता चित्रता संस्कारमात्रं तदुपजना (नना) र्थं च दधि ततो न विकार इति। तत्र "पृषदाज्यं गृह्णाति द्वयं वा इदं हविः सर्पिश्च दधिचे"ति



उभयत्वश्रणात् उभयं हविः ततः आज्यदधिपानिति विकार इति चेत्। उच्यते। आज्यस्य "द्विरुपस्तृणाति समभिघारयती"ति उपस्तरणाभिधारण दधिसंस्कारार्थत्वात् दध्येव हविः ततो दधिपानिति विकार इति। अत्रोच्येते पृषदाज्यशब्दस्य रूढयाज्येन दध्ना चोत्पादितस्य द्रव्यान्तरस्य वाचकत्वात् द्रव्यान्तं पृषदाज्यं हविः ततः पृषदाज्यपानिति विकार इत्येवं प्राप्ते।

ब्रूमः। पृषदाज्यशब्दस्य चित्राज्ये यौगिकत्वादाज्यमेव हविः ततो न विकार इति॥

**॥ इति षोडशाध्याय्यां दशमाध्यायस्य॥**

**॥ चतुर्थः पादः॥**

(टि) आज्यदधिपानिति। न चोभयस्य हविष्ट्वेऽपि देवतोपलक्षणमेकेन सिध्यतीति यज्ञपतिशब्दवदविकार इति शङ्क्यम्, हविषोऽपि देवतावदनुष्ठानाङ्गत्वेन स्मर्तव्यत्वादपरार्थत्वेन यज्ञपतिशब्दवैषम्यादिति भावः। न विकार इति अयं भावः-यागे हि पृषद्राज्येनेति पृषत्तागुणकमाज्यमेव श्रुत्या करणत्वेन विधीयते। यागद्रव्यार्थश्च ग्रहणसंस्कारः। तस्माद् ग्रहणेऽप्याज्यमेव प्रधानम्। तस्य पृषत्तासम्पादनार्थं दधि गृह्यते न स्वार्थेन। अतो न ग्रहणश्रुत्योभयहविष्ट्वसिद्धिः "द्वयं वा इदं हविस्सर्पिश्च दधिचे"ति तुल्यबलवन्निर्देशस्त्वर्थवादमात्रम्। उपस्तरणाभिधारणे दध्नः प्राधान्यनिर्देशोऽप्यर्थवादमात्रम्। अतो न तेन दध्नो हविष्ट्वसिद्धिरिति॥

**॥ इति केरलीये षोडशाध्यायीटिप्पणे॥**

**॥ दशमाध्यायस्य चतुर्थः पादः॥**

**॥ अथ षोडशाध्याय्यां दशमस्य पञ्चमः पादः॥**

**॥ एकदेशग्रहणे प्राथमिकानामेव ग्रहणाधिकरणम्॥**

**सू. आनुपूर्व्यवतां एकदेशग्रहणेषु आगमवत् अन्त्यलोपःस्यात्॥**

(मू) "द्यावापृथिव्यामेककपालं वैष्णवं त्रिकपालमिति एकदेशग्रहणं समस्तवचनमपि "आग्नेयमष्टाकपालं निर्वपेदि"ति। तथा "द्विरात्रेण यजेत त्रिरात्रेण यजेत चतूरात्रेण यजेत पञ्चरात्रेण यजेत षड्रात्रेण यजेत सप्तरात्रेण यजेत अष्टरात्रेण यजेत नवरात्रेण यजेत दशरात्रेण यजेत एकादशरात्रेण यजेतेत्येकदेशग्रहणं, "द्वादशाहेन प्रजाकमं याजयेदि"ति समस्तग्रहणं, तथा "एकां सामिधेनीमन्वाह तिस्रः सामिधेनीरन्वाहे"त्येकदेशग्रहणं, "पञ्चदश सामिधेनीरन्वाहे"ति समस्तग्रहणम्। तत्र संशयः किमेकदेशग्रहणेषु विकृतिषु प्राकृतीनामेकदेश उपादातव्ये अभितो मध्यतोऽन्ततो वा विक्ल्पेन उपादानमुत आदित एवेति।

तत्र विशेषाग्रहणा द्विकल्पेनोपादानमिति प्राप्ते, ब्रूमः। उपस्थितस्य मुख्यस्य परित्यागे कारणभावाददित एवोपादानमिति। कपालानामन्तदेशाभ्यां विशेष इति बोध्यम्॥

॥ श्रीः ॥

## ॥ अथ दशमस्य पञ्चमः पादः ॥

(टि) उपस्थितस्येति। कपालोपधानात् प्राचीनेन पदार्थेन प्रथमं कपालमुपस्थाप्यते तेन च द्वितीयं तेन तृतीयमित्येवं क्रमेणोपात्तेषु अवशिष्टानि प्रयोजनाभावाल्लुप्यन्ते। एवं सर्वत्रेति भावः।

### ॥ एकत्रिक आद्ये तृचे गानाधिकरणम् ॥

### सू. एकत्रिके तृचादिषु माध्यन्दिने छन्दसां श्रुतिभूतत्वात्॥

(मू) अस्त्येकत्रिकः क्रतुः "अथैकत्रिक" इति। तत्र श्रूयते "तस्यैकस्यां बहिष्पवमानं तिसृषु होतुराज्यं एकस्यां मैत्रावरुणस्य तिसृषु ब्राह्मणाच्छंसिनः एकस्यामच्छावाकस्य तिसृषु माध्यन्दिनः पवमान इति। तत्र माध्यन्दिने पवमाने संशयः-किं चोदकप्राप्तानां गायत्रबार्हतत्रैष्टुभानां त्रयाणामृचामाद्या ऋच उपादातव्या उताद्यास्तृचः सकल उपादातव्य इति। तत्र प्रकृतौ श्रुत्या विहितस्य चोदकप्राप्तस्य त्रिवृच्छन्दस्त्वस्यानुग्रहात् तृचानामाद्या ऋच उपादातव्या इति प्राप्ते।



ब्रूमः। क्रमप्राप्तपरित्यागे काराणाभावात् आद्यस्तृच उपादातव्य इति। अत्रेदमवधेयम्-प्रकृतौ श्रमात् श्रुतिर्बलीयसी विकृतौ तु शीघ्रोपस्थापकत्वात् क्रमस्यैव बलवत्त्वं प्रथमोपस्थापकत्वं हि प्रमाणानां बलवत्त्वे निदानमिति।।

(टि) नन्वाद्यया गायत्र्या द्वितीया गायत्र्युपस्थाप्यते न तु द्वितीयस्य तृचस्याद्या बृहती। सा च तृतीयया गायत्र्योपस्थाप्यते। तेन पाठक्रमबलादाद्यस्तृच एवोपादातव्य इति यदि ब्रूयादत आह-श्रुत्या विहितस्येति। पाठाच्छ्रुतेर्बलीयस्त्वमिति भावः। कथं क्रमेण श्रुतेर्बाध इत्यत्राहात्रेदमित्यादिना॥

### ॥ एकस्यामृचि धूर्गानाधिकरणम् ॥

### सू. त्रिकस्तृचे धुर्ये स्यात्॥

(मू) अस्त्येकत्रिकः क्रतुः "अथैकात्रिक" इति। तत्र व्यतिषङ्गेण एकस्यां तिसृषु च स्तोत्राणि सम्पाद्यमानानि तत्र चोदकप्राप्तानि धूर्गानसम्पाद्यानि स्तोत्राणि। तान्यपि व्यति षङ्गेणैव एकस्यां तिसृषु च सम्पाद्यानि। तेषु यत्त्रिकसम्पादद्यं तत्र संशयः-किं तिसृषु ऋक्षु स्तोतव्यं उत एकस्या ऋचोऽभ्यासेनेति।

तत्र चोदकानुग्रहात् तिसृषु ऋक्ष्विति प्राप्ते,

ब्रूमः। "आवृत्तं धूर्षु स्तुवत" इति वचनात् अभ्यासेन स्तोतव्यमिति॥

(टि) चोदकानुग्रहादिति। "आवत्तं धूर्षु स्तुवत" इति वचनं तु तिसृष्वप्यृक्षु गीयमानस्य साम्नः प्रत्येकमावृत्तेस्तदभिप्रायेणानुवादमात्रमिति भावः। यदि सामावृत्तिरत्र श्रूयेत तर्ह्येवं स्यान्न तु सा श्रूयते किन्तु स्तोत्रावृत्तिः। गुणकथनं च स्तोत्रं, तच्चैकस्यामृचि क्रियमाणमेव आवृत्तं भवति। ऋग्भेदे हि गुणकथनप्रकारभेदान्नावृत्तं स्यादित्यभिप्रायेणाह-आवृत्तमिति॥

### ॥ द्विरात्रादिषु दशारात्रस्य विध्यन्तानुष्ठानाधिकरणम् ॥

सू. चोदनासु त्वपूर्वत्वात् लिङ्गेन धर्मनियमःस्यात्॥

(मू) सन्ति द्विरात्रादयः-"द्विरात्रेण यजेते"त्येवमादयः। तेषु संशयः-किं द्वादशाप्यहानि आदितः प्रवर्तन्ते उत प्रायणीयोदयनीयौ वर्जयित्वा मध्यतो दशरात्रः प्रवर्तत इति।

तत्र विशेषाभावात् द्वादशाप्यहानि प्रवर्तन्त इति प्राप्ते।

ब्रूमः। द्विरात्रे "यत् प्रथमं तद् द्वितीयं यद् द्वितीयं तत् तृतीयं जगतीमन्तर्यन्ती"ति दर्शनात् दशरात्रः प्रवर्तत इति। यद् द्विरात्रस्य प्रथममहः तद् द्वादशाहस्य द्वितीयं यद् द्विरात्रस्य द्वितीयं तद् द्वादशाहस्य तृतीयं यत्तु (यद् द्वादशाहस्य) तृतीयं (तत्) द्वादशाहस्य चतुर्थं जगतीं जागतं तदन्तर्यन्ति वर्जयन्तीत्यर्थः। ततश्च दशारात्रविध्यन्तः प्रवर्तत इति सिद्धमिति। एवं त्रिरात्रादिष्वापि॥

(टि) दर्शनादिति। यदि द्वादशाहे मध्यमस्य दशरात्रस्य पृथग्सङ्घातक्लृप्तिर्नास्ति तदा द्वादशाप्यहानि प्रवर्तेयुः। अस्ति तु सा "पृष्ठ्यादारभ्य प्रथममहरित्यादिव्यवहारात् "अविवाक्यं दशममिति व्यवहाराच्च। सति च दशरात्रसङ्घाते लिङ्गविशेषैस्तस्यैव प्रवृत्तिरवधार्यत इति भावः॥

॥ अग्नौ धूननाद्यर्थानां मन्त्राणां अनियमेनोपादानाधिकरम्॥

सू. अपूर्वासु तु संख्यासु विकल्पः स्यात् सर्वासामर्थवत्वात्

(मू) अग्नावाधूननार्था मन्त्राः-"केशीनां त्वा वर्त्मना धूनोमी"त्यादयः। तान् प्रकृत्य श्रूयते-"सप्तभिराधूनोती"ति। तथाग्नौ वपनार्था मन्त्राः "या जाता ओषधय"इत्यादयः। तानपि प्रकृत्य श्रूयते-"चतुर्दशभिर्वपती"ति। तत्र संशयः-किमाद्योपादानमन्त्यलोपश्च उतादितो मध्यतोऽन्ततो वा सप्तानां चतुर्दशानां चोपादानमित्यनियम इति।

॥ तत्र क्रमानुग्रहादाद्योपाददनमिति अनियम इति।

॥ तत्र क्रमानुग्रहादाद्योपादनमिति प्राप्ते।



ब्रूमः। बलीयसा प्रकरणेन सर्वेबामङ्गत्वावगमात् अनुग्रहाय क्रमं बाधित्वा अनियम इति॥

(टि) कपालादिवैषम्यं दर्शयति अतिदेश इत्यादिना॥

॥ विवृद्धस्तोमकेऽप्राकृतानां साम्नामागमाधिकरणम्॥

सू. स्तोमविवृद्धौ प्राकृतानामभ्यासेन सङ्ख्यापूरणमविकारात् संख्यायां गुणशब्दत्वादन्यस्यचाश्रुतित्वात्॥

(मू) विवृद्धिस्तोमकाः क्रतवः श्रूयन्ते-"एकविंशेनातिरात्रेण प्रजाकामं याजयेत् त्रिणवेनौजस्कामं त्रयस्त्रिंशेन प्रतिष्ठाकाममि"ति। तत्र संशयः-किं प्राकृतानां साम्नामभ्यासेन सङ्ख्या पूरयितव्या उत प्राकृतानामागमेनेति। तत्राविशेषादनियमः अथवा अन्येषामश्रवणात् प्राकृतानामभ्यासेन सङ्ख्या पूरयितव्यति प्राप्ते।

ब्रूमः। पृथक्त्वनिवेशिन्या सङ्ख्यया मुख्यपृथक्त्वसिध्यर्थं आगमाक्षेपात् अप्राकृतानामागमेन सङ्ख्या पूरयितव्येति।

अत्रेदमवधेयम्-साम्नामेवागमः नर्चाम्। स च गायत्रीबृहत्यनुष्टुप्सु प्राकृतीष्वेव। ताश्च गायत्र्यादः पवमान एवेति पवमानविषयः प्राकृतीष्वेव। ताश्च गायत्र्यादः पवमान एवेति पवमानविषयः सामागमः स्तोत्रान्तरेषु त्वगत्याभ्यास इति। यत्र तु "एकादश प्रयाजानित्यादौ सङ्ख्येयविशेषं प्रयाजादिकमनूद्य सङ्ख्या विधीयते तत्राभ्यासः। यत्र तु सङ्ख्येयं नो पात्तं "एकविंशेनातिररात्रेणेत्यादौ तत्रोक्तन्यायादागम इति विवेक इति॥

(टि) पूर्वपादोक्तनियमेन सहलब्धमर्थमाह अत्रेदमित्यादिना॥

॥ बहिष्पवमान ऋगागमाधिकरण॥

सू. बहिष्पवमाने तु ऋगागमः सामैकत्वात्॥

(मू) वृद्धिस्तोमकेष्वेव क्रतुषु संशयः - किं बहिष्पवमानेऽपि सामागमः उत सामागमासम्भवात् ऋगागम इति। पूर्वन्यायात् ऋगागम इति प्राप्ते।

ब्रूमः। "यदुत्तरोयोः पवमानयोः तृचाय करोति अथ कस्माद्बहिष्पवमाने सकृदेव हिङ्करोतीति एकं हि तत्र सामेति ब्रूयात् स्वारमेव गायत्रमित्येकसामत्ववचनात् सामागमासम्भवात् ऋगागम इति। अयमत्र विवेकः-बहिष्पवमाने ऋगागमेन स्तोत्रीया सङ् ख्या पूरयितव्या माध्यन्दिनार्भवमवमानयोस्तु सामागमेन स्तोत्रान्तरेषु तु सामाभ्यासेनेति॥

(टि) वचनादिति। न चाभ्यासेन सङ्ख्यापूरणं "पराङ्बहिष्पवमानेन स्तुवीतेत्यनभ्यासवचनेन पराङ्शब्देनाभ्याससस्य श्रुत्यैव प्रतिषिद्धित्वादिति भावः॥

## ॥ सामिधेनीष्ववशिष्टानामागमेन सङ्ख्यापूरणाधिकरण्॥

## सू. अभ्यासेन तु सङ्ख्यापूरणं सामिधेनीष्वभ्यासप्रकृतित्वात्।

(मू) स्तो दर्शपूर्णमासौ। तत्र काम्याः सामिधेनीकल्पाः "एकविंशतिमनुब्रूयात् प्रतिष्ठाकामस्य एकविंशस्तोमानां प्रतिष्ठित्यै चतुर्विंशतिमनुब्रूयात् ब्रह्मवर्चसकामस्य दश वा विंशतिं वा त्रिंशतं वा अनुब्रूयादन्नकामस्य द्वात्रिंशतमनुब्रूयात् प्रतिष्ठाकामस्य षड्विंशतिमनुब्रूयात् पशुकामस्ये"त्यवमादयः-। तत्र सामिधेनीयवृद्धिषु संशयः किं प्राकृतीभ्य एकादशभ्यः अधिकानामागमेन सङ्ख्या पूरणं उत प्रथमोत्तमयोरेव यावत्पूरणमभ्यासेन सङ्ख्यापूरणं अथवा प्रथमोत्तमयोः त्रिरभ्यासं कृत्वा अवशिष्टानामागमेन सङ्ख्यापूरणमिति। तत्र पूर्वन्यायात् प्राकृतीभ्योऽधिकानामागमेन सङ्ख्या पूरणमिति चेत्। उच्यते। "त्रिः प्रथमामन्वाह त्रिरुत्तमामिति प्रथमोत्तमयोरभ्यासविधानात् प्रथमोत्तमयोरेव यावत्पूरणमभ्यासेन सङ्ख्यापूरणमित्येवं प्राप्ते।

ब्रूमः। "त्रिः प्रथमामन्वाह त्रिरुत्तमामि"ति प्रथमोत्तरयोस्त्रिरभ्यासस्यैव विधानात् प्रथमोत्तमयोस्त्रिरभ्यासं कृत्वावशिष्टानामाग्नेयीनां दाशतयीभ्य आगमेन सङ्ख्यापूरणमिति।



इदमत्रावधेयम्-सर्वत्रागमे विधीयमाना सङ्ख्यैवागम्यमानानां सङ्ख्येयानां कर्माङ्गत्वे प्रमाणमिति॥

(टि) पूर्वन्यायादिति। पृथक्त्वनिवेशिन्या सङ्ख्यया गमाक्षेपादित्यर्थः। अभ्यासविधानादिति। पूरणसङ्ख्याभिप्रायश्च त्रिशब्दस्त्रित्व-स्वरूपपरपत्वे ह्यदृष्टार्थता स्यादिति भावः। यदि पूरणसङ्ख्या यास्त्रित्वस्य च सम्प्रतिपत्तिः स्यात्तदा पूरणसङ्ख्याभिप्रायस्त्रित्वस्य च सम्प्रतिपत्तिः स्यात्तदा पूरणङ्ख्याभिप्रायस्त्रिशब्दः स्यात्। न त्वेतदस्ति द्विश्चतुरभ्यासेनापि तत्पूरणसम्भवात् तस्मात्रित्वमपि विवक्षितमेवेत्याशयेनाह-त्रिरभ्यासस्यैवेति। अभ्यास मात्रविधानमेवकारेण व्यावर्त्यते।

ननु किमागम्यमानानां कर्मसम्बन्धे प्रमाणं, न तावल्लिङ्गात् तस्याग्र्यदिस्वरूपमात्रविषयत्वेन क्रत्वर्थत्वे प्रामाण्यासम्भवात्। सर्वत्र हि लिङ्गं यत्किञ्चित्प्रमाणकक्रतुसामान्यसम्बन्धमपेक्ष्य द्वारविशेषमात्रे प्रमाणं, तन्मात्रसामर्थ्यात्। नचान्यदपि किञ्चित् प्रमाणं पश्याम इत्यात्राह-इदमत्रेत्यादिना॥

## ॥ षोडशिनां प्राकृतत्वाधिरणम्॥

## सू. षोडशिनो वैकृतत्वं तत्र कृत्स्नविधानात्।

(मू) अस्ति ज्योतिष्टोमे षोडशी-"य एवं विद्वान् एवं षोडशिनं गृहीते भवत्यात्मना परास्य भ्रातृव्यो भवति "इति। स च "षोडशिना वीर्यकाम इति पुरुषार्थतया विहितः। पुनश्च क्रत्वर्थतयापि श्रूयते-"अप्यग्निष्टोमे राजन्यस्य गृह्णीयात् अप्युक्थ्ये ग्राह्यः अतिरात्रे ब्राह्मणस्य उत्तरेऽहन् द्विरात्रस्य गृह्यते मध्यमे त्रिरात्रस्य चतुर्थेऽहन्नहीनस्य गृह्यत" इति। तत्र क्रत्वर्थषोडशिनं प्रति संशयः किमयं षोडशी विकृतिष्वेवोत्कृष्टव्यः उत प्रकृतौ स्यादिति। तत्र "उत्तरेऽहन् द्विरात्रस्य गृह्यत" इत्यादिवाक्यैः विकृतिसम्बन्धावगमात् प्रकरणं बाधित्वा विकृतिष्वेवोत्कृष्टव्य इति प्राप्ते।

ब्रूमः। ''अप्यग्निष्टोम'' इत्यादिभिः प्रकरणाविरोधिवाक्यैः प्रकृतिसम्बन्धावगमात् प्रकृतौ स्यात्। ''उत्तरेऽहन्द्विरात्रस्ये''त्यादिवाक्यानि तु विकृतिष्वनैमित्तिकत्वेन विधानार्थानीति।।

(टि) क्रत्वर्थषोडशिनमिति। एतच्च पुरुषार्थस्य षोडशिनः प्रकृतिविकृत्यर्थचिना (न्ता) न युक्तेति शङ्कानिरासार्थमुक्तम्। सम्बन्धावगमादिति। अप्यग्निष्टोमे राजन्यस्येत्यादिवचनं तु वैकृताग्निष्टोमाभिप्रायम्। अतो न विरोध इत्यभिप्रायः। प्रकरणाविरोधीति। अनेन पूर्वपक्षः परिहृत इति बोध्यम्। अनैमित्तिकत्वेनेति। प्रकृतौ हि राजन्यादिनिमित्तेन विहित इति न वैयर्थ्यमिति॥

॥ आग्रयणादेव षोडशिग्रहणाधिकरणम्॥

सू. तस्याग्रयणाद् ग्रहणम्॥

(मू) अस्ति षोडशी-''य एवं विद्वान् एतं षोडशिनं गृह्णिते भवत्यात्मना परास्य भ्रातृव्यो भवतीति। तत्रैव संशयं-किमयं षोडशी विकल्पेन समुच्चयेन वाग्रयणोक्थ्याभ्यामुभाभ्यां गृहीतव्य उताग्रयणादेवेति। तत्राग्रयणात् गृह्णाति उक्थ्याद् गृह्णातीति वाक्यद्वयादुभाभ्यां गृहीतव्य इति स्थितेऽन्तराचिन्ता।

(टि) इदानीं षोडशिप्रसङ्गात् कुतस्तस्य ग्रहणमिति चिन्त्यते। अन्तराचिन्तेति। विचित्रगतिरेषा न तु मूलाधिकरणसिद्धान्ते स्थिते शङ्कानुदयादिति ध्येयम्॥

॥ तृतीयसवन एव षोडशिग्रहणाधिकरणम्॥

सू. तृतीयसवने वचनात् स्यात्॥

(मू) अस्ति ज्योतिष्टोमः। तत्र श्रूयते-''यत् षोडशी गृह्यत इन्द्रियमेव वीर्यमात्मन् धत्त" इति। किं षोडशी सवनत्रयेऽपि ग्राह्य उत तृतीयसवन एवेति तत्र संशयः। ''प्रातस्सवने ग्राह्यो माध्यन्दिने सवने ग्राह्यः



तृतीयसवने ग्राह्य''इति सवनत्रयेऽपि विधानात् सवनत्रयेऽपि ग्राह्य इति प्राप्ते।

ब्रूमः। प्रातस्सवन इत्यादिना सवनत्रये ग्रहणमुपक्रम्य यत् प्रातस्सवने गृह्णीयादित्यादिना सवनद्वयं निन्दित्वा पुनस्तृतीयसवने ग्राह्य तृतीयसवने विधानात् तृतीयसवन एव ग्राह्य इति।

एवं हि श्रूयते प्रातस्सवने ग्राहः-''ते जो वै प्रातस्सवनं तेजस एव वज्रं निर्मिमीते माध्यन्दिने सवने ग्राह्यः ओजो वै माध्यन्दि नं सवनं ओजस एव वज्रं निर्मिमीते तृतीयसवने ग्राह्यः पशवो वै तृतीयसवनं पशुभ्य एव वज्रं निर्मिमीते यत् प्रातस्सवने गृह्णीयात् वज्र उत्तरे सवने ह्यतिरिच्येते यन्माध्यन्दिने सवने मध्यतो वै वज्रः निहन्यात् तृतीयसवने ग्राह्यः तत् सर्वेषु सवनेषु गृह्णाति न पूर्वे सवने आर्तिंनीत इति। अन्तराचिन्ता वैचित्र्यार्था।

स्थितादुत्तरम्। ''आग्रयणात् गृह्णाति उक्थात् गृह्णाती ''त्यस्य उक्थ्यादूर्ध्वकालमाग्रयणात् गृह्णतीत्यर्थादाग्र णादेव ग्राह्य इति। ''पराञ्च मुक्थ्यात् षोडशिनं गृह्णातीति शाखान्तराधीतवाक्यसमानार्थत्वस्वीकारस्य न्याय्यत्वात् ''उक्थ्यात् गृह्णातीत्यात्रापि दिक्छब्दयोगलक्षणा पञ्चमी नापादाने। ततो नोभाभ्यां ग्रहणमिति॥

(टि) इत्यत्रापि दिक्छब्दयोगेति। अयमाशयः-''पराञ्चमुक्थ्यादित्यत्र हि पराक्छब्दो दिक्छब्दः न तु पराचीः सामिधेनीरितिवदभ्यासवचनः अभ्यासस्यात्राप्राप्तत्वेनानर्थक्यप्रसङ्गात्। तस्मात् ''पराञ्चमुत्थ्यादित्यत्र दिक्छब्दयोगलक्षणैव पञ्चमी। तत्समानार्थत्वादत्रापि सैव पञ्चमीति। न चावश्यं दिग्छब्दयोग एवानया भवितव्यं, वृत्तादनन्तरस्य ''मासात् प्रवक्ष्यामी"त्यादिपप्रयोगदर्शनात् सहयुक्ततृतीयावदर्थमात्रापेक्षा ''अन्यारादितरेत्य"त्रापि युक्तग्रहणसत्वादिति॥

॥ षोडशिग्रहस्य सस्तोत्रशस्त्रताधिकरणम्॥

सू. उक्थ्याग्निष्टोमसंयोगात् अस्तुतशस्त्रः स्यात् सति हि संस्थान्यत्वम्।

(मू) षोडशिनं प्रकृत्याम्नायते-"अप्यग्निष्टोमे राजन्यस्य गृह्णीयात् अप्युक्थ्ये ग्राह्य इति। तत्र संशयः - किमग्निष्टोमोक्थ्ययोः ग्राह्यषोडशी अस्तुतशस्त्र उत सस्तुतशस्त्र तत्रास्तुतशस्त्रः स्यादन्यथाग्निष्टोमोक्थ्य-संस्थत्वोपमर्दन शेष...संस्थत्वप्रसङ्गादिति प्राप्ते, ब्रूमः। षोडशिग्रहणद्वारा षोडशिसंस्थाया एव विधानात् सस्तुतशस्त्र इति॥

(टि) इदमप्यधिकरणं प्रासङ्गिकम्। अन्यथेति। अयमाशयः अग्निष्टोमादिशब्दा हि स्तोत्रसंस्थानिमित्ताः। ततश्च षोडशिस्तोत्रे कृते षोडशिसंस्थात्वं स्यात्। तत्राग्निष्टोमसंस्थात्वस्य उक्थ्यसंस्थात्वास्या-भावादग्निष्टोमे गृह्णीयात्। उक्थ्ये ग्राह्य इति वचनद्वयमपि विरुध्येतेति। राजन्यस्याग्निष्टोमोक्थ्यसंस्थयोः प्राप्तयोः षोडशिसंस्थैवात्र विधीयते। अतो न संस्थान्यत्वापत्तिर्दोषाय भवतीत्याशयेनाह षोडशीत्यादिना। राजन्यस्य नाग्निष्टोमसंस्थः क्रतुः, नाप्युक्थ्यसंस्थः किन्तु षोडशिसंस्थ एवेति वचनस्यार्थ इति भावः। सस्तुतशस्त्र इति। "एकविंशस्तोत्रं भवति प्रतिष्ठित्यै हरिवच्छस्यत"इति विहितं स्तोत्रशस्त्रमसति वचनविरोधे किमिति न क्रियेतेति भावः॥

॥ अङ्गिरसां द्विरात्रे षोडशिनः परिसङ्ख्याधिकरणम्॥

सू. अभावादतिरात्रेषु गृह्येत॥

(मू) सन्ति हि बहवो द्विरात्राः। तेष्वङ्गिरसां द्विरात्रे श्रूयते "वैखानसं पूर्वेऽहन् साम भवति षोडश्युत्तर" इति। तत्र संशयः-किमत्र षोडश्युत्तर इत्यनेन अप्राप्तस्य षोडशिनो विधानं उत प्राप्तस्य परिसङ्ख्यानमिति। तत्र प्रत्यक्षविशेषशास्त्रस्य षोडश्युत्तर इत्यस्य प्रवृत्तेः प्रागानुमानिकेन चोदकेन सामान्यशास्त्रेण "उत्तरेऽहन् द्विरात्र इत्यनेन च प्राप्त्यभावादप्राप्तस्य विधानमिति प्राप्ते।

ब्रूमः। वाक्यात् प्रकरणं बाधित्वा प्राप्तस्य परिसङ्ख्यानमिति। तथाहि-



"उत्तरेऽहन् द्विरात्रस्य गृह्यत"इति सामान्यशास्त्रम्। तत्र तु वाक्ययोर्द्विरात्रसंयोगः "षोडश्युत्तर" इति विशेषशास्त्रं। तत्र प्रकरणात् द्विरात्रसंयोगः। प्रकरणं च वाक्याद् दुर्बलमिति, तेनाङ्गिरसां द्विरात्रे नियमः द्विरात्रान्तरेषु चोदकप्राप्तो विकल्प इति। एतद्वृत्तिकारमतम्। किमत्र प्राप्तस्य परिसङ्ख्यानं उत विधानम्। नापि परिसङ्ख्यानं किन्तु वैखानसविधिशेषोऽयमिति संशयः। तत्र पूर्वन्यायात् परिसंख्यानमिति प्राप्ते।

ब्रूमः। परिसङ्ख्यायास्त्रिदोषत्वाद्वैखानसविधिशेषोऽयमिति। तस्मात् सर्वद्विरात्रेषु उत्तरेषामह्नां नियतषोडशीति भाष्यकारमतमिति॥

(टि) अत्रापि षोडशिन एव बाधाबाधचिन्ता। वाक्यादिति। अनारभ्याधीतेन वाक्येन प्रकरणं बाधित्वा प्राप्तस्य परिसङ्ख्यार्थं वचनमित्यगत्या कल्प्यत इति वृत्तिकाराशयः। भाष्यकारमतं दर्शयति किमत्रेत्यादिना। त्रिदोषत्वादिति। किञ्च सत्यांगतौ प्रदेशान्तराम्नातेनोपसंहारो न युक्तः। अस्ति चास्य वैखानसविधिस्तावकतया गतिः। अपि चानारभ्यविधिर्वाक्यीयेन शीघ्रत्वात् न मन्थरेण प्राकरणिकेनोप संहर्तुं शक्यत इति भाष्यकाराभिप्रायः।।

॥ नानाहीने षोडशिग्रहग्रहणाधिकरणम्॥

सू. चतुर्थे चतुर्थेऽहन्यहीनस्य गृह्यत इत्यभ्यासेन प्रतीयेत भोजनवत्॥

(मू) षोडशिग्रहं प्रकृत्य श्रूयते-"चतुर्थेऽहन्यहीनस्य गृह्यत "इति। तत्र संशयः-किमेकस्यैवाहीनस्य चतुर्थेऽहनि गृहीत्वा पुनस्ततश्चतुर्थ इत्येवमभ्यासेन गृहीतव्य उत नानाहीनेषु चतुर्थेऽहनि गृहीतव्य इति।

तत्राहीनस्येत्येकवचनवीप्सयोः अनुग्रहादायसेन गृहीतव्य इति प्राप्ते। यद्यभ्यासेन ग्रहणं तर्हि चतुर्थे अष्टमे च गृह्यत इति वक्तव्यत्वान्नानाहीनेषु गृहीतव्य इति जातावेकवचनं वीप्सानुवादश्चेति बोध्यम्॥

(टि) इदमपि प्रासङ्गिकम्। एकवचनवीप्सयोरिति। वीप्साया नानाहीनाभिप्रायत्वे न्यायप्राप्तार्थत्वेनानर्थक्यं स्यादिति भावः। अष्टमे चेति। अयं भावः-एकस्याहीनस्यैकमेव चतुर्थमहः। यत्तु चतुर्थाच्चतुर्थं तदहीनस्याष्टमं तत्र गृह्णन्नाहीनस्य चतुर्थे गृह्णीयात्। तस्मात् अशक्यार्थमसदर्थं च वचनमापद्येतेति। अनुवाद इति। असदर्थकत्वादनुवादो वरमिति भावः॥

॥ विकृतौ ग्रहाणामाग्रयणाग्रतासाधकं जगति ऋगुत्पन्नसामतासाधकं इति वर्णकद्वयविशिष्टाधिकरणम्॥

सू. जगत्साम्नि सामाभावादृक्तः साम तदाख्यं स्यात्॥

(मू) ज्योतिष्टोमे श्रूयते-"यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान् ग्रहान् गृह्णीयात् यदि बृहत्सामा शुक्राग्रान् यदि जगत्सामा आग्रयणाग्रानि"ति। तत्र संशयः किमाग्रयणाग्रता प्रकृतौ निविशते उत विषुवति विकृतौ उत्कृष्यत इति। तत्र प्रकरणात् प्रकृतौ निविशत इति प्राप्ते।

ब्रूमः। जगत्सामशब्देन जगत्यृगुत्पन्नजगत्सामवतो विषुवतोऽभिधानात् तत्संयुक्ताग्रयणाग्रता विषुवत्युत्कृष्यत इति। अथवा "यदि जगत्सामाग्रयणानि"त्यत्र जगत्सामेति बहुव्रीहिः। तत्रैव जगत्सामशब्दे संशयः-किमनेन ज्योतिष्टोम उच्यते तत्रापि किं रथन्तरसामा बृहत्सामा वेति वाक्यविकल्पेनोच्यते उत जगच्छब्दः कृत्स्नवचनः कात्स्र्न्यं चोभयसामत्वे स्यादिति उभयसामा ज्योतिष्टोम उच्यते अथवा "यदि जगत्सामेत्य"स्यानर्थक्यप्रसङ्गात् जगच्छब्दो जगच्छब्दवाची, ततश्च जगच्छब्दवत्यामभीवत्यामुत्पन्नं रथन्तरमेव जगत्सामेति रथन्तरसामा ज्योतिष्टोम एव जगत्सामशब्देनोच्यते किंवा जगत्यामुत्पन्नं साम जगत्साम तत् यत्र विषुवति स विषुवान् जगत्सामशब्देनोच्यत इति। तत्र प्रकरणात् ज्योतिष्टोम उच्यते तत्राप्यविशेषात् विकल्पेनेति चेत्। उच्यते। एवं सत्याग्रयणाग्रतायाः पूर्वाभ्यां विकल्पप्रसङ्गात् जगच्छब्द



इत्याद्युक्तरीत्या उभयसामोच्यत इति।

अत्रोच्यते। "आग्रयणाग्रान् गृह्णीयादित्येतावतैव उभयाग्रयणाग्रताया उभयसामपक्षनिवेशसिद्धेः यदीत्याद्युक्तरीत्या रथन्तरसामैवोच्यत इति एवं प्राप्ते।

ब्रूमः। एवं सति जगच्छब्दस्य पदद्वारा लक्षणलक्षितसाम्नि लक्षितलक्षणाप्रसङ्गात् जगत्यामित्याद्युक्तरीत्या विषुवान् जगत्सामशब्देनोच्यत इति। न वेदमधिकरणम्॥

(टि) अत्रापि प्रासङ्गिकी चिन्ता। प्रकरणादिति। जगत्सामशब्देन ज्योतिष्टोम एव यथाकथञ्चिदुच्यत इति भावः। जगन्नाम साम न कुत्रचिदपि क्रतावस्ति। तस्मादृग्द्वारेणांव्यपदेशः तच्च विषुवत्येव विद्यते नान्यत्रेत्याशयेनाह-जगत्सामशब्देनेति।

अत्र द्वितीयं वर्णकं दर्शयति अथवेत्यादिना। न वेदमिति। एतत्तन्त्ररत्ने स्पष्टम्॥

॥ गोसवे उपवत्यग्रवत्योरभावाधिकरणम्॥

सू. उभयसाम्नि नैमित्तिकं विकल्पेन समत्वात् स्यात्॥

(मू) सन्ति उभयसामानः क्रतवः "संसव उभे कुर्यात्।" अभिजितावेकाहेऽपि श्रूयते "उभे बृहद्रथन्तरे कुर्यादिति। अस्ति तु प्रकृतौ "उपवतीं रथन्तरपृष्ठस्य प्रतिपदं कुर्यात् अग्रवतीं बृहत्पृष्ठ्यस्येति रथन्तरनिमित्तत्वेन बृहन्निमित्तत्वेन च प्रतिपद्द्वयं श्रुतम्। तदिह चोदकप्राप्तम्। तत्र संशयः-किमुभयमिह कर्तव्यं तत्रापि समुच्चय उत विकल्पः अथवा रथन्तरनिमित्तमेव कर्तव्यमाहो निमित्तविधातादुभयमपि कर्तव्यमति। तत्रोभयसामसु बृहद्रथन्तरोभयनिमित्तत्वात् उभयं कर्तव्यम्। तत्रासम्भावान्ना समुच्चयः विशेषग्रहणाद्विकल्प इति चेत्। उच्यते, मुख्यत्वाद्रथन्तर निमित्तमितीति प्राप्ते।

ब्रूमः। इतरेतरसापेक्षयोः क्रतुसम्बन्धयोःबृहद्रथन्तरयोरन्यतरेण

क्रतुविशेषणासम्भवात् निमित्तविघातादुभयमपि न कर्तव्यमिति ॥

(टि) सत्वादिति। सत्तया च तयोः क्रतुविशेषणत्वमिति भावः। बृहद्रथन्तरे हि प्रकृतौ निरपेक्षयात्मसत्तया परस्परव्यवच्छेदेन वा क्रतुं विशिङ्षती निमित्ततामुपगते। अत्र तु न तथा सम्भवतीत्याशयेनाह- इतरेतरेति।

॥ ऐन्द्रवायवस्य सर्वादावप्रतिकर्षाधिकरम् ॥

सू. ऐन्द्रवायवस्याग्रवचनादादितः प्रतिकर्षः स्यात् ॥

(मू) ज्योतिष्टोमे उपांश्वन्तर्यामावाघारग्रहौ विधाय ऐन्द्रवायवमैत्रावरुणादीनां धाराग्रहाणामुपक्रमे श्रूयते- "वाग्वा एषा यदैन्द्रवायवः यदैन्द्रवायवाग्रा ग्रहा गृह्यन्ते वाचमेवानुप्रयन्ति अण्व्या धारया गृह्णातीति, क्वचित् "वाचमेवावरुन्ध इति दृश्यते। तत्र संशयः- किमैन्द्रवायवाग्रा ग्रहा गृह्यन्त इत्यत्र सर्वग्रहानुवादेन एन्द्रवायवाग्रत्वं सर्वेषां ग्रहाणामङ्गत्वेन विधीयते. ततश्च उपांश्वन्तर्यामयोरपि (पूर्वमैन्द्रवायवो गृहीतव्यः) अवैगुण्यायैन्द्रवायवाग्रत्वरूपाङ्ग सम्पादनार्थं उपांश्वन्तर्यामयोरपि पूर्वमैन्द्रवायवो गृहीतव्यः उत धाराग्रहाधिकारस्थेनानेन धाराग्रहाणामैन्द्रवायवादीनां ग्रहणं विधीयते नैन्द्रवायवाग्रत्वं तस्य तेषां पाठादेव सिद्धेः। ततश्च पाठप्राप्ते स्वस्थाने तृतीयस्थान एवैन्द्रवायवो गृहीतव्य इति।

तत्र "ऐन्द्रवायवं गृहीयादित्यादिभिः वचनान्तरैरैन्द्रवायवादिग्रहणस्य प्राप्तत्वादग्रत्वं विधीयते ततश्चोपांश्वन्तर्यामयोरपि पूर्वं गृहीतव्य इति प्राप्ते।

ब्रूमः। श्रूत्यर्थविधिसम्भवात् ग्रहणं विधीयते। ततश्च स्वस्थान एव ग्रहीतव्य इति ॥

(टि) बाधप्रसङ्गादियं चिन्ता। श्रुत्यर्थेति। वक्ष्यमाणानामैन्द्रवायवादीनां संक्षेपेणायमुपक्रम इत्यर्थः। किमर्थं सङ्क्षेपेण विधानमिति चेदुत्तराधिकरणे वक्ष्यति।



॥ कामसंयोगेऽप्यैन्द्रवायवस्यादावप्रतिकर्षाधिकरणम् ॥

सू. कामसंयोगे तु वचनादितः प्रतिकर्षः स्यात्।।

(मू) ज्योतिष्टोमे "ऐन्द्रवायवाग्रा ग्रहा गृह्यन्त इति संक्षेपणोपक्रम्य "ऐन्द्रवायवं गृह्णातीत्यादिविस्तरवचनेभ्यः प्राक् कामसंयुक्तानि वचनान्याम्नातानि। तेषु "ऐन्द्रवायवाग्रान् गृह्णीयात् यः कामयेत यथापूर्वं प्रजां कल्पेरन्नित्यत्र संशयः-किमत्राग्रतागुणः कामे विधीयते ततश्च पूर्वोक्तवत् सर्वादित ऐन्द्रवायवस्य ग्रहणमुत ग्रहणमेव कामे विधीयते ततश्च स्वस्थाने ग्रहणमिति।

नित्यस्य ग्रहणस्य कामे विधानासम्भवादग्रतागुणः कामे विधीयते। ततश्च सर्पा (र्वा) दितो ग्रहणमिति प्राप्ते। ब्रूमः। श्रुत्यर्थविधिसम्भवात् ग्रहणं विधीयते। ततश्च स्वस्थाने ग्रहणमिति।

अत्रायं विवेकः-"ऐन्द्रवायवं गृह्णाती"त्यादिवाक्यैः ऐन्द्रवायवादिग्रहणानि विधीयन्ते। तेषां च प्रकरणात् क्रत्वर्थत्वं पाठाच्च ऐन्द्रावयवाग्रत्वं च सिद्धम्। तत्र कामयुक्तवाक्यात् प्राकरणिकक्रत्वर्थत्वं बाधित्वा पुरुषार्थत्वं प्राप्तम्। तत्र "ऐन्द्रवायवाग्रा ग्रहा इति वाक्यात् क्रत्वर्थं" च प्राप्तमित्यैन्द्रवायवायवाग्रत्वस्योभयार्थत्वम्। एवं च सर्वत्र श्रुत्यर्थविधिः स्यात् अन्यथाग्रताविधानवाक्येषु वाक्यार्थविधिः स्यात् स च सम्भवति श्रुत्यर्थविधानन्याय इति॥

(टि) गुणोऽपि विधीयमानः प्रकृतानाश्रित्य विधेयः। तेषां च पाठादैन्द्रवायवाग्रता प्राप्ता सती कामे विधातव्या। तद्वरं श्रुत्यर्थविधानाय ग्रहणमेव कामे विहितमित्याशयेनाह श्रुत्यर्थेनेति। नित्यस्य कामे विधानमित्येतदावयोकस्तुल्यम्। तव वाक्यार्थविधानं मम तु श्रुत्यर्थविधानमिति मत्पक्ष एव वरमिति भावः॥

॥ आश्विनाग्रादीनां ग्रहाणां प्रतिकर्षाधिकरणम् ॥

सू. परेषु चाग्रशब्दः पूर्ववत् स्यात्तदादिषु।

(मू) ज्योतिष्टोमे ऐन्द्रवायवात् परे ग्रहाः कामाय श्रूयन्ते "आश्विनाग्रान् गृह्णीयात् आमयाविनः शुक्राग्रान् गृहीयादभिचरतः मन्थ्यग्रान् गृह्णीयादभिचर्यमाणस्येति। "शुक्राग्रान् गृहीयात् प्रतिष्ठाकामः मन्थ्यग्रान् गृहीयादभिचरन्नि"ति तु क्वचित् दृश्यते। तत्र संशयः -किमत्र ग्रहणविधानादाश्विनादीनां स्वस्थाने ग्रहणमुताग्रताविधानात् प्रतिकर्ष इति।

तत्र श्रुत्यर्थविधिलाभात् नित्यानामाश्विनादिग्रहग्रहणानां कामे विधानात् स्वस्थाने ग्रहणमिति प्राप्ते।

ब्रूमः। कामे ग्रहणेषु च अग्रतायां विधीयमानेषु वाक्यभेदप्रसङ्गात् अग्रतामात्रविधानात् प्रतिकर्ष इति। पूर्वत्रैन्द्रवायवाग्रतायाः पाठतः प्राप्तेरविधेयत्वं। इह तु आश्विनाग्रतादीनामप्राप्तेर्विधेयत्वमिति विशेषः॥

(टि) पूर्वस्माद्वैषम्यं दर्शयति अत्रेत्यादिना॥

**॥ आश्विनादीनां ग्रहाणां ऐन्द्रवायवस्य पुरस्तात् प्रतिकर्षाधिकरणम्॥**

**सू. पुरस्तादैन्द्रवायवस्याग्रस्य कृतदेशत्वात्।**

(मू) ज्योतिष्टोमे ऐन्द्रवायवात् परे ग्रहाःकामादयः श्रूयन्ते "आश्विनाग्रान् गृह्णीयादामयाविनः शुक्राग्रान् गृह्णीयादभिचरतः मन्थ्यग्रान् गृह्णीयादभिचर्यमाणस्ये"ति। तत्र प्रतिकर्षः इति समधिगतम्। तत्र संशयः किं सर्वादितः प्रतिकर्षः इति समधिगतम् तत्र शंशयः किं सर्वादितः प्रतिकर्षः। उत ऐन्द्रवायवात् पूर्वमिति। तत्राविशेषात् सर्वादित इति प्राप्ते।

ब्रूमः। प्रकृतान् धाराग्रहान् ऐन्द्रवायवादीनाश्रित्याग्रतागुणविधानादैन्द्रवायवात् पूर्वं प्रतिकर्ष इति। ऐन्द्रवायवाग्रा ग्रहा इति वक्ष्याणानां साधारणेनोपक्रमस्य काम्याश्रयत्वसम्पत्तिरपि प्रयोजनमिति बोध्यम्॥

(टि) इदमपि संक्षेपविधेः प्रयोजनमिति दर्शयति - ऐन्द्रवायवेत्यादिना॥



ऐन्द्रवायवेत्यादिना॥

**॥ सादनस्यापि प्रतिकर्षाधिकरणम्॥**

**सू. सादनं चापि शेषत्वात्॥**

(मू) ज्योतिष्टोमे ऐन्द्रवायवात् परे ग्रहाः कामाः श्रूयन्ते "आश्विनाग्रान् गृह्णीयादामयाविनः शुक्राग्रान् गृह्णीयादभिचर्यमाणस्येति। तत्र ग्रहणानि प्रतिकृष्यन्त इति स्थितम्। तत्र संशयः किं तेषु साध (द) नमपि प्रतिकृष्यते न वेति। वचनाभावान्न प्रतिकृष्यत इति प्राप्ते।

ब्रूमः। सादनस्य ग्रहणशेषत्वात् तत्प्रतिकर्षे सादनमपि प्रतिकृष्यत इति॥

(टि) प्रसङ्गात् सादने चिन्ता किमित्यादिना॥

**॥ प्रदानस्याप्रतिकर्षाधिकरणम्॥**

**सु. प्रदानं चापि सादनवत्।**

(मू) ज्योतिष्टोमे ऐन्द्रवायवात् परे ग्रहाः कामाय श्रूयन्ते-"आश्विनाग्रान् गृह्णीयादामयाविनः शुक्राग्रान् गृह्णीयादभिचरतः मन्थ्यचग्रान् गृह्णियादभिचर्यमाणस्येति। तत्र ग्रहणं सादनं च प्रतिकृष्यत इति स्थितम्। तत्र संशयः-किं प्रदानं प्रतिकृष्यते न वेति। तत्र प्रदानस्य प्रदानार्थग्रहणसम्बन्धात् ग्रहणप्रतिकर्षे प्रदानमपि प्रतिकृष्यते इति प्राप्ते। ब्रूमः। अङ्गप्रतिकर्षे तदनुरोधेन प्रधानप्रतिकर्षासम्भवात् न प्रदानं प्रतिकृष्यत इति।

इदं त्ववधेयम्-यथावदानस्य प्रदानोपक्रमत्वं तथा न ग्रहणस्य प्रदानोपक्रमत्वमिति।।

(टि) तथा च न ग्रहणस्येति। धाराग्रहाणां पूर्वं पूर्वं गृहीत्वा सादयित्वा चोत्तरोत्तरस्य ग्रहणम्। सर्वेषु गृहीतेषु सादितेषु च पश्चात् क्रमेण प्रदानमिति हि तेषां नित्यक्लृप्तिः। अतो न ग्रहणस्य प्रदानोपक्रमत्वम्। अवदानस्थले तु नैवं नित्यक्लृप्तिरिति भावः॥

॥ त्र्यनीकायां ऐन्द्रवायवाग्रतोक्तेः समानविध्यर्थताधिकरणम् ॥

सू. त्र्यनीकायां न्यायोक्तेष्वाम्नानं गुणार्थं स्यात् ॥

(मू) द्वादशादे श्रूयते-"ऐन्द्रवायवाग्रौ प्रायणीयोदयनीयौ दशमं चाहः अथेतरेषां नवानामह्नामैन्द्रवायवाग्रं प्रथममहरथ शुक्राग्रमंथाग्रयणाग्रं अथैन्द्रवायवाग्रं अथ शुकाग्रमथा ग्रहणाग्रं अथैन्द्र वायवाग्रं प्रग्रमिति तत्र नवानामह्नां या प्रथम मेन्द्रवायवाग्रता द्वितीये शुक्राग्रता च श्रुता सानयोः रथन्तरसामत्वात् बृहत्सामत्वाच्च चोदकप्राप्ता। तत्र संशयः- किमर्थाचोदकप्राप्तानीति पुनः श्रूयते किमनुवादार्था उत परिसङ्ख्यार्था अथवार्थवादार्था किंवा अनैमित्तिकत्वेन विधानार्थेति। तत्र प्राप्तत्वादनुवादार्था इतिचेत्। उच्यते। अनुवादत्वे आनर्थक्यादङ्गान्तपरिसङ्ख्यार्थेति। अत्र वदामः। परिसङ्ख्यायाः त्रिदोषत्वादर्थवादार्थेतीति प्राप्ते।

ब्रूमः। प्रकृतौ नैमित्तिकत्वेन विधानादनैमित्तिकत्वेन विधानार्थेति तस्य तयोर्विकृतिषु असत्यह रथन्तरसामत्वे बृहत्सामत्वे चैन्द्रवायवाग्रतायाः शुकाग्रतायाश्च सिद्धिः प्रयोजनमिति॥

॥ श्रूयत इति। एषा च त्र्यनीकेत्युच्यते। अग्रवचनोऽनीकशब्दः। त्रयाणामनीकानां समाहारस्त्र्यनीकेति॥

॥ व्यूढद्वादशाहस्य समूढविकारत्वाधिकरणम् ॥

सू. द्वादशाहस्य व्यूढसमूढत्वं पृष्ठवत् समानविधानं स्यात् ॥

(मू) ग्रहाग्रताविशेषात् द्विविधो द्वादशाहः समूढो व्यूढश्चेति। तत्र समूढः पूर्वोक्तः। अथ व्यूढ ऐन्द्रवायवाग्रौ प्रायणीयोदयनीयौ। अथेतरेषां दशानामह्नां ऐन्द्रवायवाग्रं प्रथममहः अथ शुक्राग्रं अथ द्वे आग्रयणाग्रे अथैन्द्रवायवाग्रं अथ द्वे शुक्रे अथाग्रयणाग्रं अथ द्वे ऐन्द्रवायवाग्रे इति। तत्र संशयः-किं व्यूढोऽवि (पि) प्रकृतिरुत समूढस्य काम्यो विकारो व्यूढ इति। तत्र व्यूढसमूढस्वरूपयोः क्रत्वर्थत्वेन विदानाविशेषात्



समूढवत् व्यूढोऽपि प्रकृतिरेवेति प्राप्ते।

ब्रूमः। अकामयुक्तवाक्योत्पन्नस्यापि व्यूढस्वरूपस्य वाक्यान्तरेण फले विधानात् समूढस्य विकारो व्यूढ इति॥ अत्रेदमवधेयम्-व्यूढस्वरूपस्य क्रत्वङ्गत्वे व्यूढस्य प्रकृतित्वं पुरुषार्थत्वे विकारत्वम्। तत्रोत्पन्नस्य व्यूढस्वरूपस्य प्रकरणात् क्रत्वङ्गत्वं वाक्याच्च पुरुषार्थत्वमिति वाक्येन प्रकरणबाधाद्विकारत्वमिति॥

(टि) इदमपि प्रासङ्गिकम्। समूढवत् व्यूढोऽपि प्रकृतिरिति। एकस्य तूभयत्वे संयोगपृथक्त्वमिति न्यायेन क्रत्वर्थता पुरुषार्थता चेति भावः। फले विधानादिति। अयमाशयः-न दध्यादिवत् व्यूढस्योभयार्थत्वं युक्तम्। तत्र हि दधीन्द्रियसम्बन्धं विदधद्वाक्यं लोकतो दधिस्वरूपं प्रकरणाच्चाश्रयं लब्ध्वा न "दध्ना जुहोती"ति विधिमपेक्षते अतस्तत्रान्योन्यनिरपेक्षेण वाक्यद्वयेन पृथगेव विधानात् संयोगपृथक्त्वम्। इह तु व्यूढस्वरूपस्य लोकतोऽसिद्धेरवश्यं वाक्यान्तरसिद्धैकव्यूढोत्पत्तिः कामवाक्येन फले विधातव्या। ततश्च वाक्येन फललाभान्निराकाङ्क्षं व्यूढोत्पत्तिवाक्यं न प्रकरणेन क्रत्वङ्गता प्रयोजनसिध्यर्थं भजत इति न संयोगपृथक्त्वमिति। अमुमेवार्थं मनसि निधायाह-अत्रेदमित्यादि॥

॥ संवत्सरसत्रेऽनीकानां वृद्ध्यधिकरणम् ॥

सू. एकादशिनवत् त्र्यनीका परिवृत्तिः स्यात् ॥

(मू) गवामयनं नाम संवत्सरसत्रम्॥ तत्र एकषष्ट्यधिक- शतत्रयाण्यहानि। तत्राशीतिशतं पूर्वं पक्षः तथोत्तरं मध्ये विषुवान्। तत्राहः क्लृप्तिं ताण्डकिनः समामनन्ति "प्रायणीयं प्रथममहः चतुर्विंशं द्वितीयं ततश्चत्वारोऽभिप्लवाः षडहाः एकः पृष्ट्यः षडहः समासः स द्वितीयः स तृतीयः स चतुर्थः स पञ्चमः ततस्त्रयोऽभिप्लवाः षडहाः एकःपृष्ट्यः षडहः अभिजिन्नामैकाहः त्रयः स्वरसामान इति। अष्टाविंशतिरहानि आद्वाभ्यामहोभ्यां सह षणमासाः तदिदं पूर्वं पक्षः ततो

विषुवान् अथोत्तरं पक्षः यत्र (त्रयः) स्वरसामानः विश्वजिन्नामैकाहः पृष्ठ्यः षडहः त्रयस्त्रिंशारम्भणः त्रयोऽभिप्लवाः षडहाः तान्यष्टाविंशतिरहानि पुनः पृष्ठयः षडहः त्रयस्त्रिंशारम्भणाः चत्वारोऽभिप्लवाः समासः स द्वितीयः स तृतीयः स चतुर्थः ततस्त्रयोऽभिप्लवाः गौरायुर्गौरिति। द्वे अहनी द्वादशाहस्य दशाहानि महाव्रतं चातिरात्रं चेति द्वात्रिंशदहानि आद्यैः अष्टाविंशत्यहोभिः सह षण्मासाः।

तत्र द्वादशाहस्य प्रायणीयोदयनीयमध्यवर्तिनी त्र्यनीका चोदकेन प्राप्ता। अग्रवचनोऽनीकशब्दः। त्रयाणामग्राणामैन्द्रवायवशुक्राग्राग्रयणाग्राणां समाहारस्त्र्यनीका। अथवा चोदकेन त्र्यनीका न प्राप्यते। किन्तु ऐन्द्रवायवाग्रं प्रथममहः अथ शुक्राग्रमथाग्रयणाग्रमथैन्द्रवायवाग्रमथ शुक्राग्रमथाग्रयणाग्रामिति प्रत्यक्षवचनेन विधीयते। तत्र संशयः किमेषा त्र्यनीका दण्डकलितवत् आवर्तनीया उत नवानामनीकानां स्वस्थानविवृद्धिरिति। तत्र प्राकृते वैकृते वा त्र्यनीकाविधानवाक्ये अहर्गणस्य श्रुतत्वादहर्धर्मभूता त्र्यनीका दण्डकलितत्वादवर्तनीयेति प्राप्ते।

ब्रूमः। उद्दिश्यमानस्य प्रथमस्याह्ना विशेषणासम्भवात् प्रथमादि यज्ञभाग धर्मत्वेन विधीयमानानां नवानामनीकानां स्वस्थानविवृद्धिरिति। अत्र त्र्यनीका चोदकप्राप्तेति भाष्यकारमतम्। प्रत्यक्षवचनविहितेति वार्तिककारमतमिति विवेकः।

(टि) त्र्यनीकाप्रसङ्गादिदमधिकरणम्। अथवा अहर्गणस्य विवक्षाबाधः प्रतिपाद्यते। अहर्धर्मभूतेति हेतुविशेषणम्। अहर्धर्मत्वे प्रायणीयानन्तरस्याह्नो धर्म ऐन्द्रवायवाग्रता तदनन्तस्य शुक्राग्रतेत्येवं नवस्वहस्वनुष्ठितेषु पुनरैन्द्रवायवाग्रं प्रथममित्येतदेवोपतिष्ठत इति दण्डकलितवदावृत्तिसिद्धिरिति भावः। वार्तिककारमतमिति। चोदका न्नामधेयस्य बलीयस्त्वान्न चोदकात् त्र्यनीकाप्राप्तिः किन्तु "ज्योतिर्गौरायुरिति नामधेयाज्ज्योतिरादि धर्मप्राप्ति स्तेषु च न त्र्यनीकेति



॥ व्युढे मन्त्राणां छन्दोव्यतिक्रमाधिकरणम्॥

सू. छन्दोव्यतिक्रमात् व्यूढे भक्षपवमानपरिधिकपालस्य मन्त्राणां यथोत्पत्तिवचनमूहवत् स्यात्॥

(मू) व्यूढे द्वादशाहे श्रूयते-"छन्दांसि वा अन्योन्यस्य लोकमध्यायन् गायत्री त्रिष्टुभः त्रिष्टुप् जगत्याः जगती गायत्र्या इति। तत्र संशयः-किं भक्षाणां पवमानानां परिधीनां कपालानां च मन्त्रार्थवादेषु गायत्र्यादिशब्दैरपलपितानां प्रातस्सवनिकमाध्यन्दिनसवनि-कतृतीयसवनिकानां मन्त्रगतानां च छन्दसां व्यतिक्रम उत मन्त्रगतानामेवेति तत्र विशेषाभावात् भक्षादीनां सर्वेषां व्यतिक्रम इति प्राप्ते।

ब्रूमः। मन्त्रगतानामेव छन्दसां व्यतिक्रमः तेषामेव गायत्र्यादिशब्दत्वादिति॥

॥ इति षोडशाध्याय्यां दशमाध्यायस्य॥
॥ पञ्चमः पादः॥

(टि) अत्र यथाप्राप्तस्थानबाधश्चिन्त्यते। मन्त्रगतानामेवेति। "सुपर्णोऽसि त्रिष्टुप् छन्दा इत्यस्य स्थाने "सुपर्णोऽसिगायत्रच्छन्दा" "इत्याद्यूहितव्यानीत्यर्थः। गायत्र्यादिशब्दत्ववदिति। भक्षणादीनां स्तुतिमात्रत्वेन गायत्र्यादिशब्दनिर्देश इति भावः॥ -

॥ इति केरलीये षोडशाध्ययीटिप्पणे॥
॥ दशमाध्यायस्य पञ्चमः पादः॥
॥ श्रीः॥
॥ अथ दशमाध्यायस्य षष्ठः पादः॥

॥ रथन्तरादीनां साम्नां तृचे गानाधिकरणम्॥

सू. एकर्चस्थानि यज्ञे स्युः स्वाध्यायवत्॥

(मू) सन्ति ज्योतिष्टोमे स्तोत्रीयाणि रथन्तरादीनि सामानि तत्र संशयः-किमेकस्यामृचि गेयानि उत तृच इति। तत्र यज्ञकर्मार्थस्वाध्यायाध्ययन

समय एकस्यां गीतत्वाद्यज्ञकर्मण्यपि एकस्यामृचि गेयानीति प्राप्ते।

ब्रूमः। "ऋक्सामोवाचे" त्याद्यर्थवादाविर्भूत विधिना "एकं साम तृचे क्रियत" इति वचनेन तृचे गानस्य विधानात् यज्ञकर्मणि तृचे गेयानीति॥

॥ श्रीः॥

॥ अथ दशमाध्यायस्य षष्ठः पादः॥

इदानीं स्वाध्यायप्राप्तैकत्वबाधश्चिन्त्यते। यज्ञकर्मार्थेति। "एकं साम तृचे क्रियत इति तु वर्तमानापदेशरूपत्वान्न विवक्षितमित्य-तावानभिप्रायः॥

॥ स्वर्द्दक्शब्देन वीक्षणस्य कालार्थताधिकरणम्॥

सू. स्वर्दृशं प्रति वीक्षणं कालमात्रं परार्थत्वात्॥

(मू) "ईश्वरं वै रथन्तरमुद्गातुश्चक्षुः प्रमथितोः रथन्तरे प्रस्तूयमाने सम्मीलयेत् स्वर्दृशं प्रति वीक्षेतेति श्रूयते। तत्र संशयः-किं स्वर्दृशं प्रतिवीक्षेतेति पृथग्वचनं तेन च स्वदृक्शब्दस्य वीक्षणस्य चाङ्गाङ्गिभावसम्बन्धो विधीयते उत ईश्वरमित्यादि वीक्षेतेत्यन्तमेकं वाक्यं स्वर्दृक्शब्दवीक्षणयोश्च कालार्थः संयोग इति। तत्र कालार्थत्वे स्वर्दृक्शब्दस्य स्वोचारणकाले लक्षणाप्रसङ्गात् पृथग्वाक्यं तेन चाङ्गाङ्गिभावसम्बन्धो विधीयते। तत्र स्वर्दृक्शब्दो वीक्षणाङ्गं स्वर्दृक्शब्दमुचारयन् वीक्षेतान्यथेति वचनव्यक्तिः। अथवा वीक्षणं स्वर्दृक्शब्दाङ्गं वीक्षमाण स्वर्दृक्शब्दमुचारयेत् नान्यथेति च वचनव्यक्तिरिति प्राप्ते।

ब्रूमः। कर्मप्रवचनीयेन प्रतिशब्देन श्रुत्यैव स्वर्दृक्शब्दस्य लक्षणत्वप्रतिपादनात् कालार्थः संयोगः। एकमेव च वाक्यं रथन्तरस्योद्गातृचक्षुः प्रमथनसामर्थ्यात् रथन्तरे प्रस्तूयमाने स्वर्दृक्शब्दोचारणकालात् सम्मीलयेत्। स्वर्दृक्शब्दोचारणकाले तु वीक्षेतेति वाक्यार्थः॥

(टि) अथ वाक्यलिङ्गप्राप्ताङ्गाङ्गिभावश्चिन्त्यते।



लक्षणत्वप्रतिपादनादिति। किञ्चाङ्गाङ्गिसम्बन्धविधानेऽनपेक्षितविधानं स्यादित्यपरो दोषः। तथाहि-अभीवर्त्येत्येकदेशो हि स्वर्दृक्छब्दः पृष्ठस्तुत्यर्थत्वान्न वीक्षणप्रकाशनार्थः। वीक्षणमपि रागप्राप्तं दृष्टेनैव प्रयोजनेन निराकाङ्क्षं न स्वर्दृक्छब्दस्याङ्गतया विधातव्यमिति संमीलनविधिना त्ववधिरपेक्ष्यत इति काललक्षणैव न्याय्येति॥

॥ गवामयनिके पृष्ट्यषडहे बृहद्रथन्तरयोः विभागाधिकरणम्॥

सू. पृष्ट्यस्य युगपद्विधेरेकाहवत् द्विसामत्वम्॥

(मू) द्वादशाहे पृष्ठ्यः षडह उत्पन्नः। षण्णामप्यह्नां क्रमेण रथन्तरबृहद्वैरूपवैराज शाक्वररैवतानि पृष्ठसामानि गवामयनेषु श्रूयते "पृष्ठ्यः षडहो बृहद्रथन्तरसामा कार्य" इति। तेन वैरूपादीनि निवर्तन्ते। ततो बृहद्रथन्तराभ्यामेव स्तुतिर्निर्वर्तयितव्या। तत्र संशयः-किं प्रत्यहं बृहद् च रथन्तंर च इतरेतरसहितं कार्यमुत क्वचित् बृहद् क्वचिद्रथन्तरमिति। तत्र संशयः-किं प्रत्यहं बृहद् च रथन्तंर च इतरेतरसहितं कार्यमुत क्वचित् बृहद् क्वचिद्रथन्तरमिति। तत्र बृहद्रथन्तरसामेति द्वन्द्वगर्भबहुव्रीह्यवयवभूत द्वन्द्वप्रतिपादित साहित्यविवक्षणात् प्रत्यहमितरेतरसहितमेव कार्यमिति प्राप्ते।

ब्रूमः। इतरेतरनिरपेक्षप्रापकचोदकानुग्रहात् क्वचित् बृहद् क्वचिद्रथन्तरमिति बृहद्रथन्तरसामेति न द्वन्द्वगर्भबहुव्रीहिः किन्तु त्रिपदबहुव्रीहिरित्याकरे स्थितम्॥

(टि) इदानीं बृहद्रथन्तरयोः प्रत्येकप्राप्तसाधनत्वबाधाश्चिन्त्यते-द्वन्द्वगर्भबहुव्रीहीति। द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्य समासवचनमिति कात्यायनवचनादेव विधेर्विषये द्वन्द्वस्य नित्यत्वादिति भावः। इतरेतरेति। अयं भावः-यद्यपि द्वन्द्वगर्भो बहुव्रीहिस्तथापि षडहोऽन्यपदार्थ इति षडहापेक्ष एवेतरेतरयोगो द्वन्द्वेनावगम्यते न तु षडहावयवापेक्षः तस्यान्यपदार्थत्वाभावेन वर्तिपदार्थविशेष्यत्वाभावात्। षडहापेक्षयेतरेतरयोगस्तु क्वचित् कस्यचिन्निवेशेऽपि न विरुध्यते। नच

विनिगमकाभावः चोदकस्यैव नियामकत्वादिति। त्रिपदबहुव्रीहिरिति। न चैवं कात्यायनवचनविरोधः तस्य वाक्त्वचप्रियः पञ्चगवधन इत्यादि समासान्तस्थलविषयत्वादिति भावः॥

**॥ प्रायणीयोदयनीययोरैकादशिनानां विभागाधिकरणम्॥**

**सू. समासस्त्वैकादशिनेषु तत्प्रकृतित्वात्॥**

(मू) द्वादशाहे श्रूयते-"एकादशिनां प्रायणीयोदयनीययोः अतिरात्रयोरालभेरन्नि"ति। तत्र संशयः-किं प्रायणीये उदयनीये च एकादश पशव आलब्धव्या उत विभज्येति। तत्र एकादशिन विधाने प्रधानोद्देश्यभूतप्रायणीयोदयनीययोः द्वन्द्वावगतसाहित्यस्याविवक्षितत्वात् प्रायणीये उदयनीये च एकादशालब्धव्या इति प्राप्ते।

ब्रूमः। प्रकरणावगत द्वादशाङ्गभूतैकादशिन्याः अनुष्ठानदेशापेक्षायां तद्देशत्वेन विधीयमानयोः प्रायणीयोदयनीययोः द्वन्द्वावगतसाहित्यस्य विवक्षितत्वात् विभज्यालब्धव्या इति। तत्र पञ्च प्रायणीये षडुदयनीये इत्याकरे स्थितम्॥

(टि) इदानीमेकादशिनानां प्रायणीयोदयनीययोः प्रत्येकं कृत्स्नालम्भस्य चोदकप्राप्तस्य बाधः कथ्यते. प्रकरणावगतेति। अयमभिप्रायः-द्वादशाहप्रकरणे प्रागेव वचनान्तरेण एकादशिनी विहिता। सा च प्रकरणाद् द्वादशाङ्गत्वेनावगता सकृदेवननुष्ठातव्या सती क्व प्रदेशेऽनुष्ठातव्येत्यपेक्षायां तद्देशोऽनेन वाक्येन विधीयते न त्वेकादशिनी येनोद्देश्यत्वेन प्रायणीयोदयनीययोः साहित्याविवक्षा स्यादिति। तद्देशत्वेनेनि। ततश्च प्रायणीयोदयनीयौ देशत्वादेकादशिनाङ्गम्। नच प्रत्यङ्गं, प्रधानावृत्त्यतोऽपि विभज्यालम्भ इति द्रष्टव्यम्॥

**॥ सर्वपृष्ठे देशविशेषव्यवस्थाधिकरणम्॥**

**सू. सर्वपृष्ठे पृष्ठशब्दात्तेषां स्यादेकदेशत्वं पृष्ठस्य कृतदेशत्वात्॥**

(मू) इदमाम्नायते -"विश्वजित् सर्वपृष्ठो भवती"ति। षाडहिकानां



रथन्तरादीनां षण्णां पृष्ठानां विधिरयम्। तत्र संशयः-किं षण्णां पृष्ठस्तुतिसाधनत्वात् पृष्ठदेशे मध्यान्दिनपवमानमैत्रावरुणसाम्नोर्मध्ये निवेश उत वैरूपस्यैव पृष्ठस्तुतिसाधनत्वात् पृष्ठदेशे निवेश इतरेषां स्तोत्रान्तरसाधनत्वात् तत्तद्देशनिवेश इति।

तत्र षडहे पृष्ठसाधनभूतानामिहापि पृष्ठशब्देन पृष्ठसाधनत्वावगमात् पृष्ठसाधनत्वात् पृष्ठदेशे निवेश इति प्राप्ते। ब्रूमः।"पवमाने रथन्तरं करोति आर्भवे बृहत् मध्यत इतराणि वैरूपं होतुः पृष्ठं वैराजं ब्रह्मसाम शाक्करं मैत्रावरुणं साम रैवतमच्छावाकसामे"ति वचनात् तत्स्थानत्वात् तत्स्थाने निवेश इति॥

(टि) इदानीं विश्वजिति रथन्तरादीनां पृष्ठदेशबाधः कथ्यते। तत्तत्स्थान इति। नच पृष्ठस्तुतौ प्रयुक्तानामेव वचनान्तरेण स्तोत्रान्तरे प्रयोगोऽस्त्विति वाच्यम्। वैरूपस्यैव पृष्ठविधेरानर्थक्यादिति॥

**॥ वैरूपवैराजसाम्नोः पृष्ठकार्ये निवेशाधिकरणम्॥**

**सू. वैरूपसामा क्रतुसंयोगात् त्रिवृद्वदेकसामा स्यात्॥**

(मू) ज्योतिष्टोमे श्रूयते-"उक्थ्ये वैरूपसामा एकविंशषोडशी वैराजसामे"ति। तत्र संशयः-किं वैरूपवैराजयोः सर्वस्तुतिषु निवेश उत पृष्ठस्तुतावेवेति।

तत्राविशेषात् सर्वस्तुतिषु निवेश इति प्राप्ते।

ब्रूमः। प्रकृतावेवंविधस्य रथन्तरसामेत्यादिनिर्देशस्य पृष्ठवियस्य प्रकृतिलिङ्गस्य इह सत्वात् इहापि प्रकृतिवत् पृष्ठस्तुतौ निवेश इति॥

(टि) इदानीमुक्थ्यादिषु पृष्ठादन्यत्र चोदकबाधः कथ्यते प्रकृतिलिङ्गस्येति। अतो न सर्वबाध इति भावः॥

**॥ त्रिवृति स्तोमगतसङ्ख्याविकाराधिकरणम्॥**

**सू. त्रिवृति सङ्ख्यात्वेन सर्वसंख्याविकारः स्यात्॥**

(मू) "त्रिवृदग्निष्टोम "इति श्रूयते। तत्र संशयः-किं त्रिवृच्छब्दः

त्रैगुण्यवचनस्सन् सर्वक्रतुसाधन सङ्ख्याविकारः उत स्तोत्रियानवकवचनस्सन् स्तोत्रीयविकार इति।

तत्र शास्त्रस्य महाविषयत्वलिप्सायाः त्रैगुण्यवचनस्सन् सर्वक्रतुसङ्ख्याविकार इति प्राप्ते।

ब्रूमः। रूढेर्बलीयस्त्वात् स्तोत्रियनवकवचनस्सन् त्रिवृत्त्वं स्तोत्रीयविकार इति। प्रथमे त्रिवृदादिशब्दानां वाक्यशेषवशात् स्तोत्रीयानवकादिषु रूढत्वमुक्तम्। इह वाक्यशेषाभावस्थले प्रथमाध्यायसाधितसमुदायप्रसिद्धिबलीयस्त्वात् स्तोत्रीयानवकादिवाचकत्वमुच्यत इति विवेकः।

(टि) अत्र चोदकबाधाश्चिन्त्यते । पौनरुक्त्यमाशङ्क्याह-प्रथम इत्यादिना॥

**॥ उभयसाम्नि बृहद्रथन्तरयोः समुच्चयाधिकरणम्॥**

**सू. उभयसाम्नि विश्वजिद्वद्विभागः स्यात्॥**

(मू) सन्त्युभयसामानः क्रतवः-"संसव उभयं कुर्यात् गोसव उभे कुर्यात् अभिजितावप्येकाहे "उभे बृहद्रथन्तरे कुर्यादि"ति। तत्र संशयः-किं बृहद्रथन्तरयोः अन्यतरस्य पृष्ठसाधनत्वात् पृष्ठदेशे निवेश इतरस्य स्तोत्रान्तरसाधनत्वात् तत्स्थाने निवेशः उतोभयोः पृष्ठसाधनत्वात् पृष्ठस्थाने निवेश इति। तत्र चोदकेन वैकल्पिकैकसामसाध्यपृष्ठप्राप्तेः तदनुग्रहाय अन्यतरस्यैव पृष्ठसाधनत्वात् पृष्ठस्थाने निवेश इतरस्य विश्वजिद्वत् स्तोत्रान्तरसाधनत्वात् तत्स्थाने निवेश इति प्राप्ते।

ब्रूमः। विकल्पप्राप्तयोः पृष्ठयोरनेन वचनेन समुच्चयविधानात् उभयोः पृष्ठसाधनत्वान् पृष्ठस्थाने निवेश इति॥

(टि) विश्वजिति वाचनिकः कार्यान्तरनिवेशः न त्विह वचनमस्तीत्याशयेनाह-विकल्पेत्यादिना॥

**॥ मध्वशनघृताशनयोः षडहान्तेऽनुष्ठानाधिकरणम्॥**



**सू. पृष्ठे रसभोजनमावृत्ते संस्थिते त्रयस्त्रिंशेऽहानि स्यात्तदानन्तर्यात् पृकृतिवत्॥**

(मू) द्वादशाहे "त्रिवृत्पञ्चदशः सप्तदश एकविंशः त्रिणवः त्रयस्त्रिंश" इति पृष्ठ्यं षडहं विधाय श्रूयते-"संस्थिते पृष्ठये षडहे मध्वाशयेत् घृतं वे"ति। इमे मधुघृताशने प्रकरणात् द्वादशाहाङ्गं, स्यात् वाक्यात् षडहाङ्गं, क्रमाच्च त्रयस्त्रिंशाङ्गम्। गवामयनादिषु पृष्ठ्यस्य प्रातिलोम्यं विहितं "पृष्ठ्यः षडहः त्रयस्त्रिंशारम्भणः त्रिवृदुत्तमः कार्य "इति। तत्र इदमशनं चोदकप्राप्तम्। तत्र संशयः-किं षडहान्ते कर्तव्यमुत त्रयस्त्रिंशान्त इति। तत्र प्रकृतौ त्रयस्त्रिंशान्ते अनुष्ठितत्वादिहापि त्रयस्त्रिंशान्ते कर्तव्यमिति प्राप्ते।

ब्रूमः। वाक्यावगतषडहाङ्गत्वात् षडहान्ते कर्तव्यमिति। अत्र संस्थित इति संस्थाश्रवणात् षडहाङ्गत्वमिति शङ्केति॥

(टि) वाक्यावगतेति। अनेनानुष्ठानसन्निधिलक्षणक्रमेण त्रयस्त्रिंशानन्तर्यमवगम्यमानं वाक्येन बाध्यत इति दर्शितम्। शङ्केति। सत्यपि संस्थाशब्दे वैमृधवत् पौर्णमास्याः षडहस्यैवावगमनं षडहावसाने विधीयत इत्युत्तरं द्रष्टव्यमिति भावः॥

**॥ षडहावृत्तावपि मध्वशनघृताशनयोः सकृदनुष्ठानाधिकरणम्॥**

**सू. अभ्यासे च तदभ्यासः कर्मणः पुनः प्रयोगात् ॥**

(मू) "आवृत्तं पृष्ठ्यमुपयन्तीति श्रूयते। तत्र मध्वशनं घृताशनं च चोदकप्राप्तम्। तत्र संशयः - किं प्रतिषडहान्तमशनं कर्तव्यं उत सर्वान्त इति। तत्र षडहाङ्गत्वात् प्रतिषडहान्तं कर्तव्यमिति प्राप्ते।

ब्रूमः। सर्वषडहान्त एव षडहसमाप्तिरूपनिमित्तस्य सञ्जातत्वात् सर्वान्ते कर्तव्यमिति॥

(टि) षडहसमाप्तीति। संस्था च तद्विषयव्यापारोपरमः। स च न पुनः प्रवर्तमानस्यास्ति। तस्मात् सत्यप्यङ्गत्वे निमित्तावृत्त्यभावान्नावृत्तिरिति भावः॥

## ॥ गवामयने मध्वशनघृताशनयोः प्रतिमाससमावृत्त्यधिकरणम् ॥

### सू. आवृत्तिस्तु व्यवाये कालभेदात् स्यात् ॥

(मू) गवामयने श्रूयते "चत्वारोऽभिप्लवाः षडहाः पृष्ठ्यः षडहः समासः स द्वितीयः स तृतीयः स चतुर्थः स पञ्चम" इति। तत्रैतदशनं चोदकप्राप्तम्। तत्र संशयः-किं प्रतिमासं मध्वशनं कर्तव्यं उत सर्वान्त इति।

तत्र पूर्वन्यायात् सर्वान्त इति प्राप्ते।

ब्रूमः। प्रतिमासं पृष्ट्यं संस्थाप्यैव अभिप्लवारम्भात् पृष्ठ्यसंस्थानिमित्तमशनं प्रतिमासं पृष्ठ्यान्ते कर्तव्यमिति॥

(टि) पृष्ठ्यसंस्थानिमित्तमिति। निमित्तसद्भावान्न मध्वशनं बाधितव्यमिति भावः॥

## ॥ द्वादशाहे सत्रिभिरपि मध्वशनाधिकरणम् ॥

### सू. मधु न दीक्षिता ब्रह्मचारित्वात् ॥

(मू) द्वादशाहे श्रूयते -"संस्थिते पृष्ठ्ये षडहे मध्वाशयेदि"ति। सत्रमहीनं च द्वादशाहः। तत्र सत्रे यजमानानां दीक्षितानामेवर्त्विक्त्वं, दीक्षितस्य ब्रह्मचर्यं विधीयते। ब्रह्मचारिणश्च मध्वशनं निषिध्यते। स च प्रतिषेधः प्रतिपदोक्तः पुरुषार्थश्च। दीक्षितस्य ब्रह्मचर्यं तु क्रत्वर्थतया विहितम् तच्चेह चोदकप्राप्तम्। तद्द्वारा मध्वशनप्रतिषेधोऽपि क्रत्वर्थतया प्राप्तः। मध्वशनं तु क्रत्वर्थं प्रत्यक्षविहितं च। एवं स्थिते संशयः-किं सत्रिणां मध्वशनं न कर्तव्यमुत कर्तव्यमिति।

तत्र प्रतिषेधान्न कर्तव्यमिति प्राप्ते।

ब्रूमः। क्रत्वर्थत्वपुरुषार्थत्वानिमित्तविषयभेदात् कर्तव्यमिति। इदमत्रावधेयम्-प्रत्यक्षः प्रतिषेधः पुरुषार्थः अशनं तु क्रत्वर्थमिति विषयभेदात् न तयोर्बाध्यबाधकभावः प्रतिषेधस्य क्रत्वर्थत्वं त्वानुमानिकं मध्वशनस्य तु प्रत्यक्षमिति तेन प्रतिषेधो बोध्यत इति॥

(टि) विषयभेदात् कर्तव्यमिति। एतदेव प्रतिपादयति इदमत्रेत्यादिना॥



## ॥ मानसस्य द्वादशाहाङ्गताधिकरणम् ॥

### सू. मानसमहरन्तरं स्याद् भेदव्यपदेशात् ॥

(मू) द्वादशाहे दशमस्याह्नोऽधिकारे मानसो ग्रहः श्रूयते "अनया त्वा पात्रेण समुद्रं रसया प्रजापतये जुष्टं गृहामीति" मानसं "प्राजापत्यं गृह्णातीति प्राजापत्यं मनोग्रहं गृह्णातीति वा। तत्र संशयः-किमत्र यागान्तरविधिः उत दशमस्याह्नोऽङ्गभूतं ग्रहाभ्यासान्तरं विधीयत इति।

तत्र "वाग्वै द्वादशाहो मनो मानसमि"त्यादिव्यपदेशभेदादिसत्वात् यागान्तरविधिरिति प्राप्ते।

ब्रूमः। मानसस्य दशामेऽहानि मानसाय प्रसर्पन्तीत्यादि दशामाहाङ्गत्वदर्शनात् ग्रहाभ्यासान्तरं विधीयत इति॥

(टि) दशमाहाङ्गत्वदर्शनादिति। ग्रहणचोदनानां संस्कारमात्रपर्यवसायित्वान्न यागान्तरकल्पकत्वमिति द्वितीये स्थितमित्यपि द्रष्टव्यम्॥

## ॥ सत्रस्य बहुकर्तृकत्वाधिकरणम् ॥

### सू. सत्रमेकः प्रकृतिवत् ॥

(मू ) द्वादशाहप्रभृतीनि सत्राण्युदाहरणम्। तत्र संशयः-किं सत्राणि सत्रफलकामिनः एकैकशः कुर्युरुत बहवः संहत्येति। तत्र चोदकानुग्रहादेकैकश इति प्राप्ते।

ब्रूमः। आख्यातगतबहुत्वसङ्ख्यायाःप्रकृतिवत् विवक्षितत्वात् चोदकप्राप्तमेकत्वं बाधित्वा बहवः संहत्य कुर्युरिति॥

(टि) विवक्षितत्वादिति। प्रयोगाङ्गत्वेनेति शेषः॥

## ॥ सत्रे यजमानानामेवर्त्विक्त्वाधिकरणम् ॥

### सू. अन्ये स्युर्ऋत्विजः प्रकृतिवत् ॥

(मू) सत्राण्येवोदाहरणम्। तत्र संशयः-किं सत्रिण एवर्त्विजः उतान्ये उपादातव्या इति।

तत्र चोदकानुग्रहादन्ये उपादातव्या इति प्राप्ते।

ब्रूमः। "ये यजमानास्त ऋत्विज इति वचनसामर्थ्यात् सत्रिण एव

ऋत्विज इति। नच ये यजमाना इति यजमानोद्देशेनार्त्विज्यं यजमानसंस्कारत्वेन विधीयते अप्राकृतकार्यत्वप्रसङ्गात्। नाप्यनुवादः चोदकप्राप्तानां बाध इति भावः॥

**॥ सत्राहीनयोर्विवेकाधिकरणम्॥**

**सू. द्वादशाहस्य सत्रत्वमासनोपायिचोदनेन यजमानबहुत्वेन च सत्रशब्दाभिसंयोगात्॥**

(मू) द्वादशाह उदाहरणम्। स द्वादशाहः सत्रमहीनश्च। तत्र संशयः-किं सत्ररूपस्य द्वादशाहस्य लक्षणमस्ति नेति। तत्र दोषत्रयरहितधर्मादर्शनात् नास्तीति प्राप्ते।

ब्रूमः। त्रयोदशरात्रादिसत्र-लक्षणस्यासनोपायिचोदनात्वस्य द्वादशाहे सत्वात् आसनोपायिचोदनात्वं लक्षणमस्तीति। किमहीनरूपस्य द्वादशाहस्य लक्षणमस्ति उत नास्तीति संशयः। तत्र दोषत्रयरहितधर्मादर्शनात् नास्तीति प्राप्ते। ब्रूमः। अहर्गणत्वे सति यजतिचोदनात्वस्य द्विरात्रादिगताहीनलक्षणस्य द्वादशाहे सत्वात् तदेवास्ति द्वादशाहस्याहीनरूपलक्षणमिति। एकं वेदमधिकरणम्॥
(टि) सत्रप्रसङ्गात् सत्रलक्षणमुच्यते -आसनोपायिचोदनात्वस्येति॥

**॥ पौण्डरीके सकृदेव दक्षिणादानाधिकरणम्॥**

**सू. अहीने दक्षिणाशास्त्रं गुणत्वात् प्रत्यहं कर्मभेदःस्यात्॥**

(मू) अस्ति पौण्डरीको नाम अहीन एकादशरात्रः-''पौण्डरीकेनै(णै) कादशरात्रेण स्वाराज्यकामो यजेते"ति। तत्र श्रूयते ''अयुतं पौण्डरीके दद्यात् अश्वसहस्रमेकादशमिति। तत्र संशयः-किं प्रत्यहमयुतं अश्वसहस्रं च दातव्यं उतायुतमश्वसहस्रं चैकमेव दातव्यमिति। तत्र दक्षिणाया अहरङ्गत्वात् प्रत्यहं दातव्यमिति प्राप्ते।

ब्रूमः। अदक्षिणाया अहरङ्गत्वेमपि द्वारभूतानतेरेकत्वात् तन्त्रेण दातव्यमिति॥



(टि) तन्त्रेणेति। ननु पौण्डरीकप्रकृतौ द्वादशाहे''ऽन्वहं द्वादशं शतं ददाती"ति वचनात् प्रत्यहं दीयते। तेनात्रापि तथैव भवितुमर्हतीति चेदुच्यते। द्वादशाहेऽप्येकप्रयोगवचनत्वादेकैवानतिरिति प्रत्यहं द्वादशाहे दीयमाने यावती भवती तावती दक्षिणैकैवेति न तेनात्र प्रत्यहं भेदेन दानप्रसक्तिरिति॥

**॥ पौण्डरीके सर्वासां दक्षिणानां विभज्य नयनाधिकरणम्॥**

**सू. प्रत्यहं सर्वसंस्कारः प्रकृतिवत् सर्वासां सर्वशेषत्वात्।**

(मू) पौण्डरीके सकृदेव दक्षिणा दातव्येति समधिगतम्। अस्ति तु प्रकृतौ माध्यन्दिने सवने ''दक्षिणानां नयनं संस्कारः" तस्मात्त्रिष्टुभो लोके माध्यन्दिने सवने दक्षिणा नीयन्त इति। तदिह चोदकप्राप्तम्। तत्र संशयः-किमयुतमश्वसहस्रं च प्रत्यहं नेयमुत एकस्मिन्नहनि। अथवा अयुतं विभज्य प्रत्यहं सहस्रं नेयं अश्वसहस्रं चैकादशेऽह्नीति। तत्र प्रतिमाध्यन्दिनं नयनस्य चोदकप्राप्तत्वात् प्रत्यहं कृत्स्नं नेयमिति चेत् उच्यते। नयनस्य दक्षिणासंस्कारत्वात् यस्मिन्कस्मिंश्चिदेक-स्मिन्नहनि सकृदेव नेयमिति प्राप्ते।

ब्रूमः। द्वादशाहे विभज्य नयनस्य विहितत्वात् तद्वदत्राप्युक्तप्रकारेण विभज्य नेयमिति॥

(टि) सङ्गतिं दर्शयति-पौण्डरीक इति॥

**॥ मानवीषु पञ्चदशानामेव सामिधेनीत्वाधिकरणम्॥**

**सू. लिङ्गेन द्रव्यनिर्देशे सर्वत्र प्रत्ययः स्याल्लिङ्गस्य सर्वगामित्वादाग्नेयवत्॥**

(मू) क्वचित् विकृतौ श्रूयते-''मनोऋचः सामिधेन्यो भवन्तीति। तत्र संशयः-किं मनोऋचः सर्वा एव सामिधेनीत्वेन वक्तव्या उत यावत्क्रीतीभिश्चोदकप्राप्ता प्राकृती सङ्ख्या पूर्यते तावत्य इति ॥
तत्र प्रत्यक्षवचनेन सर्वासां प्राप्त्यवगमात् सर्वा वक्तव्येति प्राप्ते।
ब्रूमः। चोदकेन पञ्चदशत्वप्राप्तेः बहुवचनप्राप्तत्रित्वमतिक्रम्य पञ्चदश

वक्तव्या इति॥ (टि) न हीदमृक्संस्कारार्थं येन प्रत्यक्षवचनेन सर्वासां प्राप्तिः स्यादित्याशयेनाह-चोदकेनेति॥

॥ वाससि मानोपावहरणयोरनुष्ठानाधिकरणम्॥

**सू. वाससि मानोपावहरणे प्रकृतौ सोमस्य वचनात्॥**

(मू) ज्योतिष्टोमे सोमस्य मानमुपाहरणं च श्रूयते "वाससि मिनोति वाससा च उपावहरतीति। तत्र संशयः यत्र क्वचिन्मानं; येन केनचिदुपावहरणं च कार्याकार्यमित्यनियम उत वाससस्येव मानं वाससैव चोपाहरणमिति नियम इति।

तत्र लाघवप्रयोगप्राशुभावयोः लाभादर्थप्राप्तो नियम इति प्राप्ते। ब्रूमः। वाससि वासेति वचनान्नियम इति। उत्तरविवक्षार्थमिदम्॥

(टि) सति वचने कथं पूर्वपक्षोत्थानमित्याह-उत्तरविक्षार्थमिति। अतो न पूर्वपक्षेऽतीवादर इत्यभिप्रायः। अर्थादन्यदुत्पाद्यमिति॥

॥ अहर्गणेर्वासोन्त रोत्पादनाधिकरणम्॥

**सू. तत्राहर्गणेर्थाद्वासः प्रकृतिः स्यात्॥**

(मू) ज्योतिष्टोमे सोमस्य मानमुपावहरणं च श्रूयते- "वाससि मिनोति वाससा चोपहरतीति। तत्र प्रकृतौ यस्मिन् वाससि सोमोमीयते तेन वाससाभिभवार्थं उपहियेत तद्वासो द्वादशाद्यगर्गणे चोदकप्राप्तम्। तत्र वाससि संशयः-किमुपाहरणार्थमन्यत् वास उत्पाद्यमुत नेति।

तत्र प्रमाणाभावान्नान्यदुत्पाद्यमिति प्राप्ते,

ब्रूमः। अर्थादन्यदुत्पाद्यमिति।

इदं त्ववधेयम्। यावानेकस्मा अनेन पर्याप्तः सोमः तावान् प्रत्यहमभिषवार्थं वाससोपाहर्तव्यः; अवशिष्टश्च वाससोपनह्य हविर्धान एव स्थापयितव्यः उपाहरणवासश्च ग्रावस्तुते दानस्य विधानात् प्रत्यहं तस्मै तद् दातव्यम्। तस्माद् प्रत्यहमुपावहरणार्थं भेदेन वास उत्पाद्यमिति॥



(टि) एतदेव प्रतिपादयति इदं त्वित्यादिना॥

॥ उपावहरणार्थमेव वासोन्तरोत्पादनाधिकरणम्॥

**सू. मानं प्रत्युत्पादयेत् प्रकृतौ तेन दर्शनादुपावहरणस्य॥**

(मू) अहर्गणे उपावहरणार्थं वास उत्पाद्यमित्युक्तम्। तत्र संशयः; किं मानकाल एवोत्पाद्यमुतानुपपत्तिवशात् उपावहरणकाल इति। तत्र प्रकृतौ मानवाससोपावहरणदर्शनात् तत्सम्पादनार्थं मानकाल एवोत्पाद्यमिति प्राप्ते। ब्रूमः। प्रकृतौ मानवाससोपावहरणस्य अशास्त्रीयस्यार्थिकस्य चोदकप्राप्तेः तत्सम्पादनार्थं मानकाल उत्पाद्यं, किन्तु अनुपपत्तिवशादुपावहरणकाल एवेति॥

॥ इति षोडशाध्याय्यां दशमाध्यायस्य षष्ठः पादः॥

(टि) सङ्गतिं दर्शयन्नाह-अहर्गण इति॥

॥ इति करेलीये षोडशाध्यायीटिप्पणे

दशमाध्यायस्य षष्ठः पादः॥

॥ श्रीः॥

॥ अथ दशमाध्यायस्य सप्तमः पादः॥

॥ ज्योतिष्टोमे प्रत्यङ्गं हविर्भेदाधिकरणम्॥

**सू. पशोरेकहविष्ट्वं समस्तचोदितत्वात्॥**

(मू) अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः "यो दीक्षितो यदग्नीषोमीयं पशुमालभत "इति। तत्र संशयः-किं कृत्स्नः पशुरेकं हविः उत हृदयादीन्याङ्गानि हवींषीति।

तत्राग्नीषोमीयं पशुमिति तद्धितेन कृत्स्नस्य पशोः अग्नोनीषोमीयदेवतासम्बन्धविधानात् कृत्स्नः पशुरेकं हविरिति प्राप्ते। ब्रूमः। "हृदयस्याग्रेऽवद्यतीत्यादिवाक्यैः हृदयाद्यङ्गानां हविस्संस्कारावदानविधानात् हृदयाद्यङ्गान्येव हवींषीति। हृदयादिप्रकृतित्वेन देवतासम्बन्धोपपत्तिरिति बोध्यम्॥

॥ श्रीः ॥

॥ ॥ अथ दशमस्य सप्तमः पादः ॥

(टि) "अग्नीषोमीयं पशुमालभत इति यागचोदना न तु हृदयादिवाक्यानीति द्वितीये स्थितम्। तत्रायं विचारः-किं कृत्स्नः पशुरिति। तद्धितेनेति। हृदयस्याग्रेऽवद्यतीत्यादि वचनानि तु पशोः सान्नाय्यविध्यन्तप्राप्तेः मध्यात् पूर्वार्धाच्चवादाने प्राप्ते तदपवादतयावद्यत्यनुवादेन हृदयादिस्थानानि विदधते एकादशानां च स्थानानां विधानात् द्व्यवदानमपोद्यैकादशकृत्वोऽवदाय हूयते। तावतैव पशुः देवतायै त्यक्तो भवति पुरोडाशवदिति भावः। अवदानविधाादिति। नहि अवदानस्थानविधानं मांसविशेषवचनानां हृदयादिशब्दानां पशुप्रदेशे लक्षणाप्रसङ्गादिति भावः। अङ्गान्येव हवींषीति। तस्माद्धृदयादिभ्य एव द्व्यवदानं गृहीत्वा होतव्यमिति। नन्वेवमुत्पत्तिशिष्टपशुविरोधः स्यादित्यत्राह हृदयादीति ॥

॥ पशोर्हृदयादिभिरेवाङ्गविशेषैर्यागानुष्ठानाधिकरणम् ॥

सू. हविर्भेदात् कर्मणोऽभ्यासः तस्मात्तेऽभ्योवदानं स्यात् ॥

(मू) पश्वङ्गानि हवींषीति स्थितम्। तत्र संशयः - किं येन केनचिदङ्गेन यागो निर्वर्तयितव्यः उत सर्वैरङ्गैः अथवा हृदयाद्येकादशाभिरिति। तत्रैकेनाङ्गेन कृतेऽपि यागे विहितस्य पशोर्यागसाधनत्वस्यानुष्ठितत्वाद्येन केनचिदेकेन यागो निर्वर्तितव्य इति चेत्। उच्यते। अवयविद्वारा पश्वाकृत्यवच्छिन्नानां पश्ववयवानामविशेषण यागसाधनत्वात् सर्वैरङ्गैः यागो निर्वर्तितव्य इति। एवं प्राप्ते।

ब्रूमः। हृदयादीनां एकादशानामवदान विधानविशेषसत्वात् हृदयाद्येकादशभिरेव यागो निर्वर्तयितव्य इति॥ यद्यप्येकेन कृतेऽपि यागसाधनत्वं पशोरुपपन्नं; तथाप्येकादशाङ्गानां हविष्टेऽव-दानविधानं प्रमाणं, अङ्गान्तराणामंसशिरः-प्रभृतीनां हविष्ट्वे न किञ्चित् प्रमाणमिति बोध्यम् ॥

(टि) अवयविद्वारेति। अयमाशयः -पश्वाकृतिर्हि



देवतासम्बन्धित्वेन श्रुता। तया च यष्टुमशक्यत्वात्तत्परिच्छिन्नेन द्रव्येण यष्टव्यम् आकृतिश्याट्य विद्रव्य साक्षात् परिच्छिनतीति तदेव यागसाधनमवगम्यते। तस्यापि विशसनादिविधानान्न साक्षाद्यागसाधनता सम्भवतीति।

नन्वाकृतिः सर्वव्यक्तिनिष्ठाप्येकां व्यक्तिं गमयति, एवमवयव्यप्येकमवयवमवनमयेदित्यत्राह-अविशेषेणेति। अयमाशयः -

आकृतिर्हि सर्वव्यक्तिषु वर्तमानापि प्रतिव्यक्ति पर्याप्यैव वर्तते न सर्वव्यक्तिषु व्यासज्य। अतः सैकां व्यक्तिमवगमयतीति युक्तम्। अवयवी पुनरवयवेषु व्यासज्यैव वर्तते न तु प्रत्यवयवं पर्याप्य। अतः सः सर्वावयवेषु सहैव धियमुत्पादयति। तत्र कस्य ग्रहणं कस्य नेति विशेषे न प्रमाणमस्ति। हृदयादिवचनानि तु द्व्यवदाननियमार्थानि। तथाहि-एकादशवै पशोरवदानानि। तानि "द्विर्द्विरवद्यती"ति श्रूयते। तस्य नायमर्थः "एकादशैवावदानानि नाधिकानि तानि द्विर्द्विखदेयानीति किं नर्हियान्येकादशा वदानानि तानि द्विरवद्यति नाधिकमित्यर्थः। तेनैकादशभ्योऽधिकानि पशोः पञ्चावदाननियमात् त्रिस्त्रिरवद्यन्त इति। यत्त्वविशेषेणेति तन्न। अवदानविधेर्विशेषस्य सत्वादित्याशयेनाह-हृदयादीनामिति। यत्तु हृदयादिवाक्यानि द्व्यदाननियमार्थानीति तदपि न भिन्नवाक्यत्वात्। तस्माद्धृदयादिवचनान्यवदानवचनानि। एकादश वै पशोरवदानानि तानि; द्विर्द्विरवद्यतीति सङ्ख्याविधानमिति भावः। सुखग्रहणार्थमाहात्रेत्यादिना॥

ज्योतिष्टोमेऽनिज्याशेषैस्त्र्यङ्गैः स्विष्टकृद्धोमाधिककरणम् ॥

सू. इज्याशेषात् स्विष्टकृदिज्येत प्रकृतिवत् ॥

(मू) ज्योतिष्टोमे अग्नीषोमीये पशौ स्विष्टकृद्यागः चोदकप्राप्तः। "त्र्यङ्गैः स्विष्टकृतं यजतीति च श्रूयते। तत्र संशयः-किं प्रधानेज्यातशेतषाणां हृदयाद्याङ्गानां मध्ये त्रिभिरङ्गैः स्विष्टकृद्यष्टव्य उतानिज्याशेषैरङ्गान्तरैः

त्रिभिरिति।
तत्र चोदकप्राप्तेज्याशेषसम्बन्धानुग्रहात् इज्याशेषैस्त्रिभिरिति प्राप्ते।
ब्रूमः। त्र्यङ्गैरिति त्रित्वविशिष्टाङ्गान्तरविधानरूपप्रत्याम्नानात् चोदकप्राप्तेज्याशेषान् बाधित्वानिज्याशेषैस्त्रिभिः "दोःपूर्वार्धस्य गुदस्य मध्यतः श्रोण्या जघनार्धस्येति वाक्यशेषे श्रूतैर्दोर्गुदश्रोणीभिः स्विष्टकृद्यष्टव्य इति। ननु अनिज्याशेषाणां स्विष्टकृदङ्गत्वेन विधानात् गुणत्वं चोदकप्राप्तानामिज्याशेषाणां च प्रतिपाद्यत्वेन प्रधान्यम्। ततश्च साधनांशोऽनिज्याशेषाणां प्राप्तिः। साध्यांशे त्विज्याशेषाणामिति विषयभेतदात् कथमनिज्याशेषैरिज्याशेषाणां बाध इति चेत्। उच्यते। अस्ति हि प्रतिपाद्यानामप्यार्थिकं निवर्तकत्वमित्यार्थिकं तुल्यविषयत्वमिति बाध उपपद्यत इति। ननु तर्हि इज्याशेषप्रतिपत्तिलोप इति चेन्न। यत् स्विष्टकृता प्रतिपाद्यं तत् त्र्यङ्गाणि नान्याङ्गानीति विधानात् तावतैव प्रतिपत्तिसिद्धेरिति॥

(टि) चोदकप्राप्तेति। त्र्यङ्गैरिति वचनं तु त्रित्वविधानार्थमिति भावः। नैवं, एवं हीदं समासपदं त्र्यङ्गैरिति तदेकप्रसरं युक्तं सकलमुद्देशकं वोपादानकं वा। उत्तरार्धेनोद्दिश्य पूर्वार्धेन विधाने प्रसरभेदेन सामर्थ्यविधानात् समासो न स्यादित्याशयेनाह-त्र्यङ्गैरित्यादिना। वाक्यशेषेऽनिज्याशेषाणां कीर्तनमप्यत्र प्रमाणमिति दर्शयन्नाहात्रेत्यादिना। नन्वनिज्याशेषाणां न प्रतिपत्त्यर्हतेति चेदुच्यते। हृहयाद्यर्थालब्धपश्वनुनिष्पन्नानां दोषादीनामाकीर्णकराणां तुषकणवत् प्रतिपत्त्यपेक्षास्तीति एतादृशमनुनिष्पन्नमिज्याशेषसदृशमेवेति यावत्। तावतैवेति। सर्वथा त्र्यङ्गैरिति वचनान्नेज्याशेषैरपि सर्वैः क्रियते स्विष्टकृदित्यभिप्रायः॥

### ॥ अध्यूध्न्या इडाविकारताधिकरणम्॥

### सू. अध्यूध्नी तु होतुः त्र्यङ्गवत् इडाभक्षविकारः स्यात्॥

(मू) ज्यौतिष्टोमे अग्नीषोये पशौ श्रूयते-अध्युद्धिं होत्रे हरन्तीति। तत्र संशयः-किमयमध्युद्धिपक्षे होतुरिडायाः प्राप्तायाः अध्युध्या; अध्युद्धिं



होत्र इति नियमान्न प्राकृतस्य होतुरिडाभक्षस्य विकारः उत हृदयाद्यनन्तभताया अध्युध्या इडायामप्राप्तत्वात् अध्युद्धिवाक्येन व (वि) धानात् इडाथक्षविकार इति।
तत्रानस्थिभिरिडां वर्धयन्तीति वचनात् अनस्थिभूताया अध्युध्या इडायां प्राप्तायां अध्युद्धिवाक्येन नियमात् नाध्युद्धी इडाभक्षस्य विकार इति प्राप्ते। ब्रूमः। अनस्थिवाक्यस्य "अथ यत् परिशिष्टं तत् समवत्तधान्यामानयति हृदयं प्रास्यति जिह्वां वक्षस्तनिममतस्नेवनिष्ठु मिति वचनप्राप्तानां हृदयादीनामनुवादत्वात् हृदयाद्यनन्तरित्याध्युक्तरीत्याध्युद्धीडाभक्षविकार इति॥

(टि) नाध्युद्धीडाभक्षस्य विकार इति। यजुर्युक्तरथवदिति भावः॥

### ॥ वनिष्ठोर्भक्षविकारताधिकरणम्॥

### सू. अग्नीधश्च वनिष्ठुरध्यूध्नीवत्॥

(मू) ज्योतिष्टोमे अग्नीषोमीयपशावेव श्रूयते- "वनिष्ठुमग्नीध इति। तत्र संशयः-किमत्र नियमादध्युद्धि (वत्) वनिष्ठोरपि नेडाभक्षविकार उताप्तौ प्राप्तस्य विधानात् अध्युद्धिवदिडाभक्षविकार इति।
तत्र वनिष्ठोरिडायां प्रासनवाक्यप्राप्तत्वात् वनिष्ठुवाक्येन नियमान्नेडाभक्षविकार इति प्राप्ते। ब्रूमः।
वनिष्ठुप्रासनस्योपस्तरणादिवदिडासंस्कारार्थत्वात् वनिष्ठुवाक्येनेडायामप्राप्तस्य वनिष्ठोर्विधानात् वनिष्ठुरपीडाभक्षविकार एवेति॥

(टि) वनिष्ठुप्रासनस्येति। प्रासनमात्रं श्रुतं नेडात्वम्। अतो नास्येडात्वमित्यभिप्रायः॥

### ॥ मैत्रावपरुणस्यापि शेषभक्षास्तित्वाधिकरणम्॥

### सू. अप्राकृतत्वान्मैत्रावरुणस्याभक्षत्वम्॥

(मू) ज्योतिष्टोमे अग्नीषोमीये पशावस्ति मैत्रावरुणो नाम ऋत्विक्। तत्र संशयः-किं मैत्रावरुणस्य चोदकप्राप्तः शेषभक्षोऽस्ति नेति।

तत्र मैत्रावरुणस्याप्राकृतत्वान्नास्ति शेषभक्ष इति प्राप्ते। ब्रूमः। अनुवाक्याप्रैषवचनहोत्राध्वर्युकार्यतोऽस्ति मैत्रावरुणस्य कर्तृभूतहोत्रध्वर्युकार्यनिमित्तसंस्कारार्थभक्ष इति॥

(टि) प्राकृता हि भक्षाः प्राकृतकर्तृनियमांशेन कर्तृसंस्कारा अपीति स्थितम्। तच्च कर्तृत्वं मैत्रावरुणस्याप्यस्तीत्याशयेनाह कर्तृभूतेति॥

॥ मैत्रावरुणस्यैकभागताधिकरणम्॥

सू. द्विभागः स्यात् द्विकर्मत्वात्॥

(मू) मैत्रावरुणभक्षे संशयः-किं मैत्रावरुणौ द्वौ भागौ भक्षयेदुतैकैकमिति। तत्र द्वयोः कार्यस्य करणात् द्वौ भागौ भक्षयेदिति प्राप्ते। ब्रूमः। एकभागेन या तृप्तिः प्राकृती तस्या इह चोदकप्राप्तात्वात् तत्सिध्यर्थं एकं भागमेव भक्षयेदिति॥

(टि) तत्सिध्यर्थमिति। अन्यथा प्राकृतकार्यत्वं स्यादिति चोदकविरोध इति भावः॥

॥ प्रतिप्रस्थातुर्भक्षाभावाधिकरणम्॥

सू. प्रतिप्रस्थातुश्च वपाश्रपणात्॥

(मू) अग्नीषोमीये पशौ अस्ति प्रतिप्रस्थाता नामर्त्विक्। तत्र संशयः; किं प्रतिप्रस्थातुरिडाभक्षोऽस्ति न वेति। तत्राध्वर्युकार्यस्य वपाश्रपणस्य करणादस्तिभक्ष ा प्राप्ते। ब्रूमः। वपायाः शेषाभावान्नास्ति भक्ष इति। अध्वर्य्ववदानपक्ष त्विदमधिकरणम्। प्रतिप्रस्थात्रवदानपक्षे तु तस्य भक्षोऽस्ति। ततश्च यस्मिन् येन यत्नः कृतः तच्छेषं स भक्षयेदिति प्रदर्शनार्थमिदमधिकरणमिति स्थितम्॥

(टि) ननु "दक्षिणतो निधाय प्रतिप्रस्थातावद्यतीति वचनात् प्रति प्रस्थातुरप्यङ्ग्यागकर्तृत्वात्तत्र च शेषसत्वादस्त्येव भक्षणमित्यत्राह- अध्वर्य्ववदानेत्यादिना॥

॥ गृहमेधीयेऽपूर्वाज्यभागविधानाधिकरणम्॥



सू. विकृतौ प्राकृतस्य विधेर्ग्रहणात् पुनः श्रुतिरनर्थिका स्यात्॥

(मू) चातुर्मास्येषु साकमेधे पर्वणि गृहमेधीयेष्टिः श्रूयते "मरुद्भयो गृहमेधिभ्यः सर्वासां दुग्धे सायमोदन इति। तत्र श्रूयते- "आज्यभागौ यजतीति। तत्राष्टधा संशयः-किं चोदकप्राज्यभागयोः अनुवादमात्रमुत चोदकेनानेन च द्वाभ्यां ऐष्टिकविध्यन्तविधानं वा अर्थवादार्थं वा; अधिकयोः कर्मान्तरयोर्विधानं वा; परिसङ्ख्या वा; आच्भागवर्जातिदेशो वा; आज्यभागमात्रातिदेशो वा चोदक एव नास्ति अपूर्वो गृहमेधीय इति वेति।

तत्र चोदकप्राप्तत्वादनुवादमात्रमिति चेदुच्यते। अनुवादत्वे आनर्थक्यप्रसङ्गात् द्वाभ्यामेककर्मकविध्यनुविधानमिति। अत्रोच्यते। ऐष्टिकविध्यन्तप्राप्तेः औषधद्रव्यकत्वसामान्यसिद्धत्वात् ऐष्टिकविध्यन्तप्रशंसारूपार्थवादार्थमिति। अत्र वदामः। गृहमेधीयविधिवाक्यनैकवाक्येत्वाभावात् नार्थवादार्थं, किन्तु कर्मान्तिरयोर्विधानमिति। अत्र ब्रूमः। प्रसिद्धाज्यभागप्रत्यभिज्ञानान्न कर्मान्तिरयोर्विधानं, किन्तु चोदकप्राप्तेषु समिदादिपरिसङ्ख्यार्थमिति। अत्राभिधीयते। परिसङ्ख्यायाः त्रिदोषत्वात् प्रत्यक्षवचनसिद्धाज्यभागवर्जातिदेश इति चोदकस्य प्रत्यङ्गं व्यापारभेदाभावात् नाज्यभागवर्जातिदेशः किन्तु आज्यभागमात्रातिदेश इति। एवं प्राप्ते। ब्रूमः। प्रत्यक्षश्रुतस्यानतिदेशत्वात् अत्र चोदक एव नास्ति अपूर्वो गृहमेधीय इति। तस्मात् यत्र प्राकृतमङ्गं निर्गुणं श्रुतं तत्रापूर्वत्वमिति स्थितम्॥

(टि) द्वाभ्यामिति। आज्यभागश्रवणं निर्वपत्यादिश्रवणवत् प्रकृतिसादृश्यमापादयच्चोदकनिमित्तं भवति चोदकस्त्वैष्टिं नियच्छतीत्युभाभ्यामैष्टिकविध्यन्तविधिरित्यर्थः। किन्तु चोदकप्राप्तेष्विति। चोदकेनाज्यभागयोः समिदादिषु च प्राप्तेषु "आज्यभागौ यजतीति" श्रवणं आज्यभागावेव यजति न समिदादीति समिदादियागानां परिसङ्ख्यार्थमित्यर्थः। आज्यभागमात्रातिदेश इति।

स एव चोदकोपसंहार इत्युच्यते। उपसंहारश्चेत्थं प्रकृतिवत् कुर्यात् किं तत् सादृश्य माज्यभागौ यजतीति प्रत्यक्षश्रुतस्येति। अयं भावः-आज्य भागयोर्हि प्रकृतौ श्रुतयागस्वरूपव्यतिरेकेण प्रकरणाम्नानकल्पितं स्वापूर्वद्वारेण यागगतव्यापारस्वरूपमप्यपरमस्तितद्रूपलक्षणार्थं चेदमाज्यभागश्रवणं अन्यथानर्थक्यप्रसङ्गात्। ततश्च गृहमेदीयप्रयोगवचनो यागगतं व्यापारं कथमभावात्मकमपेक्षमाणः प्रत्यक्षविहिताज्याभागाभ्यां निराकाङ्क्षो न प्रकृतिमपेक्षते इति चोदकलोपः। यानि त्वप्रकृतान्यामनहोमादीन्यङ्गानि तेषां यागगतव्यापाररूपस्याक्लृप्तत्वात्तद्रूपापेक्षः प्रयोगवचनः सन्निहितव्यवहितान्यतिक्रम्य प्राकृतान्यसन्निहितान्यपि क्लृप्तोपकाराणि गृहीत्वा समीपाम्नाताङ्गानर्थक्यपरिजिहीर्षया तान्यपि गृह्णातीति न तैश्चोदकलोप इति॥

**॥ गृहमेधीये स्विष्टकृदाद्यनुष्ठानाधिकरण्॥**

**सू. ततोऽपि यावदुक्तं स्यात्॥**

(मू) गृहमेधीय एवोदाहरणम्। तत्र संशयः-किं स्विष्टकृदिडादिकं न कर्तव्यमुत कर्तव्यमिति। तत्राज्यभागाभ्यामेव निराकाङ्क्षत्वात् न कर्तव्यमति प्राप्ते। "अग्नये स्विष्टकृते समवद्यति इडामुपह्वत इति प्रत्यक्षश्रुतत्वात् कर्तव्यमिति॥

(टि) प्रत्यक्षश्रुतत्वादिति। प्रकृताविव प्रकरणेन सर्वेषां युगपद् ग्रहणान्न विकल्प इति भावः॥

**॥ गृहमेधीये प्राशित्रादिभक्षणाभावाधिकरणम्॥**

**सू. स्विष्टकृद्भक्षप्रतिषेधः स्यात्तुल्यकारणत्वात्॥**

(मू) गृहमेधीये श्रूयते-"अग्निं स्विष्टकृतं यजतीति। तत्र प्राकृताङ्गपुनःश्रवणं परिसङ्ख्यार्थमिति कृत्वा चिन्त्यते। तत्र संशयः-किं स्विष्टकृच्छ्रवणेन शेषकार्याणि परिसङ्ख्यायन्ते नेति। तत्रेडोपाह्वानदर्शनात् परिसङ्ख्यायन्त इति प्राप्ते। ब्रूमः। विहितस्य पुनः



श्रवणात् परिसङ्ख्यायन्त इति॥

(टि) परिसङ्ख्यार्थमिति। परिसङ्ख्यार्थत्वेऽपि समानजातीयमेव परिसङ्ख्यायते शीघ्रोपस्थापनात्। अत आज्यभागाभ्यां यागान्तराणि परिसङ्ख्यायन्ते न शेषकार्याणीति चिन्तावकाश इति। परिसङ्ख्यायन्त इति। इडादर्शनं तु वचनान्तर विहितत्वादुपपन्न सान्नाय्यशेषकार्यस्यानिवृत्तौ लिङ्गमिति भावः॥

**॥ प्रायणीयातिथ्ययोः शंय्विडान्ततानियमाधिकरणम्॥**

**सू. शंय्विडान्तत्वे विकल्पः स्यात् परेषु पत्न्यनुयाजप्रतिषे-धोऽनर्थकः स्यात्॥**

(मू) ज्योतिष्टोमे श्रूयते-"शंय्वन्तां प्रायणीयाः सन्तिष्ठते पत्नीः॥ संयाजयन्ति इडान्तातिथ्या सन्तिष्ठते॥ नानूयाजान् यजतीति। तत्र संशयः-किं प्रायणीयातिथ्ये शंय्वन्त इडान्ते वा कृत्स्नसंस्थे वेति विकल्पः उत शंय्वन्तेडान्ते एवेति।

तत्र शंय्वन्तेडान्ताप्राप्ता कर्तव्यत्वानां पराङ्गानांपत्नीसंयाजानुयाजाकर्तव्यतावचनेन परिसङ्ख्यानात् विकल्प इति प्राप्ते। ब्रूमः। वाक्यभेदविकल्प परिसङ्ख्यादोषपरिहाराय पत्नी संयाजानूयाजाकर्तव्यतावचनस्य अनुवादत्वस्वीकारात् शंय्वन्तेडान्ते एव प्रायणीयातिथ्ये इति॥

(टि) शंय्वन्तेडान्तेति। शंय्विडान्तवचनेन तत्संस्थाविधानात् पत्नीसंयाजानामकर्तव्यतावचनेन परिसङ्ख्यारूपेण पत्नीसंयाजा-नूयाजानेव न कुर्यादन्यत्तु कुर्यादित्येवमङ्गान्त-राणामकर्तव्यता प्रतिषेधेन कर्तव्यताविधानेन कृत्स्नसंस्थाविधानाच्च विकल्पइत्यर्थः। वाक्यभेदेति। वाक्यभेद एव तावदन्याय्यः। विकल्पश्चाष्टदोषः परिसङ्ख्या च त्रिदोषा। तद्वरं शंय्विडान्तविधिः स्तुत्यर्थत्वेनार्थवादत्वमिति भावः॥

**॥ प्रायणीयातिथ्ययोः पूर्वाभ्यामेव शंय्विडाभ्यां संस्थाधिकरणम्॥**

सू. प्रतिषेधार्थवत्वाचोत्तरस्य परस्तात् प्रतिषेधः स्यात्॥

(मू) ज्योतिष्टोमे श्रूयते-"शंय्वन्ता प्रायणीया सन्तिष्ठते; न पत्नी संयाजयन्ति इडान्तातिथ्या सन्तिष्ठन्ते नानूयाजान् यजतीति, तत्र ते शंय्विडान्ते इत्युक्तम्। तत्र शंय्विडान्तयोः संशयः। प्रकृतौ द्वौ शंयू पत्नीसंयाजानां पुरस्तात् परस्ताच्चेति इडे अपि द्वे अनूयाजानां पूरस्तात् परस्ताचेति। तत्र किमनियमः उत पराभ्यां शंय्विडाभ्यां शंय्विडान्ततोऽपूर्वाभ्यामिति। तत्र विशेषाभावादनियम इति इति चेत्, उच्यते, पत्नीसंयाजानूयाजप्रतिषेधार्थत्वायात्र पर्यग्निकृतोत्सर्गवत् शांत्विडान्ताङ्गरीतिविधानात् पराभ्यां शंय्विडाभ्यामेव शंय्विडान्ततेति। अत्रोच्यते। धात्वर्थविधानकृतश्रुत्यर्थानुग्रहाय धात्वर्थभूतोपरमा-त्मकसंस्थाविधानात् पूर्वाभ्यामेव शंय्विडाभ्यां शंय्विडान्ततेति। अत्रेदमवधेयम्। यद्यङ्गरीतिर्विधीयते तदा शंय्विडाभ्यां प्राञ्चः सर्वे पदार्थाः कर्तव्यतया विहिताः। तत्र पूर्वयोः शंय्विडयोः गृह्यमाणयोः शंय्वोरिडयोश्च मध्यगता ये पदार्थाः कर्तव्यत्वेन विहिताः ते बाध्येरन्। तत्र विध्यतिक्रमः स्यात्। उत्तरयोर्ग्रहणे तु न स दोष इति उत्तरयोर्ग्रहणं, यदा संस्था विधीयते तदा शंय्विडयोः कृतयोः समवस्थानं कर्तव्यमिति समापनं विधीयते। तत्र यजोत्तरयोर्ग्रहणं तदा पूर्वयोःकृतयोः कृते शंय्विडे समापनं च न कृतमिति विध्यतिक्रमः स्यात् पूर्वयोर्ग्रहणे तु स दोषो नेति पूर्वयोर्ग्रहणमिति विवेक इति॥

(टि) कथमङ्गरीतिविधौ परयोर्ग्रहणं संस्थाविधौ पूर्वयोर्ग्रहणमित्यत्राह अत्रेदमित्यादिना॥

## ॥ उपसदामपूर्वार्थत्वाधिकरणम्॥

## सू. उपसत्सु यावदुक्तमकर्म स्यात्॥

(मू) ज्योतिष्टोमे उपसदः श्रूयन्ते-"उपसदउपसद्यन्त इति। ताः प्रकृत्य श्रूयते -अप्रयाजास्ता अननूयाजा इति। तथा नान्यमाहुतिं पुरस्ताज्जुहुयात् यदन्यामाहुतिं पुरस्ताज्जुहुयात् अन्यन्मुखं कुर्यात् स्रुवेणाघारमाघा-रयतीति।



तत्र संशयः-किमिदं स्रुवाघारवचनं प्रतिषिद्धप्रतिप्रसवार्थं तत उपसदां अपूर्वत्वाभावाचोदकप्राप्तनां प्रयाजानूयाजानां प्रतिषेधार्थं अप्रयाजाननूयाजवचनं; ततश्च प्रतिषिद्धप्रयाजादिवर्जमन्यत् सर्वं प्राकृतमङ्गजातं कर्तव्यं; अथवा प्रत्यविहिघारादिना चोदकप्राप्तनामन्येषां परिसङ्ख्यानार्थं स्रुवाघारवचनं अथवा विधायकं सत् उपसदामपूर्वतां गमयति; अप्रयाजाननूयाजवचनं त्वनुवादमात्रं। ततश्च प्रत्यक्षश्रुतं सर्वंश्रकर्तव्यं अश्रुतं सर्वं न कर्तव्यमिति।

तत्र स्रुवाघारवचनस्य प्रतिप्रसवरूपत्वात् प्रतिषिद्धिप्रतिप्रसवार्थं स्रूवाघारवचन; ततश्चोक्तरीत्या प्रतिषिद्धप्रयाजादिवर्जं सर्वं कर्तव्यमिति प्राप्ते।

ब्रूमः। आघारादीनामभावशङ्काया अभावात् न प्रतिप्रसवार्थं किन्तु परिसङ्ख्यार्थम्। अथवा न त्रिदोषदुष्टपरिसङ्ख्यार्थम्। किन्तु स्तुतिसम्बन्धा ख्यातयोः सत्वात् स्रुवाघारवचनं विधायकं सत् उपसदामपूर्वतां गमयति। अप्रयाजाननूयाजवचनं त्वनुवादमात्रम्। ततश्च श्रुतं सर्वं कर्तव्यं अश्रुतं सर्वं न कर्तव्यमिति॥

(टि) परिसङ्ख्यापक्षो गृहमेधीयवन्निरस्तोऽपि सम्भवमात्रेणोपन्यस्यति-अथवा प्रत्यक्षेति। अनुवादमात्रमिति। आख्याताभावादिति भावः। विधायकमिति । आख्यातसत्वात् "यज्ञस्य प्रज्ञात्या "इति स्तुतिसम्बन्धाचेति भावः।

## ॥ अवभृथेऽपूर्वकर्मताधिकरणम्॥

## सू. अवभृथे बर्हिषः प्रतिषेधात् शेषकर्म स्यात्॥

(मू) अस्ति ज्योतिष्टोमेऽवभृथः-"वारुणेनैककपालेनावभृथं यन्तीति। तत्रावभृथे श्रूयते-"अप्सुमन्तावाज्यभागौ यजतीति। अथ ता अपवर्हिषः प्रयाजान् यजति अपबर्हिषावनूयाजौ यजतीति। तत्र संशयः-किमिदमाज्यभागवचनं अप्सुमत्ताविधानार्थं ततश्चवभृथस्यापूर्वत्वाभावात् चोदकप्राप्तानां मध्ये बर्हिः

प्रयाजानूयाजप्रतिषेधार्थं अपबर्हिर्वर्जनद्वयं ततश्चावभृथे बर्हिर्नामकं चतुर्थप्रयाजं प्रथमानूयाजं च वर्चयित्वा अन्यत् सर्वं कर्तव्यमुताज्यभागवचनं परिसङ्ख्यार्थं अथवा आज्यभागविधानार्थं सदवभृथस्यापूर्वस्य गमकं ततश्चावभृथोऽपूर्वः उभयथापि बर्हिर्वचनं बर्हिर्व्यतिरिक्त प्रयाजानूयाजविधानार्थं ततश्चावभृथे प्रत्यक्षश्रुतं सर्वं कर्तव्यं तव्द्यतिरिक्तं तु सर्वं न कर्तव्यमिति।

तत्राज्यभागयोरप्सुमत्ताया अप्राप्तत्वात् तद्विधानार्थं आज्यभाग वचनं ततश्चोक्तरीत्या बर्हिर्नामकं प्रयाजमूयाजं च वर्चयित्वान्यत् सर्वं कर्तव्यमिति प्राप्ते।

ब्रूमः। लिङ्गक्रमप्राप्तमन्त्रवर्णप्राप्ताप्सुमत्ताया अविधेयत्वात् परिसङ्ख्यार्थं वचनम्। अथवा परिसङ्ख्याया त्रिदोषत्वादाज्यभागविधानार्थं, ततश्चोक्तरीत्या प्रत्यक्षश्रुतर्व्यतिरिक्तं सर्वं न कर्तव्यमिति॥

(टि) अत्रपि परिसङ्ख्योपन्यासः पूर्ववदिति द्रष्टव्यम्॥

॥ वाजपेयादौ यूपादीनां खादिरत्वादिनियमाधिकरणम्।

सू. विरोधिनामेकश्रुतौ नियमः स्याद् ग्रहणस्यार्थवत्वात् शरवाच्च श्रुतितो विशिष्टत्वात्॥

(मू) अस्ति वाजपेयः-"शरदि वाजपेयन स्वाराज्यकामो यजेतेति। तत्र श्रूयते खादिरो यूपो भवतीति तथान्यत् श्रूयते "बृहत् पृष्ठं भवतीति, त्रैधातव्यायां श्रूयते "यवमयो मध्यम "इति। एवंविधेषु संशयः-किं प्रत्यक्षश्रुतस्य खादिरादेरथदृष्टस्य पालाशादेश्च विकल्प उत श्रूतस्यैव नियम इति। तत्र परिसङ्ख्यास्त्रिदोषत्वात् यथाचोक्तं विकल्प इति प्राप्ते। ब्रूमः। प्रत्यक्षपुनःश्रुतेर्वैयर्थ्यपरिहाराय नियमार्थत्वाभ्युपगमात् श्रुतस्यैव नियम इति॥

(टि) नियम इति। ततश्चार्थाभावात् पलाशादीनां निवृत्तिः; यथा प्रकृतावर्थादनेकद्रव्यकत्वे प्राप्ते व्रीहिखदिरादिश्रवणेन नियमादन्येषां



निवृत्तिस्तथेति।

॥ काम्येष्टिषु प्राकृतद्रव्यदेवतस्य निवृत्त्यधिकरणम्॥

सू. सर्वासां च गुणानामर्थवत्वात् ग्रहणमप्रवृत्ते स्यात्॥

(मू) काम्या यागाः श्रूयन्ते-"आग्नेयमष्टाकपालं निर्वपेत् रुक्कामः अग्नीषोमीयमेकादशकपालं निर्वपेत् श्यामाकं; वसन्ता ब्रह्मवर्चसकामः ऐन्द्राग्नेमेकादशकपालं प्रजाकामः इत्येवमादयः। तेषु यागेषु संशयः-किं चोदकप्रत्याम्नानयोः प्रत्याम्नानस्य बलवत्वात् चोदकप्राप्तं द्रव्यदेवतं प्रत्याम्नातेन द्रव्यदेवतेन बाध्यते उत तुल्यबलत्वाद्विकल्पः समुचयोवेति। तत्र शस्त्रप्रमाण्याविशेषात् तुल्यबलत्वाचोदकप्राप्त-प्रत्यम्नातयोः विकल्पः समुच्चयो वेति प्राप्ते। ब्रूमः। आनुमानिकसामा-न्यसावकाशचोदकात् प्रत्यक्षविशेषनिरवकाशत्वात् प्रत्याम्नातस्य बलवत्वाचोदकप्राप्तं प्रत्याम्नातेन बाध्यत इति। इदं त्ववधेयं अत्राप्राप्तबाध एवेति॥

(टि) अध्यायादावर्थलोपाद्बाधश्चिन्तितः। प्रत्याम्नातस्य तु बाधकत्वं सिद्धवत्सवंव्यवहृतम्। इदानीं तु तदेव चिन्त्यते तत्र तद्वर्जनप्राप्तिर्निराकृत इति। व्रीह्यादयश्चोदकेन प्राप्यन्तेनहि प्राप्तं शक्यं केनचिद्बाधितुम्। शास्त्रप्रमाण्याविशेषादित्याह-शास्त्रेति। विकल्प इति। यथा "नार्षेयं वृणीत "इति प्रत्यक्षमपि प्रतिषेधः पक्षे चोदकप्राप्तेन वरणेन विकल्प इति वक्ष्यति तथेति भावः।

॥ सोमापौष्णचरौ खादिरयूपस्य नियमाधिकरणम्॥

सू. तथैकार्थविकारे प्राकृतस्याप्रवृत्तिः प्रवृत्तौ हि विकल्पः स्यात्॥

(मू) सोमापौष्णपशौ श्रूयते-"औदुम्बरो यूपो भवतीति। तत्र संशयः-किं प्राकृतं यूपद्रव्यमत्र प्राप्यते उत बाध्यत इति। तत्र द्वयोरपि सहनियोजनसम्भवात् प्राप्यत इति प्राप्ते। ब्रूमः। निरपेक्षत्वेन विहितयोः समुचये विहिताननुष्ठानप्रसङ्गात् प्राकृतं बाध्यत इति। वस्तुतस्तु-औदुम्बरवचने न यूपान्तरं विधीयते किंतु प्राकृतस्य यूपस्यौदुम्बरता

विधीयत इति समुच्चयशङ्कैवात्रनास्तीति ॥

(टि) नियोजनसम्भवादिति। असति विरोधे न युक्तो बाध इति भावः। समुच्चये द्वयोरपि बाधः स्यादित्याशयेनाह-निरपेक्षेति ॥

**॥ ब्रह्मवर्चसकामैः व्रीहिभिरेव यागाधिकरणम् ॥**

**सू. विकृतौ त्वनियमः स्यात् पृषदाज्यवद्ग्रहणस्य गुणार्थत्वात्। उभयोश्च प्रदिष्टत्वाद् गुणशास्त्रं यदेति स्यात् ॥**

(मू) यत्र प्राकृतानां विकल्पितानां व्रीहियवादीनां अन्यतरत् गुणसहितं विकृत्युत्पत्तिवाक्ये श्रूयते। यथा-"सोमारौद्रं चरुं निर्वपेत् कृष्णानां व्रीहीणां; सौर्यं चरुं निर्वपेत् शुक्लानां व्रीहीणां ब्रह्मवर्चसकाम इति। क्वचित्त्वेवं दृश्यते -"सोमारौद्रं चरुं निर्वपेत् शुक्लानां व्रीहीणां ब्रह्मवर्चसकाम इति। तत्र संशयः किमत्र व्रीहिविधायकत्वाभावात् यवबाधाभावात् शुक्लकृष्णव्रीहिभिर्वा यवैर्वा यष्टव्यमिति विकल्प उत द्रव्यगुणविशिष्टकर्मविधानात् व्रीहिभिः यवानां बाधात् शुक्लकृष्णव्रीहिभिरेव यष्टव्यमिति। तत्र व्रीहिग्रहणस्य शुक्लादिगुणसम्बन्धार्थत्वात् व्रीहिविधायकत्वाभावात् यवबाधाभावाद्विकल्प इति प्राप्ते। ब्रूमः। एकेन वाक्येन यागस्य चोदकप्राप्तव्रीह्युद्देशगुणस्य च विधानासम्भावात् द्रव्यगुणविशिष्टिकर्मविधानाद्यबाधात् शुक्लकृष्णव्रीहिभिरेव यष्टव्यमिति ॥

(टि) विषयं शोधयति यत्रेत्यादिना ॥

**॥ पञ्चावदानतायाः सर्वाङ्गसाधारणताधिकरणम् ॥**

**सू. यथाश्रुतीति चेत् ॥**

(मू) सोमे अग्नीषोमये पशौ श्रूयते-"यद्यपि चतुरवत्ती यजमानः पञ्चावत्तैव कार्येति। तत्र संशयः-किमिदं पञ्चावदानं वपायामेव उत हृदयादिष्वङ्गेष्वपीति। तत्र वपोद्देशेन पञ्चावदानविधानात् वपायामेवेति प्राप्ते। ब्रूमः। चोदकप्राप्तावदानोद्देशेन पञ्चत्वसङ्ख्यार्त्वाविधानात् हृदयादिष्वपीति। इदं त्ववधेयम्-अवदानस्य प्राप्तत्वात् न विधेयत्वं



उद्दिश्यमानस्यावदानस्य च वपयाविशेषणमपि न सम्भवति विशिष्टोद्देशप्रयुक्तवाक्यभेधप्रसङ्गात्। तस्मान्निष्ठान्तप्रकृत्यर्थभूतावदाने पञ्चत्वमेव विधीयते अन्यप्रकारासम्भवादिति ॥

**॥ इति दशमाध्यायस्य सप्तमः पादः ॥**

(टि) वपोदृशेनेति। चमसाधिकरणन्यायोऽत्र द्रष्टव्य इति। पञ्चावदानेति। पञ्चसङ्ख्याविशिष्टमवदानान्तरमप्राकृतावदानकार्य मध्वर्युप्र (प्रा) काशदानवद्विधीयते। तच्च वपापूर्वस्याङ्गापूर्वेभ्यो भिन्नत्वाच्च न सङ्कीर्यत इति भावः। तेषु दव्यवदानवचनादुपस्तरणस्य अभिघारणस्य वा विवृद्ध्या पञ्चत्वं सम्पाद्यमिति भावः। ननु समासैकदेशार्थमवदानमुद्दिश्यैवदेशान्तरं त्र्यङ्गवन्न विधातुं शक्यत इत्यत्राह-इदमित्यादिना ॥

**॥ इति केरलीये षोडशाध्यायीटिप्पणे ॥**

**॥ दशमस्याध्यायस्य सप्तमः पादः**

**॥ श्रीः ॥**

**(मू) ॥ अथ दशामाध्ययस्य अष्टमः पादः ॥**

**॥ प्रदेशानारभ्यविधानयोर्निषेघस्य पर्युदासताधिकरणम् ॥**

**सू. प्रतिषेधः प्रदेशेऽनारभ्यविधाने च प्राप्तप्रतिषिद्धित्वाद्विकल्पः स्यात् ॥**

महापितृयज्ञे दार्शवौर्णमासिकविध्यन्ते प्रदिष्टे श्रूयते-नार्षेयं वृणीतें न होतारमिति। क्वचित्तु-"न होतारं वृणीते नार्षेयमिति दृश्यते। तथानारभ्य श्रूयते-"आश्रावये चतुरक्षरं अस्तु श्रोषडिति चतुरक्षरं यजेति दव्यक्षरं ये यजामह इति पञ्चाक्षरं द्व्यक्षरो वषट्कारः एष वै सप्तदश प्रजापतिर्यज्ञमन्वायत्तः"इति। तत्र श्रूयते -"नानूयाजेषु वषट्कारं करोतीति। तत्र संशयः, किं "नार्षेयं नानूयाजेष्विति च प्रतिषेधः, ततश्च महापितृयज्ञे प्रदिष्टवरणतत्प्रतिषेधयोरनूयाजेषु चानारभ्यवचनप्राप्तयज़मानतत्प्रतिषेधयोश्च विकल्प उत पर्युदासः; ततो

वरणस्य ये यजामहस्य च नियमेन वर्जनमेवेति। तत्र पर्युदासे नञनूयाजशब्दयोर्यागान्तरेषु नञ्वृणोत्योश्च वरणव्यतिरिक्तचोदकप्राप्ताङ्गान्तरेषु च लक्षणायाः प्रसङ्गात् श्रुत्यर्थलाभाय प्रतिषेधः। ततश्च विकल्प इति प्राप्ते। ब्रूमः। अष्टदोषदुष्टविकल्पपरिहाराय लक्षणाश्रयणस्यादुष्टत्वात् पर्युदासः ततो नियमेन वर्जनमिति। अत्रायं विवेकः-यत्र रागतः प्राप्तं प्रतिषिध्यते तत्र प्रतिषेधस्य नियमस्वरूपत्वात् वर्जनमेव विकल्पः यथा "ब्राह्मणो न हन्तव्य इत्यादौ। यत्र श्रूत्यैव प्राप्तस्य प्रतिषेधः तत्र विहित प्रतिषिद्धत्वात् विकल्पः। यथा षोडश्यादौ साधारणप्राप्तो पर्युदास इति॥

॥ श्रीः॥

## अथ दशमस्याष्टमः पादः॥

(टि) इदानीं प्रतिषेधनिबन्धनो बाधश्चिन्त्यते। श्रुत्यर्थलाभायेति। किञ्च नञा उत्तरपदेन सम्बन्धे समासस्य नित्यत्वात् समासप्रसङ्गश्चेति द्रष्टव्यम्। विकल्प इति। आनुमानिकस्य चोदकस्य प्रत्यक्षस्य च प्रतिषेधस्य सामान्यविषयस्य येयजामहविधेः विशेषविषयस्य च प्रतिषेधस्य चातुल्यबलत्वेऽपि प्रतिषेधस्य प्राप्त्यपेक्षत्वाद्विकल्पः। तद्धि प्रत्यक्षशास्त्रमानुमानिकस्य विशेषशास्त्रं सामान्यशास्त्रस्य च बाधने समर्थं; यत्तन्निरपेक्षमात्मानं लभते यथा शरपदशास्त्रे कुशाहवनीययोः। नहि शरविधिः कुशप्राप्तिमपेक्षते कुशकार्यमात्रापेक्षित्वात्। पदविधिरपि होममात्रापेक्ष नाहवनीयप्राप्तिमपेक्षते। तेन तत्प्राप्तेः प्रागेव प्रत्यक्षविशेषशास्त्राभ्यां शीघ्रविहिते शरपदे पश्चात् सामान्यद्वार लक्षणया मन्दं प्राप्यमाणयोः कुशाहवनीययोः प्राप्तिं निवारयत इति युक्तो बाधः। इह तु प्रत्यक्षविशेषयोरपि प्राप्त्यपेक्षत्वान्न (विकल्प इति भावः) सामान्यानुमानिकयोः प्राक् प्रवृत्तिः किन्तु पश्चादेव। तत्र शास्त्रद्वयप्रामाण्याच्च विकल्प इति भावः। पर्युदास इति। यत्तु नित्यसमासत्वात् समासप्रसङ्ग इति तद् भाष्यकारेणेत्थं परिहृतम्-



कात्यायनमने नित्यसमासः पाणिनिमते तु समासस्य विकल्प एव। सद्वादी पाणिनिः असद्वादी कात्यायनः सद्वादित्वात् पाणिनेर्वचनं प्रमाणं न कात्यायनस्य असद्वादीत्यतो विकल्प एव समासस्येति। तन्न; व्याकरणदर्शनानुसारीति द्रष्टव्यम्। व्याकरणानुसारि समाधानं तु बाहुलकादिकमिति। नञर्थ विविनक्ति अत्रेत्यादिना।

### ॥ निषेधस्यार्थवादताधिकरणम्॥

### सू. अपूर्वे चार्थवादः स्यात्॥

(मू) दर्शपूर्णमासयोराचज्यभागावग्नीषोज्यभां यजतीत्याज्यभागौ विधाय श्रूयते "तौ न (नतौ) पशौ करोति न सोम इति। क्वचिन्न" सौम्येऽध्वर इति दृश्यते। तत्र न सोम इत्यत्र संशयः; किं; प्रतिषेध; उत; पर्युदासः उत प्रतिषेधपर्युदासयोः असम्भवादर्थवाद इति। तत्रासमस्तत्वात् प्रतिषेध इति चेत्। उच्यते। विकल्पभयात् पर्युदास इति। एवं प्राप्ते। ब्रूमः। सोमे आज्यभागयोरप्राप्यत्वात् प्रतिषेधपर्युदासयोरसम्भवात् न पशावित्यस्यायमर्थवाद इति। पशौ तु आज्यभागयोर्विकल्पः चोदकप्राप्तत्वात् प्रतिषिद्धत्वाचेति स्थितम्।

केचित्तु पशौ पर्युदास इत्याहुः। तन्न। आज्यभागविधेः केवलदर्शपूर्णमासविषयत्वात् पश्वपशुसाधारण्याभावादिति चान्ये॥

(टि) विकल्पभयात् पर्युदास इति। अयमाशयः-यद्यपि साक्षात् सोमे आज्यभागौ न स्तस्तथापि दीक्षणीयाद्यङ्गद्वारा तत्सम्बन्धोऽस्तीति "वाजपेयस्य यूप" इतिवत् सोमाङ्गेष्वेव दीक्षणीयादिष्वाज्यभागयोः प्रतिषेधः पर्युदासो वेति। यद्युपदेशेनवातिदेशेन वाज्यभागौ सोमे प्राप्नुयातां तदा प्रतिषेधः स्यात्। यदि वा सोमासोमसाधारणमाज्यभागविधानं स्यात्तदा पर्युदासः स्यात् तदुभयमपि नास्तीत्याशयेनाह सोम इत्यादिना। यत्तु वाजपेयस्य यूपवदिति तन्न तत्र सम्बन्धमात्रभिधायिवि, षष्ठा लक्षणां विनैव परम्परासम्बन्धमभिधत्त इति युक्तम्। इह तु सप्तमी। सा त्वाधाराधेयभावमेवाभिधत्ते। स चाङ्गाङ्गित्वेन विना न सम्भवतीति

सोमशब्दे लक्षणा स्यात्। सा न युक्तेति भावः। ननु तर्हि न पशावित्यत्र कथमित्यत्राह-पशौ त्वित्यादिना॥

## ॥ अतिरात्रे षोडशिग्रहनिषेधस्य विकल्परूपताधिकरणम्॥

## ॥ सू. शिष्ट्वा तु प्रतिषेधः स्यात्॥

(मू) इदं श्रूयते-"अतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णातीति। तत्र संशयः-किमत्र पर्युदासः उतार्थवादः उत पर्युदासार्थवादयोरसंभावात् प्रतिषेधः; अगत्या च विकल्प इति। तत्र विकल्पभ्यात् पर्युदास इति चेत्। उच्यते। असमस्तत्वादर्थवाद इति प्राप्ते। ब्रूमः। विधिप्रतिषेधयोरेकविषयत्वात् पर्युदासार्थवादयोरसम्भवात् प्रतिषेधोऽगत्या च विकल्प इति। तदयं विवेकः सामान्यविषये विधौ विशेषविषये नञ् पर्युदासः अप्राप्त विषयस्त्वर्थवादः विधिसमानविषयश्च प्रतिषेध इति॥

(टि) इदानीं क्व नञ् प्रतिषेध इत्युच्यते विकल्प इति :- प्रतिषेधार्थवत्त्वायाकरणेऽपि क्रतुसिद्धिरस्तीति कल्प्यते; विध्यर्थवत्त्वाय चानुष्ठाने फलभूयस्त्वमित्युभयोरुपपत्तिरिति बोध्यम्॥

## ॥ जर्तिलोक्तौ निषेधस्यार्थवादताधिकरणम्॥

## सू. न चेदन्यं प्रकल्पयेत् प्रक्लृप्तावर्थवादः स्यात् आनर्थक्यात् परसामर्थ्याच्च॥

(मू) अग्निहोत्रे श्रूयते-"जर्तिलयवाग्वा वा जुहुयात् गवीधुकयवाग्वा वा जुहुयात्न ग्राम्यान् पशून् हिनस्ति नारण्यानथो खल्वाहुरनाहुतिर्वै जर्तिलाश्च गवीधुकाश्च पयसाग्निहोत्रं जुहुयादिति। जर्तिला आरण्यास्तिलाः; गवीधुका आरण्या गोधुमाः। तत्र संशयः-किं विहितानां जर्तिलगवीधुकानां अनाहुतिवादः प्रतिषेध उत जर्तिलादिनिन्दाद्वारा पयोहोमस्तुत्यर्थोऽर्थवाद इति। तत्र पूर्वन्यायात् प्रतिषेध इति प्राप्ते।

ब्रूमः। पयोविधिसिद्धे प्रतिषेधप्रयोजनविकल्पे



आनर्थक्याज्जर्तिलादिनिन्दाद्वारा पयोहोमस्तुत्यर्थोऽर्थवाद इति। ततश्च जर्तिलादिनिन्दाद्वारा पयोहोमस्तुत्यर्थोऽर्थवाद इति। ततश्च जर्तिलादि-विधिरपि तन्निन्दार्थत्वात् पयोहोमस्तुत्यर्थ एवार्थवादः न विधिरिति। जर्तिलेत्यादि गवीधुकाश्चेत्यन्तः सर्वोर्थवादः पयोमात्रं तु विधीयत इति स्थितम्॥ इदमवधेयम्-यत्रैक एव विधीयते तद्विषय एव नञ् तत्रैव नञ् प्रतिषेधार्थः यत्र तु एकार्थत्वेनानेकविधानं तत्र नञर्थवाद एवेति॥

(टि) इदानीमधिकरणत्रयसिद्धमर्थं सुग्रग्रहणायाह-तदयमित्यादिना॥

## ॥ त्रैयम्बकादावभिघारणानभिघारणादीनामर्थवादताधिकरणम्॥

## सू. पूर्वैश्च तुल्यकालत्वात्॥

(मू) चातुर्मास्येषु त्र्यम्बकमन्त्रसंयोगेन त्र्यम्बकनामका एककपालाः पुरोडाशा विहिताः। तान् त्र्यम्बकानधिकृत्य समामनन्ति-"अभिघार्यभिघार्यं नाभिघार्य नाभिघार्य इति मीमांसन्ते ब्रह्मवादिनः यदभिधारयेत् रुद्रायास्य पशूनभिदध्यात् यन्नाभिघारयेत् रुद्रायास्य पशुन्नाभिदध्यात् यन्नाभिधारयेत् रुद्रायास्य पशून्नाभिदध्यात् तन्नसूक्ष्यं अथो खल्वाहुरभिधार्या एव नहि हीवरनभिघृतमस्ति इति। तथाधाने श्रूयते होतव्यमग्निहोत्रं न होतव्यमग्निहोत्रं न होतव्यं न होतव्यमिति मीमांसन्ते ब्रह्मवादिनः यत् यजुषा जुहुयात् अयथापूर्वमाहुतीजुहुयात् होतवायं यना पूर्व्या हुतीर्जहोतिः परापतेत् तूष्णीमेव नाग्निः परापततीति। तत्र संशयः-किमभिघार्यो होतव्यमिति चोपक्रमस्वं वचनं विधानार्थं नाबिधार्या न होतव्यमिति च प्रतिषेधार्थं ततश्च विहितप्रतिषिद्धत्वात् अभिधारणहोमयोर्विकल्पः मीमांसाशब्दोऽन्ते अभिघार्या इति वचनं चानुवादः; तूष्णीमेव होतव्यमिति वचनं तु तूष्णीम्भावगुणविधानार्थं; अथवा उपक्रमस्थं वचनद्वयं न विधानार्थं ततश्च नञ्युक्तवचनद्वयमपि न प्रतिषेधार्थं अन्ते श्रूयमाणवचनद्वयमेव विधानार्थं; अन्यः सर्वोऽर्थवादः; ततश्चाभिघारणहोमयोर्विधेयत्वस्य निर्विवादत्वात्

मुख्यश्रुत्यर्थानुग्रहायोक्तरीत्या विकल्प इति प्राप्ते। ब्रूमः। अभिघारणानभिघारणयोर्होमाहोमयोश्चोपक्रमस्थयोर्मीमांसासम्बन्धावगमात् उपक्रमस्थमित्याद्युक्तरीत्यार्थवादो नियमेनानुष्ठानंचेति॥

(टि) इदानीमपवादः क्रियते शिष्ट्वापि श्रूयमाणो नञ् क्वचित् प्रतिषेधार्थमपहायार्थवादार्थो भवतीति। यत्र विध्यन्तरैकवाक्यत्वं भवति तत्रेति। विहितप्रतिषेधस्य हि प्रयोजनं तच्चेहान्यथासिद्धमित्याशयेनाह वयोविधीत्यादिना। अनुवाद इति। नञो विहितप्रतिषेधार्थत्वात्तद्युक्तं वाक्यं न मीमांसाविशेषणं ततश्चैकपक्षावलम्बिनी मीमांसा न सम्भवतीति प्रयोगदशायां विकल्पप्रयुक्तान्यतरपक्षपरिग्रहायार्थप्राप्ता मीमांसानेनानूद्यत इति भावः। मीमांसासम्बन्धावगमादिति। विचार्यमाणानामिति पुनर्दर्शनादिति भावः॥

## ॥ आधान उपवादस्य विकल्पताधिकरणम्॥

### सू. उपवादश्च तद्वत्॥

(मू) आधाने श्रूयते-"य एवं विद्वान् वारवन्तीयं गायते; य एवं विद्वान् यज्ञायज्ञीयं गायते य एवं वामदेव्यं गायत" इति। तत्रेदमपरमाम्नायते- "उपवीता वा एतस्याग्रयो भवन्ति यस्याग्र्याधेये ब्रह्मसामानि गायतीति"। यस्यएग्न्याधेये ब्रह्म ब्राह्मण उद्गातसामानि गायति एतस्याग्नये उपवीताः परित्यक्ताः भवन्ति तस्मान्न ब्रह्मा उद्गात सामानि गायेदित्यर्थः। तत्र संशयः किं पर्युदास उतार्थवादः उत प्रतिषेध इति। तत्र ब्रह्मणः सामगानप्राप्तत्वात् न पर्युदासः किन्त्वनुवादोऽर्थवाद इति प्राप्ते। ब्रूमः। अनुवादमात्रस्यानर्थक्यात् प्रतिषेधः। ब्रह्मशब्दस्तु उद्गातृपरोऽनुवाद इति। तस्मादाधाने सामगानस्य विकल्प इति।

(टि) उद्गातृपर इति। ब्रह्मशब्दो ब्राह्मणपरस्सन् उद्गातृपरो भवति नर्त्विक्पर इति भावः।

## ॥ दीक्षितदाननिषेधस्य पर्युदासताधिकरणम्॥



### सू. दीक्षितस्य दानहोमपाकप्रतिषेधोऽविशेषात् सर्वदानहोमपाकप्रतिषेधः स्यात्॥

(मू) ज्योतिष्टोमे श्रूयते-"दीक्षितो न जुहोति न ददाति न पचतीति। तत्र संशयः - किमयं पुरुषार्थानां क्रत्वर्थानां च उपदिष्टानां अतिदिष्टानां च सर्वेषां दानहोमपाकानां प्रतिषेध उतातिदिष्टानां पुरुषार्थानां च प्रतिषेधः उत पुरुषार्थानामेव प्रतिषेधः अथवा पर्युदास इति। तत्राविशेषात् सर्वेषां। प्रतिषेध इति चेत्। उच्यते, उपदिष्टानां क्रत्वर्थानामग्निहो...दिपुरुषार्थानां च प्रतिषेध इति। अत्रोच्यते। क्रत्वर्थानां विकल्पप्रसङ्गात् तद्वर्जं पुरुषार्थानामग्निहोत्रादीनामेव प्रतिषेध इत्येवं प्राप्ते। ब्रूमः। तत्रापि विकल्पप्रसङ्गात् पर्युदास इति। अथवा पुरुषार्षतया क्रतुमध्ये प्राप्तानां अग्नीहोत्रादीनां क्रत्वार्थतया प्रतिषेधः। ततश्च ऐकार्थ्याभावान्न विकल्पः नच लक्षणाप्रसङ्ग इति प्रतिषेध एव फलतश्च पर्युदास इत्युच्यत इति॥

(टि) न च लक्षणेति। कथं नर्हि सूत्रभाष्यकाराभ्यां पर्युदासत्वमुक्तमत्राह-प्रतिषेध एवेति॥

## ॥ वर्त्महोमादिराहवनीवस्य बाधाधिकरणम्॥

### सू. अविशेषेण यच्छास्त्रमन्याय्यत्वाद्विकल्पस्य ततसन्दिग्धमाराद्विशेषशिष्टं स्यात्॥

(मू) ज्योतिष्टोमे श्रूयते-"पदे जुहोति वर्त्मनि जुहोती"ति। राजसूये श्रूयते-"वल्मीकवपामुत्सृज्य जुहोती"ति। तथान्यत्र श्रूयते- "गार्हपत्ये पत्नीसंयाजान् जुहीती"ति। तथानारभ्य श्रूयते- "यदाहवनीये जुहोति तेन सोऽस्य अभीष्टः प्रीतो भवती"ति। तत्र संशयः- किं विशेषविहितैः पदादिभिः सामान्यविहितिस्य तुल्यवलत्वात् विकल्पः; उत विशेषे (ष) बलीयस्त्वात् बाध इति। तत्र सामान्यविशेषशास्त्रयोः क्लृप्तत्व-प्रत्यक्षश्रुतत्वाविशेषात् तुल्यबलत्वात् विकल्प इति प्राप्ते। ब्रूमः। होमविशेषे लक्षणाप्राप्तादाहवनीयात् विशेषविहितानां पदादीनां

श्रुतिप्राप्तादाहवनीयात् विशेषविहिदैः पदादिभिः सामान्यविहितस्याहवनीयस्य बाध इति। इदं त्ववधेयम्-सर्वत्र शीघ्रप्राप्तं बलवत् मन्थरप्राप्तिकं दुर्बलम्। तत्र श्रुतेः क्लृप्तवात् शीघ्रप्रापकत्वं लिङ्गादिकल्प्यशास्त्रास्य कल्प्यत्वादेव मन्थरप्रापकत्वं, उपदेशस्य प्रत्यक्षत्वात् चोदकस्यानुमानिकत्वात् सामान्यस्य लक्षकत्वात् विशेषस्य श्रैतत्वात् दुर्बलप्रबलतेति॥

(टि) एवं नञ्प्रसङ्गं समाप्येदानीं प्राप्तबाधप्रसङ्गात् सामान्य विशेषबाधश्चिन्त्यते। क्लृप्तेत्वेति। नहि लिङ्गादिवदक्लृलप्तत्वात् अतिदेशवच्चानुमानिकत्वात् सामान्यशास्त्रस्य विशेषशास्त्राद्दुर्बल-त्वमित्यभिप्रायः। शीघ्रमन्थरप्राप्ती हि बलवदबलतायां कारणं सा चेहास्तीत्याशयेनाह -ः होमविशेषेष्वित्यादिना। सोऽयं विशेषण सामान्यस्य बाधः तक्रकौण्डिन्यन्याय इत्युच्यते॥

## ॥ वैमृधादिषु साप्तदश्यविधेर्वाक्यशेषताधिकरणम्॥

### सू. अप्रकरणे तु यच्छास्त्रं विशेषे श्रूयमाणमविकृतमाज्यभागवत् प्राकृतप्रतिषेधार्थम्॥

(मू) अनारभ्य विहितं साप्तदश्यं यत्र विकृतिषु पुनः साप्तदश्यं श्रुतं वैमृधेष्वध्वरकल्पायां, पशौ, चातुर्मास्येषु, मित्रबिन्दायां, आग्रयणेष्ट्यां, "सप्तदश सामिधेनीरनुब्रूयादिति तत्रैवेति स्थितम्।

तत्र प्राकरणिके साप्तदश्यसामिधेनीवचनेसंशयः-किमपूर्वतापरं उत साप्तदश्योपसंहारार्थमिति। तत्रानारभ्यवादप्राप्तसाप्तदश्यानुवादेन प्राकृतस्य सामिधेन्यङ्गस्य निर्गुणतया विधानादाज्यभागविधिवत् अपूर्वतापरमिति प्राप्ते। ब्रूमः। अनारभ्यवादेन सामिधेनीसम्बद्धतया प्राप्तस्य साप्तदश्यस्य प्राकरणिकवाक्येन क्रतुसम्बन्धविधानात् साप्तदश्योपसंहारार्थमिति। इदं त्ववधेयम्-अत्र न सामिधेनीविधानं येन अपूर्वत्वं स्यात्। किन्तु चोदकप्राप्तसामिधेनीनामनारभ्यवादेन



साप्तदश्यसम्ब न्धः क्रतुसम्बन्धश्च विधीयते। चोदकलोपश्चापूर्वत्वम्। स चेह नास्तीति नापूर्वत्वम्। वचनद्वयं तु वचनद्वयविज्ञातसाप्तद-श्यस्यैवाभ्युदयकारित्वमित्येद.....वदर्थमिति॥ (टि) साप्तदश्यविधौ वा किमित्यपूर्वता न भवतीत्यात्राहेदं त्वित्यादिना॥

## ॥ अविहितस्वाहाकारेषु प्रदानेषु स्वाहाकारविधानताधिकरणम्॥

### सू. मन्त्रेष्ववाक्येशेषत्वं गुणोपदेशात्स्यात्॥

(मू) दर्विहोमं प्रकृत्य श्रूयते-"पृथिव्यै स्वाहा अन्तरिक्षाय स्वाहा दिवे स्वाहा वायवे स्वाहेति। अस्ति चानारभ्यवचनं "वषट्कारेण वा स्वाहाकारेण वा देवेभ्योऽन्नं हविः प्रदीयते इति। तत्र संशयः-किमयं मन्त्रो पठ्यमानस्वाहाकार अनारभ्यवादप्राप्तस्वाहाकारोपसंहारार्थं; उत नियमार्थ इति। तत्र पूर्वाधिकरणन्यायात् उपसंहारार्थ इति प्राप्ते। ब्रूमः। अनारभ्यवादेन वषट्कारवैकल्पिकत्वेन स्वाहाकारस्य प्राप्त त्वान्नियमार्थ इति। तस्मादन्यत्र स्वाहाकारबाध इति॥

(टि) सङ्गतिं दर्शयन्नाह-तस्मादिति॥

## ॥ अग्न्यतिरात्रस्य विकृतानुपदेशाधिकरणम्॥

### सू. अग्न्यतिग्राह्यस्य विकृतावुपदेशादावृत्तिः स्यात्॥

(मू) "य एवं विद्वानग्निं चिनुत "इत्यनारभ्य विहितोऽग्निः वाक्येन प्रकृतौ च कासुचित् विकृतिषु च विनियुज्यते " अथातोऽग्निमग्निष्टोमेनानुयजतीति तमुक्थ्येन तमतिरात्रेण तं द्विरात्रेण तं त्रिरात्रेण तं चतूरात्रेण तं पञ्चरात्रेण तं षड्रात्रेण तं सप्तरात्रेण तमष्टारात्रेण तं नवरात्रेण तं दशरात्रेण तमेकादरात्रेणेति। तथातिग्राह्या नाम ग्रहाः प्रकृतौ श्रूताः "उपस्तम्भनं वा एतद्यज्ञस्य यदतिग्रह्या" इति। तेऽपि कासुचिद् विकृतिषु उपदिष्टाः "यत् पृष्ठ्ये निगृह्णीयात् प्राञ्चं पृष्ठानि गृह्णीयुः यदुक्थ्ये गृह्णीयादिति। सोऽयमग्निः कासुचित् विकृतिषु नोपदिष्टः उपदिष्टाः। तत्र संशयः-किमग्न्यतिग्राह्यं यत्र नोपदिष्टं तत्रापि चोदकप्राप्त्या कर्तव्यमुत नेति। तत्र विकृतिषु पुनः श्रवणस्य चोदकावगमकत्वात् न चोदकप्राप्त्याग्न्यतिग्राह्यं

न कर्तव्यमिति प्राप्ते। ब्रूमः। पुनः श्रवणस्य सामान्यविध्यसिध्यर्थत्वात् चोदकप्राप्त्या कर्तव्यमिति। सामानविध्यं च गुणकामप्रवृध्यर्थं, यासु चोदकप्रा प्तिःतासु न गुणकामप्रवृत्तिरिति। तस्मात् सर्वत्राग्न्यतिग्राह्यं कर्तव्यं; यत्र तु पुनः श्रुतिः तत्रैव गुणकामप्रवृत्तिरिति स्थितम्॥

(टि) चोदकाभावेति। यदि चोदकः स्यात्तदा तेनैव प्राप्तेर्विकृतिषु पुनः श्रवणमनर्थकं स्यात्। अतोऽग्न्यतिग्राह्यस्य चोदको नास्तीत्यभिप्रायः। अङ्गान्तरवदग्न्यतिग्राह्यस्यापि चोदकप्राप्तिर्दुर्निवारेति (रा) स्फुटैवेत्याभिप्रेत्य पुनः श्रवणप्रयोजनं वदन् सिद्धान्तयति-ः पुनः श्रवणस्येत्यादिना। गुणकामेति। "श्येनचितं चिन्वीत सुवर्गकाम इत्यादयो गुणकामा इति द्रष्टव्यम्॥

(मू) सोमाङ्गेषु ऐष्टिकेषु दीक्षणीयादिषु कर्मसु संशयः-किं तेषु चोदकप्राप्तं अग्न्यन्वाधानं कर्तव्यमुत नेति।॥ तत्र चोदकात् कर्तव्यमिति प्राप्ते।

ब्रूमः। अग्न्यन्वाधानस्य यत् कार्यमग्निधारणं तस्य सोमार्थेन विहितस्याग्नेर्धारणेन प्रसङ्गसिद्धत्वात् न कर्तव्यमिति।

(टि) न कर्तव्यमिति। आक्रतुसमाप्तेर्धारणमपि सिद्धमेवेति भावः॥

## ॥ दीक्षणीयादिषु व्रतोपायनाभावाधिकरणम्॥

### सू. तथा व्रतमुपेतत्वात्॥

(मू) दीक्षणीयादिषु एव संशयः-किं प्राकृतं व्रतं कर्तव्यमुत नेति। तत्र चोदकात् कर्तव्यमिति प्राप्ते। ब्रूमः। सोमार्थोपेतसत्यवदन ब्रह्मचर्यादिसङ्कल्प रूपव्रतेन प्रसङ्ग सिद्धेः न पुनर्व्रतोपायनं कर्तव्यमिति॥

(टि) व्रतस्वरूपमेवाह सत्येत्यादिना॥



## ॥ ऐष्टिकेष्वग्न्यन्वाधानाननुष्ठानाधिकरणम्॥

### सू. ग्रहणार्थं च पूर्वमिष्टेस्तदर्थत्वात्॥

(मू) धारणार्थत्वादन्वाधानं नेत्युक्तम्। तत्र संशयः। अन्वाधानस्य देवतापरिग्रहार्थत्वमभ्युपेत्य चिन्त्यते। तत्र देवतापरिग्रहार्थत्वे दीक्षणीयायां कर्तव्यमन्वाधानं प्रायणीयादिषु संशयः-किमन्वाधानं कर्तव्यमुत नेति। तत्र प्रसङ्गेन देवतापरिग्रहासिद्धेः देवतापरिग्रहार्थत्वे दीक्षणीयायां कर्तव्यमन्वाधानं प्रायणीयादिषु संशयः-किमन्वाधानं कर्तव्यमुत नेति। तत्र प्रसङ्गेन देवतापरिग्रहासिद्धेः देवतापरिग्रहार्थत्वमन्वाधानं कर्तव्यमिति प्राप्ते।

ब्रूमः। दीक्षणीयया देवतापरिग्रहासिद्धेः "अग्निरवमो देवानां विष्णुः परमः; देवता एव तदुभयतः परिगृह्य दीक्षित इति। वस्तुतस्तु धारणे दृष्टप्रयोजने सम्भवति अर्थवादमात्रोपयुक्तवाक्यशेषेण देवता एव पूर्वेद्युः गृहीत्वा "श्वोभूते यजत "इत्यनेन देवतापरिग्रहार्थत्वकल्पनासम्भवात् न देवतापरिग्रहार्थत्वम्। तथा "अग्निरवम "इति वाक्यमपि अर्थवाद एवेति। एवं च दीक्षणीयायामपि नान्वाधानं कर्तव्यमिति बोध्यम्॥

(टि) दीक्षणीयेति। यद्यपि दीक्षा सोमस्येति वचनात् प्रधानार्था दीक्षणीया प्रधानदेवता एव परिगह्णाति तथापि वैश्वदेवग्रहे सर्वदेवतासमवायात् प्रसङ्गादङ्गदेवता अपि परिगृह्णाति। नहि विश्वेदेवशब्दस्य प्रसिद्धावयवार्थस्य समुदायस्य शक्तिकल्पनायां प्रमाणमस्तीत्यभिप्रायः॥

## ॥ ऐष्टिकेषु पत्नीसंनहन अननुष्ठानाधिकरणम्॥

### सू. संनहनं च वृत्तत्वात्॥

(मू) दर्शपूर्णमासयोः पत्नीसन्नहनं श्रूयते-"याक्त्रेणपत्नीं सन्नह्यतीति। तत् प्रायणीयादिषु चोदकप्राप्तम्। तत्र संशयः-किं पत्नीसन्नहनं प्रायणीयादिषु कर्तव्यमुत नेति। तत्र चोदप्राप्तत्वात् कर्तव्यमिति प्राप्ते। ब्रूमः। सौमिकेन सन्नहनेन वासोधारणस्य सन्नद्धत्स्य वा प्रयोजनस्य

प्रसङ्गसिद्धत्वात् न कर्तव्यमिति। शिष्यहितार्थमिदमुक्तम्। न त्वत्र निराकार्यं किञ्चिदस्तीति बोध्यम्॥
(टि) वैयर्थ्यमाशङ्क्याह-शिष्येति॥

## ॥ ऐष्टिकेष्वारण्यभोजनाभावाधिकरणम्॥

### सू. अन्यविधानादारण्यभोजनं न स्यात् उभयं हि वृत्त्यर्थम्॥

(मू) दर्शपूर्णमासयोरारण्यभोजनमाम्नातं "यदारण्यानश्नाति तेनारण्यान् अथो इन्द्रियं वा आरण्यं इन्द्रियमेवात्मन् धत्त इति। तत् प्रायणीयादिषु चोदकप्राप्तम्। तत्र संशयः-किं प्रायणीयादिषु आरण्यभोजनं कर्तव्यमुत नेति। तत्र चोदकप्राप्तत्वात् कर्तव्यमिति प्राप्ते। ब्रूमः। पयोव्रतादिना आरण्यभोजनवृत्तेः प्रसङ्गसिद्धेः न कर्तव्यमिति। इदमपि पूर्ववत् शिष्यहितार्थमेव।

(टि) इदमपि तथेति दर्शयति-इदमिति।

## ॥ ऐष्टिकेषु शेषभक्षानुष्ठानाधिकरणम्॥

### सू. शेषभक्षस्तथेति चेन्नान्यर्थन्वात्॥

(मू) प्राकृता याजमाना इडाभक्षादयः दीक्षणीयादिषु चोदकप्राप्ताः। तत्र संशयः-किं दीक्षणीयादिषु शेषभक्षाः कर्तव्य उत नेति। तत्र वृत्त्यर्थत्वात् प्रसङ्गसिद्धार्थाः शेषभक्षाः कर्तव्या इति। षष्ठे साधितस्य प्रतिपत्त्यर्थत्वरूपप्रयोजनकथनमेतत्॥

(टि) गतार्थत्वमाशङ्क्याह-षष्ठ इति॥

## ॥ ऐष्टिकेष्वन्वाहार्यदानाभावाधिकरणम्॥

### सू. भृतत्वाच्च परिक्रयः॥

(मू) दीक्षणीयादिषु चोदकप्राप्तान्वाहार्यदक्षिणा। सा दातव्या नेति संशयः। तत्र द्वादशशतदक्षिणायाः प्रधानमात्रार्थत्वात् अङ्गेषु अङ्गार्थ चोदकप्राप्तान्वाहार्यदक्षिणा दातव्येति प्राप्ते। ब्रूमः। प्रसङ्गसिद्धकार्यत्वान्न दातव्येति। प्रधानसमानकर्तृकाणामङ्गानां प्रसङ्गसिद्धानुष्ठानत्वात् न



पृथक् दक्षिणेति॥

(टि) प्रधानसमानेति। दक्षिणाभेदे चानतिभेदात् कर्तृभेदेनाङ्गप्रधानानामश्रुतः कर्तृभेद आपद्येतेति भावः॥

## ॥ ऐष्टिकेषु शेषभक्षस्य संस्कारार्थतया कर्तव्यत्वाधिकरणम्

### सू. शेषभक्षस्तथेति चेत्॥

(मू) ऋत्विजां शेषभक्षेषु संशयः किं सोमे ऋत्विक्भक्षा न कर्तव्या उत कर्तव्येति। तत्र परिक्रयार्थत्वाद्दक्षिणाया प्रसङ्गसिद्धार्था न कर्तव्य इति प्राप्ते।ब्रूमः। प्रतिपत्त्यर्थत्वात् प्रसङ्गासिद्धप्रयोजना ऋत्विक्छे (शे) षभक्षाः कर्तव्या इति। दशमे भक्षाणां परिक्रयार्थत्वं निराकृतं तस्य प्रयोजनमिहोक्तमिति बो ध्यम्॥

(टि) इहोक्तमिति. प्रसङ्गात्मकत्वादिति शेषः॥

## ॥ ऐष्टिकेषु होतुर्वरणसद्भावाधिकरणम्॥

### सू. प्रवृत्तवरणात् प्रतितन्त्रं वरणं होतुः क्रियेत॥

(मू) दर्शपूर्णमासयोर्होतृपरं "तं अग्निर्देवाःता न देवान् यक्षदिति। चोदकेनैष्टिकेषु कर्मसु सोमाङ्गभूतेषु प्राप्यते। सोमेऽपि होतृवरणमाम्नातं "अग्निर्होता स मे होता होतृणां मे होतासीति होतारं वृणीत इति। तत्र संशयः-किमैष्टिकेषु प्रसङ्गसिद्धार्थत्वात् न दार्शपौर्णमासिकहोतृवरणं कर्तव्यमुत प्रसङ्गासिद्धार्थत्वात् कर्तव्यमिति। तत्र प्रकृतस्य वरणस्यापि आनत्यर्थत्वात् प्रसङ्गसिद्धार्थत्वात् न कर्तव्यमिति प्राप्ते। ब्रूमः। प्रवृत्तेकर्मणि क्रियमाणस्य प्राकृतस्य वरणस्यासम्भवात् आनत्यर्थस्यादृष्टार्थत्वात् प्रसङ्गासिद्धार्थत्वात् प्रतिकर्म होतृवरणं कर्तव्यमिति॥

(टि) प्रवृत्ते कर्मणीति। "अवृतस्सामिधेनीरन्वाहेति वचनादिति शेषः॥

## ॥ आतिथ्यायां बर्हिषः प्रतिकर्म प्रोक्षणाभावाधिकरणम्॥

सू. यज्ञोत्पत्त्युपदेशे निष्ठितकर्मप्रयोगभेदात् प्रतितन्त्रं क्रियेत ॥

(मू) सोमे श्रूयते-"यदातिथ्याया बर्हिस्तदुपसदां तदग्नीषोमीयस्य चेति बर्हिस्साधारण्यविधिः। तत्र त्रयाणामर्थोपात्ते बर्हिषि ये प्रोक्षणादयः संस्काराः तेषु संशयः-किं ते आतिथ्यादिषु भेदेन कर्तव्या उतातिथ्यकाले कृता एव उपसत्स्वग्नीषोमीये च प्रसज्यन्त इति। तत्र आतिथ्याकाले ऽनुष्ठितानां गृह्यमाणविशेषाणां तन्त्रत्वस्यातिथ्यातिथ्यातन्त्रानन्तःपातिषु उपसदग्नीषोमीयेषु प्रसङ्गस्य चासम्भवात् भेदेन कर्तव्या इति प्राप्ते। ब्रूमः। तन्त्रानन्तःपातित्वेऽपि बर्हिषः साधारणत्वात् सकृत्कृताः प्रोक्षणादयः उपसत्सु अग्नीषोमीये च प्रसज्यन्त इति ॥

(टि) बर्हिषः साधारणत्वादिति। ततश्चातिथ्यापवर्गेबर्हिरपवृज्यते तस्यानपवृत्तत्वात्तदर्थाः प्रोक्षणादयः पुनर्न कर्तव्या इति भावः ॥

॥ आतिथ्यायां स्तरणमन्त्रावृत्त्यधिकरणम् ॥

सू. देशपृथक्त्वान्मन्त्रोऽभ्यावर्तते।

(मू) तत्रैव "ऊर्णाम्रदसं त्वा स्तृणामीति स्तरणमन्त्रे संशयः-किमग्नीषोमीयार्थे स्तरणे भेदेन मन्त्रः प्रयोक्तव्यः उत तत्र आतिथ्यास्तरणप्रयुक्तस्स एव प्रसज्यत इति। तत्र बर्हिषः साधारणत्वात् प्रसज्यत इति प्राप्ते। ब्रूमः। प्राग्वंशोत्तरवेदिरुपदेशभेदात् भेदेन प्रयोक्तव्य इति। वेदिदेशसंस्कारस्तरणार्थमन्त्रस्य वेदिदेशभेदान्न प्रसङ्ग इति॥ (टि) वेदिदेशेति। "बर्हिषा वेदिं स्तृणाती ति द्वितीयानिर्देशात् प्रयोजनवत्त्वाच्च वेदिसंस्कारार्थत्वं स्तरणस्येति भावः॥

॥ बर्हिषो देशान्तरनयने सन्नहनहरण मन्त्रयोरप्रयोगाधिकरणम् ॥

सू-सन्नहनहरणे तथेति चेत् ॥

(मू) तदेव बहिः प्राग्वंशे सतीर्णं पुनः सन्नह्य उत्तरवेदिसमीपमाहृत्य स्तीर्यते। प्रकृतौ च "पूषा ते ग्रन्थिं ग्रथ्नामतुइति सन्नहनमन्त्रः।



बृहस्पतेर्मूर्ध्ना हरामीत्याहरणमन्त्रः। तौ किमस्मिन् सन्नहने व (ह) रणे च प्रयोक्तव्यौ नेति संशयः। तत्र सन्नहनहरणयोरावृत्तेः मन्त्रावप्यावृत्त्या प्रयोक्तव्याविति प्राप्ते। ब्रूमः। मन्त्रयोर्लूनस्य बर्हिषश्च विहारदेशप्रापणार्थस्य सन्नहनहरणमन्त्रार्थत्वान्नास्मिन् सन्नहने हरणे च प्रयोक्तव्याविति॥

॥ इति द्वादशाध्यायस्य प्रथमः पादः ॥

(टि) प्रयोक्तव्याविति। यथा प्रकृतौ गार्हपत्यादाहवनीय नीयमाने बर्हिषि न मन्त्रः प्रयुज्यते तथेहापीति भावः॥

॥ इति केरलीये षोडशाध्यायीटिप्पणे

द्वादशाध्यायस्य प्रथमः पादः ॥

॥ श्रीः ॥

॥ अथ द्वादशाध्यायस्य द्वितीयः पादः ॥

॥ विहाराग्नेः वैदिककर्ममात्रार्थताधिकरणम् ॥

सू. विहारो लौकिकार्थानामर्थं साधयेत् प्रभुत्वात् ॥

(मू) गार्हपत्याद्यग्निर्विहार इत्युच्यते। तत्र संशयः-किं विहारः लौकिकानां पार्वणस्थालीपाकादीनां चाङ्गमुतवैदिकानामेवेति पाकदहनप्रकाशनादीनामग्निसाध्यानां वैदिकानां पुरोडाशहोमपाकादीनां चाङ्गमुत वैदिकानामेवेति। तत्र सामर्थ्यात्मकलिङ्गात् सर्वेषामङ्गमिति प्राप्ते। ब्रूमः। "गार्हपत्ये हवींषि श्रपयति दक्षिणाग्नावन्वाहार्यं पचति यदाहवनीये जुह्वति "प्रत्यक्षनिर्दिष्टैः प्रयोजनैः निराकाङ्क्षत्वात् (न) वैदिकानां सर्वेषामङ्गं किन्तु वैदिकानामेवेति॥

॥ श्रीः ॥

॥ अथ द्वादशाध्यायस्य द्वितीयः पादः ॥

(टि) साधारणविचारप्रसङ्गादिदमारभ्यते - न सर्वेषामिति। स्थालीपाकादयस्त्वौपासने विहिता न सामान्यविहितान् गार्हपत्यादीन् गृह्णन्तीति ध्येयम्॥

॥ सवनीयपशौ पशुपुरोडाशस्य कर्तव्यताधिकरणम्॥

सू. सवनीये छिद्रापिधानार्थत्वात् पशुपुरोडाशो न स्यादन्येषामेवमर्थवत्वात्॥

(मू) सवनीयपशौ अग्नीषोमीयाच्चोदकप्राप्तः पशुपुरोडाशः। तत्र संशयः- किं सवनीये पशौ पुरोडाशः कर्तव्यो वा न वेति। तत्र सवनीयैः पुरोडाशैः सवनीयस्य पशोः पशुपुरोडाशप्रयोजनस्य छिद्रपिधानस्य कृतत्वात् न कर्तव्य इति प्राप्ते। ब्रूमः। पशुदेवतासंस्कारार्थत्वात् कर्तव्य इति॥

(टि) छिद्रापिधानस्येति। पशुपुरोडाशस्य सवनीयानां च छिद्रापिधानार्थत्वं श्रूयते "सुषिरो वा एतर्हि पशुर्यद्वपामुत्खिदति यद् व्रीहिमयःपुरोडाशो भवति अपिहिताया अच्छिद्रताया इति। अनुसवनं सवनीयान्निरूप्यन्ते। अपिहित्या अच्छिद्रताया इति चार्थवादमात्रमिदं वचनं प्रत्यक्षविरोधादित्यायेनाह-पशुदेवतेति॥

॥ सवनीयपुरोडाशे हविष्कृदाह्वानस्याभावाधिकरण्॥

सू. हविष्कृत् सवनीयेषु न स्यात् प्रकृतौ यदि सर्वाथा पशुं प्रत्याहुता सा कुर्याद्विद्यमानत्वात्॥

प्रकृतौ पात्रप्रोक्षणानन्तरं अवघातकालः। अस्ति च तस्मिन् काले "हविष्कृदेहीति त्रिरवघ्नंना (घ्नन्ना) ह्वयतीति हविष्कृदाह्वानं तदौषधाङ्गमपि औषधाज्यसान्नाय्यानां सर्वेषामङ्गमिति कृत्वा सान्नय्य विकारे सवनीयपशौ चोदकेन प्राप्यत इति चिन्त्यते। तत्र संशयः-किं सवनीयपशुपुरोडाशादिषु हविष्कृदाह्वानं कर्तव्यमुत नेति। तत्र चोदकप्राप्तत्वात् कर्तव्यमिति प्राप्ते। ब्रूमः। सवनीयपशौ तन्मध्यपातिनां सवनीयपुरोडाशादिनां पश्वर्थाहूतायाः हविष्कृतः प्रसङ्गसिद्धेः पुनराह्वानं कर्तव्यमिति। उत्तरविवक्षया प्राप्त्यर्थं चेदमिति बोध्यम्॥



(टि) गतार्थतामाशङ्क्याह-ः उत्तरेति॥

॥ तृतीयसवने हविष्कृदाह्वास्यापुनरावृत्त्यधिकरणम्।

सू. पशौ तु संशृते विधानात्तार्तीयसवनिकेषु स्यात् सौम्याश्विनयोश्चापवृत्तार्थत्वात्॥

(मू) सन्ति तार्तीयसवनिकाः सवनीयपशुपुरोडाशाः सौम्यश्चरुराश्विनो द्विकपालश्च। तत्र संशयः - किं तार्तीयसवनिकेषु पुरोडाशेषु सौम्याश्विनयोश्च हविष्कृदाह्वयितव्या न वेति। तत्र हविष्कृत्समाख्याता हविष्कृत् हविष्कारणार्था; तस्याः पशुपाकरूपहविषाःकरणार्थाहूतायाः पक्वे पशौ कृतार्थायाः; सत्या निवृत्तत्वात् ततः परेष्वेतेषु पुनाशह्वातव्येति प्राप्ते। ब्रूमः। साहाय्यकरणार्थमाहूतायाः तस्या आपत्नीसंयाजेभ्यः सन्निहितत्वान्न पुनराह्वातव्येति। न तु समाख्याया तस्य हविष्करणमात्र कार्य; किन्तु; सामर्थ्यात् साहाय्यचरणं मुख्यत्वात्तु हविष्करणेन समाख्यायते। प्रकृतौपत्नीसंयाजेभ्यः पश्चादेव पत्न्या उत्थानमिति अत्रापि तथैवेति सन्निहितत्वमत्रेति॥

(टि) पूर्वपक्षं निराकरोति तः न त्वित्यादिना॥

॥ निशि यज्ञेऽमावास्यातन्त्रप्रयोगाधिकरणम्॥

सू. निशि यज्ञे प्राकृतस्याप्रवृत्तिः स्यात् प्रत्यक्षशिष्टत्वात्

(मू) काम्येष्टिषु श्रूयेत-"अग्नये रक्षोघ्ने पुरोडाशमष्टाकालं निर्वपेत् यो रक्षोभ्यो बिभियादिति। पुनश्च तत्रैव "अमावास्यायां निशि यजेतेति। तस्मिन्निशियज्ञे संशयः-किं दार्शिकतन्त्रोपजीवनेन विधानासम्भवात् पृथक्तन्त्रयुक्त एव विधीयत इति पृथगेव तन्त्रं कर्तव्यमुत दार्शिकतन्त्रोपजीवनेन विधानसम्भवात् दार्शिकतन्त्रमेव प्रसज्यत इति। तत्र कालवाच्यमावास्याशब्दयुक्तेन वाक्येन प्रकरणेन चानुपस्थितस्य दर्शकर्मणः तन्त्रमध्ये विधानाभावात् दार्शिकतन्त्रोपजीवनेन विधानासम्भवात् पृथक्तन्त्रयुक्त एव विधीयत

इति पृथगेव तन्त्रं कर्तव्यमिति प्राप्ते। ब्रूमः। वाक्येन प्रकरणेन च कर्मणोऽनुपस्थितावपि प्रवृत्ते दर्शकर्मणि विधीयमानस्य फलतः तन्त्रमध्ये विधानात् दार्शिकतन्त्रोपजीवनेन विधिसम्भवात् तन्त्रमेव प्रसज्यत इति। पौर्णमास्याममावास्यायां विधीयमानायां सौर्यादीनां तु प्रकृत्यारम्भात् प्रागप्यनुष्ठानसम्भवात् न प्राकृततन्त्रोपजीवनमिति बोध्यम्॥

(टि) कालवाचीति। अमावास्यायां निशीति सामानाधिकरण्यान्निरपेक्षत्वात् कर्मणि कालापेक्षया वृत्तेश्चा मावास्याशब्दोऽत्रकालवाची न कर्मवाचीत्यभिप्रायः। प्रवृत्त इति। यस्मिन् काले निशेष्टिर्विधीयते स कालस्तावन्नियमेन प्रवृत्तामावास्यातन्त्र एवेति भावः।

॥ विकृतिष्वप्यारम्भणीयानुष्ठानाधिकरणम्॥

**सू. आरम्भणीया विकृतौ न स्यात् प्रकृतिकालमध्यत्वात् कृता पुनस्तदर्थेन॥**

(मू) किं निशियज्ञ इध्माबर्हिरन्वाधानं च कर्तव्यं नेति संशयः। तत्र प्रसङ्गसिद्धेः न कर्तव्यमिति प्राप्ते। ब्रूमः। वैगुण्यप्रसङ्गात् कर्तव्यम्। अन्वाधनत्वं तु देवतापरिग्रहार्थत्वे कर्तव्यमिति। न वेदमधिकरणान्तरम्॥ सौर्यादिषु अन्वारम्भणीया कर्तव्या न वेति संशयः। यावज्जीवप्रकृतिकालमध्यपातिनां सौर्यादीनामारम्भणीयायाः प्रसङ्गसिद्धेः तेषु (न) कर्तव्येति प्राप्ते। ब्रूमः। सौर्यादिषु विकृतिषु आरम्भभेदात् आरम्भार्थारम्भणीया कर्तव्येति। भ्रमनिवारणार्थमिदम्॥

(टि) वैगुण्येति। प्रसङ्गेनोपकर्तुमशक्यत्वात् वैगुण्यमिति बोध्यम्। यावज्जीवेति। अयमाशयः-प्रकृतौ हि सकृतेवेयं कर्तव्येत्युक्तं नवमे। अतः सकृत् कृतयैवानयापुरुषो यावज्जीवं संस्कृतो भवतीति प्रकृत्यर्थ एव संस्कारोऽनव (प) वृत्तः प्रसङ्गेन विकृतिषूपकरोतीति न संस्कारानपवृत्तेः प्रकृतावनावृत्तिः क्रत्वारम्भैक्यात् पुनः पुनः प्रयुञ्जानस्य तु प्रयोगारम्भो भिद्यते न क्रत्वारम्भः। क्रत्वारम्भार्था चेयं दर्शपूणमासशब्दस्य



क्रतुवाचित्वादित्याशयेनाह-आरम्भभेदादिति॥

॥ प्रधानानां धर्मविरोधे बहूनां धर्मानुष्ठानाधिकरणम्॥

**सू. विप्रतिषिद्ध धर्माणां समवाये भूयसां स्यात् सधर्मत्वम्॥**

(मू) अस्ति पञ्चदशरात्रः। तत्राग्निष्टुत् प्रथममहः। तत्र नामधेयेनाग्नेयी सुब्रह्माण्या प्राप्यते। ततो "ज्योतिर्गौरायुरिति त्र्यहः। तत्र नामधेन ऐन्द्री सुब्रह्मण्या। परिशिष्टेष्वेकादशस्वहस्सु चोदकेनैन्द्री सुब्रह्मण्या प्राप्यते। उपसत्काले सुब्रह्मण्यायाश्च तन्त्रत्वम्। तत्र संशयः-किमाग्नेयी ऐन्द्री वा कर्तव्येति अनियमः उत आग्नेय्येव अथवा ऐन्द्र्येवेति। अथवा न सूब्रह्मण्योदाहरणं, किन्तु काम्येष्टिषु श्रूयते "अग्नेये दात्रे पुरोडाशमष्टाकपालं निर्वपेत् इन्द्राय प्रदात्रे पुरौडाशमेकादशकपालं दधि मधु घृतमापो धानास्तण्डुलाः तत्संसृष्टं प्राजापत्यं पशुकाम इति। तत्र "आग्नेयं प्रथमं हविरैन्द्रं द्वितीयं ततः पञ्च प्राजापत्यानि। तत्राग्नेयस्य प्राजापत्यानां धानानां च नोभयथापि विरोधः। ऐन्द्रस्य ऐन्द्राग्नविकारत्वात् दध्नश्च सान्नाय्यविकात्वात् अमावास्याधर्मापेक्षत्वात् वृधन्वत्याज्यभागौ मन्त्रौ प्राप्तौ। मधुघृतापान्तु उपांशुयाजविकारत्वात् पौर्णमासीधर्मापेक्षित्वात् वार्त्रघ्न्याज्यभागमन्त्रौ प्राप्ताविति पशुकामेष्टिरूदाहरणम्। तत्र सप्तसु यागेषु मध्ये पञ्चयागा उदाहरणम्। तत्र संशयः-किं पौर्णमासिकौ दार्शिकौ वाज्यभागमन्त्रौ कर्तव्यावित्यनियमः उत दार्शिकावेवाथवा पौर्णमासिकावेवेति। तत्राविशेषादनियम इति चेदुच्यते। मुख्यत्वादाग्नेयी दार्शिकौ चेत्येवं प्राप्ते। ब्रूमः। भूयसां धर्मानुग्रहात् ऐन्द्री पौर्णमसिकौ चेति प्राप्तबाधोऽयम्॥

(टि) भाष्यकारेणोदाहृतं दर्शयति-अस्ति पञ्चदशरात्र इति। वार्तिककारमतमाह-अथवा नेति। ऐन्द्या सुब्रह्मण्ययाग्नेयः संस्कारो न सिध्यति। तस्माद्यथा निर्वापमन्त्रः संस्कारकत्वात् प्रतिनिर्वापं भिद्यते तद्वदियमपीति द्वे अपि सुब्रह्मण्ये आह्वातव्ये

इत्यनुदाहरणमित्याचार्याशयः। प्राप्तबाधोऽयमिति। प्रथमावगतस्य मुख्यधर्मस्य पश्चात् भूयोनुग्रहमालोच्य बाधादिति भावः॥

॥ तुल्यसङ्ख्याकानां धर्मविरोधे प्रथमस्यैव धर्मानुष्ठानाधिकरण्॥

सू. मुख्यं वा पूर्वचोदनाल्लोकवत्॥

(मू) यत्र तुल्यसङ्ख्यानां प्रधानानां धर्मविप्रतिषेधः यथाध्वरकल्पायां श्रूयते-"आग्नावैष्णवमेकादशकपालं निर्वपेत् अपराह्णे सरस्वतीमाज्यस्य यजेतेति", तत्राग्नावैष्णवस्य ऐन्द्राग्नविकारत्वात् दार्शिकतन्त्रता आज्यस्य तु उपांशुयाजविकारत्वात् पौर्णमासिकतन्त्रता। तत्र पूर्ववदाज्यभागमन्त्रविरोधः। तत्र संशयः-किमनियमः उत वृधन्वन्तावेवेति। तत्राशेषादनियम इति प्राप्ते।

ब्रूमः। मुख्यत्वाद्वृधन्वन्तावेवेति। इदं नाधिकरणान्तरमित्येकीयमतम्॥

(टि) मुख्यत्वादिति। न ह्यत्र भूयस्त्वं प्रधानकर्मत्वं वा प्राप्तबाधे कारणमस्ति तस्मादप्राप्तस्यैवात्र बाध इति भावः

॥ अङ्गगुणविरोधे प्रधानगुणस्यैव प्राबल्याधिकरणम्॥

सू - अङ्गगुणविरोधे च तादर्थ्यात्॥

(मू) दीक्षणीयायाः सोमस्य च "इष्ट्या पशुना सोमेन वा यजेत सोऽमावास्यायां पौर्णमास्यां वा यजेतेति वचनेन पर्वकालता प्राप्ता। तत्र संशयः-किमनियमः उत दीक्षा पर्वणि कर्तव्या अथवा सुत्येति। तत्राविशेषादनियम इति चेत् उच्यते। मुख्यत्वाद्दीक्षेतेति प्राप्ते। ब्रूमः। प्रधानत्वात् सुत्या पर्वणि कर्तव्येति॥

(टि) अयमपिति। अनेन प्रासङ्गिकी सङ्गतिर्दर्शिता॥

॥ परिधौ परिधियूपोभय धर्मानुष्ठानाधिकरणम्॥

सू. परिधिर्व्द्यर्थत्वादुभयधर्मा स्यात्॥



(मू) पशुमत्सु चातुर्मास्येषु श्रूयते-"परिधौ पशुं नियुञ्जन्ती"ति। तत्र संमार्जनादयः परिधिधर्माः प्रोक्षणादयश्च यूपधर्माः। तत्र संशयः किं परिधौ परिधिधर्मा एव कर्तव्या उत उभयधर्मा इति।

तत्र मुख्यत्वात् परिधिधर्माः कर्तव्य इति प्राप्ते। ब्रूमः। परिधेरग्निपरिधानपशुनियोजनरूप परिधियूपोभयकार्यार्थत्वात् उभयधर्माः कर्तव्या इति। प्राप्त्यर्थमिदम्॥

(टि)वैयर्थ्यं निराकरोति-प्राप्त्यर्थमिति।

॥ परिधौ विरोधियूपधर्माननुष्ठानाधिकरणम्॥

सू. यौप्यस्तु विरोधे स्यान्मुख्यानन्तर्यात्॥

(मू) तत्रैव विरुद्धेषु धर्मेषु संशयः-किं यूपधर्माः कर्तव्या उत परिधि धर्मा इति। पशुना हविषा साक्षात् सम्बद्धस्य यूपस्य प्रधानप्रत्यासत्तेः यूपधर्माः कर्तव्या इति प्राप्ते। ब्रूमः। परिधित्वानुपमर्देन यूपत्वविधानात् परिधिधर्माः कर्तव्या इति॥

(टि) सत्यामपि प्रत्यासत्तावङ्गधर्मत्वमविशिष्टमित्याशयेन विशेषमाह-परिधित्वेति॥ विशेषमाह-परिधित्वेति।

॥ सवनीयपुरोडाशयोः पशोरेव तन्त्रताधिकरणम्॥

सू. पशुसवनीयेषु विकल्पः स्याद्वैकृतश्चेदुभयोरश्रुतिभूतत्वात्॥

(मू) अस्ति ज्योतिष्टोमे सवनीयः पशुः-"आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीय आग्नेयं सवनीयं पशुमुपाकरोती"ति। सन्ति च सवनीयाः पुरोडाशाः "अनुसवनं सवनीयाः पुरोडाशा निरूप्यन्त" इति। तत्र पशुः प्रातस्सवने प्रारभ्य तृतीयसवने समाप्यते "वपया प्रातस्सवने चरन्ति पुरोडाशेन माध्यन्दिने सवने अङ्गैः तृतीयसवन" इति। "आग्निमारुतादूर्ध्वं अनुयाजैश्चरन्ती"ति अनुयाजोत्कर्षश्च श्रूयते। यस्य पूर्वमुपक्रमः पश्चात् समाप्तिर्वा तन्त्री इतरस्तु प्रसङ्गीति च स्थितम्। अत्र प्रातस्सवनीयानां पुरोडाशानां पशोर्वा पूर्वमुपक्रम इति विशेषो नास्ति

अनूयाजोत्कर्षेण पशोर्वा पूर्वमुपक्रम विशेषो नास्ति अनूयाजो त्कर्षेण समाप्तिवेशेषः नास्ति विशेषाभावात् पश्चात् समाप्तावपि विशेषो नास्तीति। तत्र तन्त्रित्वे संशयः। तत्रापि माध्यन्दिन सवनीयानां तृतीयसवनीयानां च पुरोडाशानां पश्चादुपक्रमो नास्तीति तन्त्रित्वसंशय इति प्रातस्सवनीयेषु संशयः किं प्रातस्सवनीयाः पुरोडाशाः तन्त्रिणः पशुप्रसङ्गी विपरीतं वेति विकल्प उत पशुरेव तन्त्री पुरोडाशास्तु प्रसङ्गिण एवेति नियम इति। तत्र अविशेषात् विकल्प इति प्राप्ते। ब्रूमः। "अग्निमद्य होतारमवृणीतायं सुतासुन्वती यजमान" इति मैत्रावरुणप्रैषैरुपसवनीयपशुवैशेषिकाङ्गाम्नानात् पशुरेव तन्त्री पुरोडाशास्तु प्रसङ्गिण एवेति नियम इति। अनुसवनं निरूप्यत इति वचनात् प्रातस्सवनीयानां पुरोडाशानां प्रातस्सवनीय एव समाप्त्यवगमात् तद्विरोधात् न तदीयानुयाजोत्कर्षः सम्भवतीति बोध्यम् (टि) - अग्निमद्य होतारमवृणीतायं यजमान इत्यादिसूक्तवाकप्रैषो मैत्रावरुणकर्तृ कोऽग्नीषोमीयात् पशोश्चोदकप्राप्तः। पुनरग्निमद्य होतारमवृणीतायं सुता सुती यजमान इत्यादिरूपेण विकृतः प्रत्यक्षेण सवनीयपशौ पठ्यते सोऽनर्थकः स्यात्। पुरोडाशानां तन्त्रित्वेन हि तेषामयमङ्गं, नापि मैत्रावरुणस्तेषामस्तीति पशुरेव तन्त्रीति। यत्त्वनूयाजोत्कर्षेणापि विशेषाभावादिति तत्राहानुसवनमित्यादिना॥

॥ समानतन्त्रप्रकृतिविकृत्योः विकृतितन्त्रानुष्ठानाधिकरणम्॥

**सू. अपूर्वं च प्रकृतौ समानतन्त्रा चेदनियतत्वात् अनर्थकं हि स्यात्॥**

(मू) प्रकृति विकृत्योः समानतन्त्रत्वमिति कृत्वा चिन्त्यते। विरुद्धधर्मेषु राक्षोघ्नीस्सामिधेनीरित्येवमादिषु संशयः-किं प्रकृतिविकृत्योर्मध्ये प्रकृतिः तन्त्रिणी विकृतिस्तु प्रसङ्गिणी। ततश्च प्रकृतेर्धर्मः प्रयोक्तव्य उत विकृतिः तन्त्रिणी प्रकृतिः प्रसङ्गिणीति। ततश्च विकृतेर्धर्मः प्रयोक्तव्य इति। तत्र प्रकृतेः पूर्वप्रवृत्तत्वात् तन्त्रिणी ततश्चप्रकृतेर्धर्मः प्रयोक्तव्य इति प्राप्ते।



ब्रूमः। वैकृतविशेषविधीनां वैयर्थ्यप्रसङ्गात् विकृतिः तन्त्रिणी ततश्च विकृतेर्धर्माः प्रयोक्तव्या इति।। (टि) समानतन्त्रत्वमिति। उभयोः पर्वणि कर्तव्यत्वादिति शेषः। वैकृतेति। किञ्च नापि पूर्वप्रवृत्ता प्रकृतिः यतो न यावज्जीविकः प्रयोग एकः किन्तु पर्वणि पर्वणि भिन्नाः प्रयोगा इत्यतो न प्रकृतेस्तन्त्रित्वमिति॥

**॥ आग्रयणे प्रसूनबर्हिषामेव ग्रहणाधिकरणम्॥**

**सू. अधिकस्य गुणः साधारणेऽविरोधात् कांस्यभोजिवदमुख्येऽपि॥**

(मू) आग्रयणेष्ट्यां ऐन्द्राग्नेवैश्वदेवद्यावापृथिव्यानि हवींषि। तत्र द्यावापृथिव्य एककपालः स वैश्वदेवैककपालविकारः। तस्य च प्रसूनं बर्हिः। तच्चेह चोदकप्राप्तम्। ऐन्द्राग्नेवैश्वदेवयोस्तु प्रसूनमप्रसूनं वा बर्हिर्मात्रं चोदकप्राप्तमित्यनियमः।

तत्र संशयः-किमनियम उत प्रसूनमेवेति। तत्र मुख्यत्वभूयस्त्वयोः अनुग्रहादनियम इति प्राप्ते। ब्रूमः। कस्यचिदपि वैगुण्याप्रसङ्गात् जघन्यस्यापि द्यावापृथिव्यस्य धर्मः प्रसूनमेव स्यादिति। यद्यन्यतरधर्मग्रहणे अन्यतरवैगुण्यं तदा मुख्यानुग्रहः यदा मुख्यग्रहणे वैगुण्यं जघन्यग्रहणे तु अवैगुण्यं तदा जघन्यानुग्रह इति बोध्यम्॥ (टि) बोध्यमिति। यदुभयाविरोधाज्जघन्यानुरोधः सोऽयं कांस्यबोजिन्याय इत्युच्यते.

॥ द्यावपृथिव्यादीनां सर्वेषामेव तन्त्रित्वाधिकरणम्॥

**सू. तत्प्रवृत्त्या तु तन्त्रस्य नियमः स्याद्यथा पाशुकं सूक्तवाकेन॥**

(मू) तत्रैव विरुद्धेषु धर्मेषु संशयः-किं द्यावापृथिव्यमात्रस्य तन्त्रित्वात् द्यावापृथिव्यधर्मः कर्तव्यः उत सर्वेषां तन्त्रित्वात् मुख्यत्वात् भूयस्त्वाच्च ऐन्द्राग्नादिधर्मः कर्तव्य इति। प्रसूनबर्हिषः तन्त्रित्वनियामकत्वात् उक्तरीत्या द्यावापृथिव्यधर्मः कर्तव्य इति प्राप्ते। ब्रूमः। अविरोधनिमित्तगृहीतस्य प्रसूनस्य तन्त्रित्वनियामकत्वासम्भावात् उक्तरीत्या ऐन्द्राग्नादिधर्मः कर्तव्य

इति ॥

॥ इति द्वादशाध्यायस्य द्वितीयः पादः ॥

(टि) अविरोधेति। साधारणं हि प्रसूनमविरोधात् सङ्गृहीतामिति, तन्न द्यावापृथिव्यतन्त्रमिति भावः ॥

॥ इति केरलीये षोडशाध्यायीटिप्पणे ॥

॥ द्वादशाध्यायस्य द्वितीयः पादः ॥

॥ श्रीः ॥

॥ अथ द्वादशाध्यायस्य तृतीयः पादः ॥

॥ अष्टरात्रे वत्सत्वगहतवाससोः समुच्चयाधिकरणम् ॥

सू. विश्वजिति वत्सत्वङ्नामधेयादितरथा तन्त्रभूयस्त्वादहतं स्यात् ॥

अस्त्यष्टरात्रोऽहीनः। तस्य विश्वजिदभिजिताग्नीषोमौ अभित उभयतो जातिः मध्ये षडहः "पशुकामो ह्यनेन यजेते''ति। विश्वजित्येकाहे "अवभृथादुदेत्य वत्सत्वचं परिधत्त "इति वत्सत्वक्परिधानं विहितम्। तच्चाष्टरात्रस्य प्रथमेऽहनि विश्वजिति नामधेयेन प्राप्तः। इतरेषु चोदके (न) तत्र संशयः किं वत्सत्वगहतयोः षडहे नामधेयेनाभिजिति चोदकेन चाहतं वासः परिधानं प्राप्तम्। विकल्प उत नियमः तत्र किं वत्सत्वक् अथवाहतं आहोस्वित् समुच्चय इति। तत्रैकार्थत्वात् विकल्प इति चेत्। उच्यते। विकल्पस्याष्टदोषदुष्टत्वात् नियम इति। तत्रापि नामधेयबलवत्वस्य मुख्यत्वस्य वानुग्रहात् वत्सत्वगिति। अत्र वदामः। भूयसामनुग्रहादहतमितीति प्राप्ते। ब्रूमः। कौपीनाच्छादने योग्यस्य वत्सत्वच उपरिवासः कार्ये विधानात् समुचय इति भिन्नकार्ययोः वत्सत्वगहतयोः समुचय इति ॥

॥ श्रीः ॥

॥ अथ द्वादशस्य तृतीयः पादः ॥



उपरिशम इति। तत्रापि कम्बलं परिधत्त इति परिदधातिः प्रयुज्यते। अतो महाव्रततार्प्यवदुपरिवासो वत्सत्वगिति भावः ॥

॥ अनुनिर्वाप्यपुरोडाशानां पुरोढाशस्यैव तन्त्रित्वाधिकरणम् ॥

सू. अनिर्वाप्येषु भूयस्त्वेन तन्त्रनियमः स्यात् ॥

(मू) अग्नौ श्रूयते-"अग्नीषोमीयस्य पशुपुरोडाशं अनुदेवसुवां हवींषि निर्वपतीति। तत्रानुनिर्वापान्यष्टौ। तत्र संशयः-किमनु निर्वाप्याणां तन्त्रित्वात् साधर्म्यमुत पुरोडाशस्य तन्त्रित्वात् स्वाधर्म्यमिति। तत्र भूयस्त्वादनुनिर्वाप्याणां (प्रसङ्गित्वस्य) तन्त्रित्वात् स्वाधर्म्यमिति प्राप्ते। ब्रूमः। पुरोडाशतन्त्रमध्ये विहितानामनुनिर्वाप्याणां प्रसङ्गित्वस्य स्पष्टत्वात् पुरोडाशस्य तन्त्रित्वात् स्वाधर्म्यमिति ॥

(टि) यत्र सर्वेषां तन्त्रित्वं तत्रैव भूयस्त्वन्याय इत्याशयेनाह पुरोडाशतन्त्रमध्य इति। न ह्येतेषां सहचोदना सहोपक्रमो वा येन सर्वे तन्त्रिण इत्याशङ्का स्यादिति भावः। न हि भूयस्त्वात्तन्त्रित्वनियम इति बोध्यम् ॥

॥ भिन्नोपकारकाणां गुणानां समुच्चयाधिकरणम् ॥

सू. एककर्मणि शिष्टत्वाद्गुणानां सर्वकर्म स्यात् ॥

(मू) दर्शपूर्णमासयोराघारौ प्रकृत्य श्रूयते-"ऊर्ध्वमाघारयति ऋजुमाघारयति सन्ततमाघारयति प्राञ्चमाघारयती"त्यादि। तत्र संशयः-किमूर्ध्वतादीनां विकल्प उत समुच्चय इति।

॥ तत्राघारोपकारात्मकैकार्थत्वाद्विकल्प इति प्राप्ते।

ब्रूमः। सर्वेषां सहसम्भवात् समुच्चय इति ॥

(टि) समुचयसम्भवेनाष्टदोषनिदानविकल्पाश्रयणं युक्तमित्यशयेनाह-सर्वषामिति ॥

॥ प्रयोजनैक्यै गुणानां विकल्पाधिकरणम् ॥

सू. एकार्थास्तु विकल्पेरन् समुच्चये ह्यावृत्तिः स्यात् प्रधानस्य ॥

(मू) "व्रीहिभिर्यजेत यवैर्यजेतेत्येवमादिषु संशयः किं समुच्चय उत विकल्प इति। तत्र सर्वाङ्गोपसंहार प्रयोगवचनानुग्रहात् समुच्चय इति प्राप्ते। ब्रूमः। समुच्चये अन्योन्यनिरपेक्ष हविःप्रकृतिबललब्धा-न्यनिवृत्तिरूपशास्त्रार्थपरित्यागकृत प्रत्यवायप्रसङ्गाद्विकल्प इति॥

(टि) विकल्प इति। ज्योतिष्टोमे हि द्रव्यदेवतासंयोगानामदृष्टानां चापर्यायविधायिना प्रकरणेन युगपत् ग्रहणात् सर्वसम्पादनाय युक्तं यदभ्यस्यते इह तु न तद्वत् गमकमस्तीति भावः। अन्येन कार्यसिद्धेरन्यस्य निवृत्तिरित्येतावता सामान्येनात्र संगतिः। अन्यार्थेनान्यस्य कार्यसिद्धेः प्रसङ्गः। स चेह नास्ति व्रीहियवयोरुभयोराप्याग्नेयार्थत्वादिति॥

॥ वैगुण्यसमाधानार्थानां प्रायश्चित्तानां विकल्पाधिकरणम्॥

सू. प्रायश्चित्ते चैकार्थ्यान्निष्पन्नेनाभिसंयोगः तस्मात् सर्वस्य निर्घातः॥

(मू) प्रायश्चित्तानि द्विप्रकाराणि। तत्र कानिचित् प्रमादाद्यापतित विहिताकरणनिषिद्धकरणकृतवैगुण्यदोषनिर्घातार्थानि। यथा-"यद्युक्तो यज्ञ आर्तिमियात् भूः स्वाहेति गार्हपत्ये जुहुयात् यदि यजुष्टो भुवः स्वाहेति दक्षिणाग्नौ जुहुयात् यदि साम तः (सुवः) स्वाहेत्याहवनीये यद्यपि (वि) ज्ञाता भूर्भुवस्सुवः स्वाहेत्याहवनीय एवेति। तथा वैश्वानरं द्वादशकपालं निर्वपेत् अमावास्यां पौर्णमासी वातिपाद्येति। अग्नये पथिकृते पुरोडाशमष्टकपालं निर्वपेत् यो दर्शपूणमासयाजी सन्नमावास्यां पौर्णमासीं वाति पादयेदि"ति। कानिचिन्निमित्ते कर्माङ्गानि, यथा "भिन्ने जुहोति स्कन्ने जुहोतीत्येवमादीनि। तथा "यस्याग्निहोत्रं सूर्योऽभ्युदियात् सौर्यमेककपालमनुनिर्वपेत् यस्याहुतमग्निहोत्रं सूर्योऽभ्युदियात् अग्निं समाधाय वाचं यमयित्वा दम्पती पूर्वाह्णमुपासीयातामिति। तत्र दोषसमानार्थेषु संशयः-किं पथिकृद्वैश्वानरादीनां समुच्चयउत विकल्प इति। तत्रादृष्टार्थत्वात् समुच्चय इति प्राप्ते। ब्रूमः। एकैकेन वाक्येन



वैगुण्यसमाधानाय निरपेक्षतया विधानात् व्रीहियववद्विकल्प इति॥

॥ नैमित्तिकप्रयाश्चित्तानां समुच्चयाधिकरणम्॥

सू. समुच्चयस्त्वदोषनिर्घातार्थेषु॥

(मू) निमित्ते कर्माङ्गेषु संशयः-किं विकल्प उत समुच्चय इति। तत्र पूर्वन्यायात् विकल्प इति प्राप्ते। ब्रूमः। प्रयाजादिवदपक्षयविधानात् समुच्चय इति। प्रत्युदाहरणमेतत्॥ (टि) अथाधिकरणद्वयेन प्रायाश्चित्तचिन्ता प्रायश्चित्तानीत्यादिना॥

॥ कर्मकालेऽनध्यायेऽपि मन्त्राणां प्रयोगाधिकरण्॥

सू. मन्त्राणां कर्मसंयोगात् स्वधर्मेण प्रयोगः स्यात् धर्मस्य तन्निमित्तत्वात्॥

(मू) पर्वणि नाध्येयं स्तनयित्नौ नाध्येयं दर्भपाणिनाध्येतव्यमित्यादयो ये मन्त्राणामध्ययनकालेऽध्यायवर्जनादयो धर्माः तत्र संशयः-किमेते कर्मकालेऽपि स्युरुत ने ति। तत्र मन्त्रप्रयोगत्वाविशेषात् स्युरिति प्राप्ते। ब्रूमः। अनध्यायवर्जनादीनां अविहनसमाप्त्युपकारेण ग्रहणार्थेऽध्ययने अङ्गत्वेन विनियुक्तत्वान्न कर्मकालेऽनध्यायवर्जनादिधर्माः स्युरिति। उत्तरप्राप्त्यर्थमिदम्। (टि) प्रयोजनमाह-उत्तरेति॥

॥ कर्मणि प्रावचनस्वरेणैन मन्त्रोच्चारणाधिकरणम्॥

सू. भाषास्वरोपदेशदैरवत् प्रावचनप्रतिषेधः स्यात्॥

(मू) ये मन्त्रा मन्त्रसमाम्नाये ब्राह्मणे च स्वरभेदेनाम्नाताः यथा- "इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते "इत्यादयः। तत्र संशयः-किं ते मन्त्रसमाम्नायसिद्धत्रैस्वर्येण कर्मणि प्रयोक्तव्या उत ब्राह्मणस्वरेणेति। तत्र ब्राह्मणस्वरस्य वाचनिकत्वात् तेनैव वक्तव्या इति प्राप्ते। ब्रूमः। मन्त्रस्वरोभयविधिप्रयुक्त वाक्यभेदपरिहाराय ब्राह्मणस्वरस्य विधानस्यानभ्युपगमात् मन्त्रसमाम्नायसिद्धस्वरेणैव मन्त्राः कर्मणि प्रयोक्तव्या इति॥ (टि) अनभ्युपगमादिति।

स्वरान्तरोपादानं तु ब्राह्मणे प्रवृत्तस्य स्वरस्याविच्छेदार्थं न विनियोगार्थमिति भावः।

॥ ब्राह्मणोत्पन्नमन्त्रस्य भाषिकस्वरेणैवोच्चारणाधिकरणम् ॥

सू. तन्न्यायत्वाददृष्टोऽष्टोऽप्येवम् ॥

(मू) मन्त्रसमाम्नाये ब्राह्मणे चानधीता ब्राह्मणे चोपदिष्टाः ये मन्त्राः तं प्रत्याह-"व (वा) नस्पत्योऽसी"त्यादयः तत्र संशयः-किमेते त्रैस्वर्येण प्रयोक्तव्या उत ब्राह्मणस्वरेण प्रयोक्तव्या इति। तत्र पूर्वन्यायात् त्रैस्वर्येण प्रयोक्तन्या इति प्राप्ते। ब्राह्मणस्वरव्यतिरेकेण स्वरान्तरानवगमात् ब्राह्मणस्वरेणैव प्रयोक्तव्या इति॥

(टि) (ब्राह्मणेति) ब्राह्मणस्य स्वरविनियोगपरत्वाभावेऽपि अन्यस्यानवगमात् तथैव प्रयोक्तव्य इति भावः॥

॥ मन्त्राणां पाठानन्तरमेव पदार्थानुष्ठानाधिकरणम् ॥

सू. मन्त्राणां करणार्थत्वान्मन्त्रान्तेन कर्मादिसंनिपातः। सर्वस्य वाचनार्थत्वात् ॥

(मू) "इषे त्वेत्यादिषु करणमन्त्रेषु संशयः-किं मन्त्रादौ वा मन्त्रमध्ये वा तत्रापि यस्यकस्यचित् पदोच्चारणकाले वा कर्मप्रकाशकपदोच्चारणकाले वा तदनन्तरंवा मन्त्रान्ते वा तत्रापि कियन्तञ्चित्कालं स्थित्वा वा कर्मप्रयोग इत्यनियमः उत कर्मप्रकाश पदोच्चरणानन्तरं अथवा मन्त्रान्ते न कर्माः सन्निपात इति। तत्राविशेषादनियमः, अथवा कर्मप्रकाशकपदोच्चारणानन्तरं तदानीं कर्मस्मरणस्य सञ्जातत्वादिति प्राप्ते। ब्रूमः। साकल्येन विनियुक्तेन मन्त्रेण सकलेनैव सम्पादितकर्मस्मरणस्यैव कर्माङ्गत्वान्मन्त्रान्ते न कर्मादेः सन्निपात इति॥ (टि) विशेषोऽस्तीत्याहाथवेत्यादिना।

॥ वसोर्धारायां मन्त्रान्ते कर्मसन्निपाताधिकरणम् ॥

सू. सन्ततवचनाद्धारायामादिसंयोगः ॥



(मू) अग्नौ श्रूयते-"सन्ततां (तं) वसोर्धारं (रां) जुहोतीति। तत्र संशयः-किं मन्त्रादेः कर्मादिश्च सन्निपात उत मन्त्रान्तस्य कर्मादिश्चेति। तत्र सन्ततशब्देन कर्ममन्त्रयोः साहित्यवचनात् मन्त्रादेः कर्मादिश्च सन्निपात इति प्राप्ते। ब्रूमः। "द्वादश द्वादश जुहोती"ति विहितसङ्ख्या युक्तानां भिन्नानां कर्मणामविच्छेदस्य स्पन्ततशब्देन वचनात् पूर्ववदेव मन्त्रान्तस्य कर्मादिश्च सन्निपात इति॥ (टि) कर्ममन्त्रयोरिति। अनेकापेक्षं हि साहित्यं कर्म चैकमिति भावः। वचनादिति। मन्त्रस्य अनुपात्तात्वाच्चेत्यपि द्रष्टव्यम् ॥

॥ आघारेऽपि मन्त्रान्ते कर्मसन्निपाताधिकरणम् ॥

सू. आघारे च दीर्घधारत्वात् ॥

(मू) दर्शपूर्णमासयोराघारं प्रकृत्य श्रूयते-"सन्ततमाघारयतीति। तत्र संशयः-किं मन्त्रकर्माद्योः सन्निपात उत मन्त्रान्तस्य कर्मादिश्चेति। तत्र सन्ततशब्देन मन्त्रकर्मणोः साहित्यवचनात् तदाद्योः सन्निपात इति प्राप्ते। ब्रूमः। "दीर्घधारया जुहोतीति दीर्घधारस्याघारस्य क्षर्यमाणस्य द्रव्यसातत्यस्य सन्ततशब्देन वचनात् अत्रापि मन्त्रान्तस्य कर्मादिश्च सन्निपात इति। (टि) आघारे कर्मैकत्वमविवादमित्यारभ्यते दर्शेत्यादि॥

॥ एककार्यमन्त्राणां विकल्पाधिकरणम् ॥

सू. मन्त्राणां सन्निपातित्वादेकार्थानां विकल्पः स्यात् ॥

(मू) एकार्थेषु करणमन्त्रेषु "पूषां वां विभजतु अर्यमा वां विभजतु भगो वां विभजत्वित्यादिषु संशयः-किं विभागादिषु मन्त्राणां समुच्चयः उत विकल्प इति। तत्र प्रयोगवचनानुग्रहात् समुच्चय इति प्राप्ते। ब्रूमः। एकार्थत्वात् व्रीहियववद्विकल्प इति। पूर्वेक्तमेवोत्तरविवक्षयात्रोक्तम्॥ (टि) गतार्थतामाशङ्क्याह-पूर्वोक्तमिति॥

॥ सङ्ख्याविहितमन्त्राणां समुच्चयाधिकरणम् ॥

सू. सङ्ख्याविहितेषु समुच्चयोऽसंनिपातित्वात् ॥

(मू) अग्नौ श्रूयते-चतुर्भिरभ्रिमादत्ते द्वाभ्यां खनति षड्भिः हरतीति। एवमादिषु सङ्ख्यायुक्तेषु मन्त्रेषु संशयः-किं विकल्प उत समुच्चय इति। तत्र एकार्थत्वाद्विकल्प इति प्राप्ते। ब्रूमः। सङ्ख्यावचनसामर्थ्यात् समुच्चय इति॥

(टि) सङ्ख्यावचनेति। तत्र पूर्वप्रयुक्तानां मन्त्राणां तज्जनितसंस्कारद्वारा करणत्वं चरमस्य तु साक्षादिति सङ्ख्या वचनसामर्थ्यादवसीयत इति भावः।॥

॥ ब्राह्मणविहितमन्त्रणां विकल्पाधिकरणम्।

सू. ब्राह्मणविहितेषु च सङ्ख्यावत् सर्वेषामुपदिष्टत्वात्॥

(मू) ये ब्राह्मणे एकार्थत्वेन विहिता मन्त्राः यथा "उरु प्रथस्वेति "पुरोडाशं प्रथयति उरु प्रथा उरू ते यज्ञपतिरिति पुरोडाशं प्रथयतीत्यादयः तेषु संशयः किं समुच्चय उत विकल्प इति। तत्र वचनेन लिङ्गे सर्वेषामुपदिष्टत्वात् पूर्ववत् समुच्चय इति प्राप्ते। ब्रूमः। वचनेन लिङ्गेन वा निरपेक्षसाधनत्वावगमात् व्रीहियववद्विकल्प इति। अत्र लिङ्गप्राप्तत्वात् समुच्चयार्थं वचनमिति शङ्काअर्थवादार्थं वचनमित्युत्तरमिति न सर्वेषामुपदेशसामर्थ्यात् समुच्चय इति वा शङ्का समुच्चयश्रवणाद्विकल्प इत्युत्तरम्॥

(टि) अत्र भाष्यकारेण वचनविनियोगाश्रयेण पूर्वपक्षितं वार्तिककारेण तु लिङ्गविनियोगाश्रयेणेत्याशयेनाह- वचनेन लिङ्गेन वेति। वार्तिककारमतमाह अत्रेत्यादिना। भाष्यकारमतमाह सर्वेषामित्यादिना

॥ हौत्राणां मन्त्राणां समुच्चयाधिकरणम्॥

सू. हौत्रास्तु विकल्पेरन्नेकार्थत्वात्॥

(मू) "उच्छ्रीयस्व वनस्पतइत्यादयो ये क्रियमाणाऽ वादिनो हौत्रा मन्त्रास्तेषु संशयः-किंविकल्प उत समुच्चय इति। तत्र करणमन्त्रवदेकार्थत्वाद्विकल्प इति प्राप्ते। ब्रूमः। क्रियमाणानुवादिना



अध्वर्युणा क्रियमाणस्यान्तादविच्छेदेन स्मरणार्थत्वात् समुच्चय इति। क्वचिद्वर्णकान्तरं करणस्य क्रियमाणस्यानुवादिनश्च किं विकल्प उत समुच्चय इति संशयः एकार्थत्वाद्विकल्प इति प्राप्ते। ब्रूमः। करोमि कर्तव्यमित्वेमं स्मरणभेदकृतकार्यभेदात् समुच्चय इति।

॥ इति द्वादशाध्यायस्य तृतीयः पादः॥

(टि) नैकार्थत्वमित्याह-क्रियमाणेत्यादिना॥

॥ इति केरलीये षोडशाध्यायीटिप्पणे

द्वादशाध्यायस्य॥

तृतीय पादः॥

॥ उपस्तरणाभिघारणाभ्यां सहैव चतुरवदानधिकरणम्॥

सू. उत्पत्तितादर्थ्यात् चतुरवत्तं प्रधानस्य होमसंयोगात् अधिकमाज्यमतुल्यत्वाल्लोकवदुत्पत्तर्गुणभूतत्वात्।

(मू) दर्शपूर्णमासयोरुपस्तृणाति द्विर्हविषोऽवद्यति अभिघारयतीति विधाय श्रूयते "चतुरवत्तं जुहोती"ति। तत्र संशयः-किंचतुरवत्त होमे हविष एव चतुरवदातव्यं उपस्तरणाभिधारणे तु अधिके द्व्यवदानं च पक्षान्तरं उत उपस्तरणभिघारणाभ्यां सहैव चतुवत्तं हविषस्तु नित्यं द्विरवीदातव्यमिति। तत्र चतुरवत्तमिति द्वितीयानिर्देशात् हविष एव चतुरवदातव्यमिति प्राप्ते। ब्रूम। यच्चतुरवत्तमिति उपस्तरणभि-घारणद्विरवदानवाक्यकल्पितचतुरवत्तानुवादेन तत्स स्कारतया तज्जुहोतीति जुहोतिनो "पत्तिवाक्यसिद्धत्यागदेवतोद्देशावनूद्य प्रक्षेपस्य विधानात् यथानुदितं उपस्तरणभिधारणाभ्यां सहैव चतुरवत्तमिति यद्यपि चतुस्सङ्ख्या होमाङ्गतया विधीयते तथापि विशेषाग्रहणात् सहैव चतुवरत्तमिति॥

(टि) द्वितीयानिर्देशादिति। द्वितीयानिर्देशाच्चतुरवत्तस्य होतव्यत्वमवगम्यते. हविश्च होतव्यं तस्यैवोत्पत्तिवाक्ये देवतासम्बन्धात्

आज्यं तु न होतव्यं किन्तु हविस्संस्कारार्थं होतव्येन च चतुरदानसम्बन्धः श्रूयत इति हविष एव चतुखदातव्यमिति भावः। यच्चतुरवत्तमिति। अयमाशयः-न चात्र होमानुवादेन चतुस्सङ्ख्याविशिष्टावदानं विधीयते होमस्योत्पत्तिवा-क्येनाप्राप्तत्वेनानुवादासम्भवात्। नच चतुरवत्तविशिष्टहोमविधिः विशिष्टविधिगौरवात्। न चाविहिताङ्गत्वं, अतो न चतुस्सङ्ख्या होमाङ्गं येन तत्सम्पादनाय होतव्यद्रव्यस्य चतुरवदानं स्यात् किन्तु प्रक्षेपोऽत्र विधीयत इति। किञ्च यदि होमाङ्गतया चतुरवत्तविधिः तथापि अवत्तमात्रं विधीयते न चतुस्सङ्ख्या, तस्या वाक्यान्तरप्राप्तत्वे-नानुवादत्वेनाप्युपपत्तौ विधाने गौरवापत्तेरिति ब्रोध्यम्। अपि च सङ्ख्याया होमाङ्गत्वेन विधानेऽपि साधनपरिच्छेदकत्वेन विधानादाज्यस्यापि संस्कारद्वारेण होमसाधनत्वान्न हविषश्चतुरदानं विशेषाभावादित्याह यद्यपीत्यादिना। एवं च व्यवदानस्य पाक्षिकबाधो न कल्पितो भवतीति अपरमनुकूलमिति द्रष्टव्यम्॥

## ॥ उपांशुयाजेऽपि चतुरवत्तस्यावश्यकताधिकरणम्॥

## सू. साप्तदश्यवन्नियम्येत॥

(मू) दर्शपूर्णमासयोरुपांशुयाज आज्यद्रव्यकः। अस्ति च "चतुरवत्तं जुहोतीति। तत्र संशयः-किमुपांशुयाजे चतुरवत्तं कर्तव्यमुतनेति। तत्र चतुरवत्तस्योपस्तरणाभिधारणाभ्यां सह सम्पाद्यत्वात् उपस्तरणा-भाववति उपांशुयाजे न कर्तव्यं साप्तदश्यवदिति प्राप्ते। ब्रूमः। होममात्रे चतुरवत्तविधानात् उपांशुयाजेऽपि चतुरवत्तं कर्तव्यमिति। चतुस्सङ्ख्यात्र होमाङ्गतया विधीयत इति कृत्वा वेदमिति। उपांशुयाजे "चतुर्गृहीतं जुहोती"ति वाक्यात् चतुर्गृहीतं सिद्धम्॥

(टि) साप्तदश्यवदिति। यथा सामिधेनीसाप्तदश्यं यत्र विकृतिषु साप्तदश्यं श्रुतं तत्रोपसंहृतं तथा चतुरवत्तमपि। यत्र सान्नाय्यौषधयोरुपस्तरणाभिधारणरूपचतुरवत्तप्रकारोऽस्ति



तत्रैवोपसंह्रियते नाज्य इत्यर्थः। होममात्र इति। न चोपस्तरणादिकं चतुरवत्तशेषत्वेन विधीयते येनैवं स्यात् किन्तु हविस्सं स्कारार्थतयोपस्तरणाभिघारणविधिः ताभ्यामेव सान्नाय्यौषध योश्चतुरवत्तसम्पत्तेर्न हविषश्चतुरवदीयते। यत्र तूपस्तरणादि न श्रुतं तत्राज्येऽन्यतः सम्पत्त्यभावाद्धविष एव चतुरवदानं कर्तव्यमिति भावः। कृत्वावेदमिति। सङ्ख्याविधानपक्षाभिप्रायेण वाशब्दोपादानमिति ध्येयम्।

## ॥ दर्शपूर्णमासयोराग्नेयैन्द्राग्नयोरनुवादताधिकरणम्॥

## सू. पुरोडाशाभ्यामित्यधिकृतानां पुरोडाशयोरुपदेशस्तच्छ्रुतित्वात् वैश्यस्तोमवत्॥

(मू) दर्शपूर्णमासयोरिदमाम्नायते-"पुरोडाशाभ्यामेव सोमयाजिनं याजयेत् यावेतावाग्नेयश्चैन्द्राग्नश्च सान्नाय्येन तु सोमयाजिनमि"ति। तत्र संशयः-किं "पुरोडाशाभ्यामेव सोमयाजिनं याजयेदि"ति विधिः। यदा विधिः तदा किं अधिकृतविधिः उत कर्मान्तरयोर्विधिः अथवा याजनविधिराहोस्वित् कालविधिः किं वाग्नेयस्यानुवादः ऐन्द्राग्नस्य पौर्णमास्यां विधिः आहोस्वित् कालनियमः किमुतार्थवाद इति सप्त पक्षाः। तत्रानुवादानर्थक्याद्विधिः। तत्रापि यो "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते"त्यत्र स्वर्गकामोऽधिकृतः तस्यैवेह सोमयाजीति श्रवणात् अधिकृतविधिरिति चेत्। अत्रोच्यते, केवलपुरोडाशयागयोरनयोः असोमयाजिनोऽधिकारात् नाधिकृतविधिः किन्तु कर्मान्तरोयोर्विधिरिति। अत्रोच्यते। एवकारानर्थक्यान्न कर्मान्तरयोर्विधिः किन्तु याजनविधिः इति। अत्र वदामः। याजने फलाश्रवणात् न याजनविधिः। किन्तु असोमयागकाले पुरोडाशाभ्यामेव यजेत न तु सान्नाय्येनेति कालविधिरिति। अत्राभिधीयते ऐन्द्राग्नस्यासोमयागकालस्य प्राप्तत्वान्न कालविधिः किन्तु आग्नेयस्य पर्वद्वयप्राप्तस्यानुवादः ऐन्द्राग्नस्य अमावास्यायां विहितस्य पौर्णमास्यामप्राप्तस्य विधिरिति। अत्र ब्रूमः। पुरोडाशाभ्यामिति समुचितोपात्तयोः एकस्यानुवादस्यान्यस्य विधेश्चासम्भवान्नाग्नेयस्यानुवादः ऐन्द्राग्नस्य विधिः किन्तु असोमयागकाल

एव सान्नाय्येन विकल्पित ऐन्द्राग्नः सोमयागकाले तु न विकल्पित ऐन्द्राग्नः किन्तु सान्नाय्यमेवेत्येवं कालनियम इत्येवं प्राप्ते। ब्रूमः। एवं सति असोमयाजिशब्दस्य काले लक्षणाप्रसङ्गात् सान्नाय्ये न सोमयाजिनमित्यर्थवाद इति॥

(टि) केवलपुरोडाशेति। समस्तयोरेव दर्शपूर्णमासयोर्हस्याधिकार इत्यभिप्रायः। फलाश्रवणादिति। परस्मैपदश्रवणाच्च न फलं कल्पयितुमपि शक्यत इति भावः।

॥ उपांशुयाजस्य ध्रौवाज्यद्रव्यताधिकरणम्॥

सू. उपांशुयाजमन्तरा यजतीति हविर्लिङ्गाश्रुतित्वाद्यथाकामी प्रतियेत॥

(मू) दर्शपौर्णमासयोः श्रूयते-"उपांशुयाजमन्तरा यजती"ति। तत्र संशयः-किं उपांशुयाजे अर्थप्राप्तं यत्किञ्चिद् द्रव्यमिति अनियम उत ध्रौवाज्यमेवेति। तत्र विशेषाश्रवणादनियम इति प्राप्ते। ब्रूमः। विस्पष्टतादर्थ्यचतुर्थीसंयोगबललब्धविपरिणामलब्धविधिसामर्थ्यस्य "सर्वस्मै वा एतद्यज्ञाय गृह्यते यद् ध्रुवायामाज्यमि"ति वचनस्यैवाज्यविधायकत्वात् ध्रौवमाज्यमेवेति॥

(टि) विशेषाश्रवणादिति। आज्यस्यैव "तावुपांशु पौर्णमास्यां यजन्नि"त्यस्य कालविधिपरत्वेन द्रव्यविधानसामर्थ्यं, "सर्वस्मै वा एतद्यज्ञाय गृह्यत" इत्यस्य वैशब्दोपबन्धाद्वर्तमानापदेशसरूपत्वाच्च न विधानसामर्थ्यमिति भावः। वचनस्यैवेति। विध्यभावेऽपि असंयुक्तोत्पन्नं ध्रौवाज्यं प्रयोजनमपेक्षते। अश्रुतद्रव्यकश्चोपांशुयाजो द्रव्यमपेक्षत इति प्रकरणादुपांशुयाजस्याज्यं द्रव्यं स्यादित्येवकारसूचित इति द्रष्टव्यम्॥

॥ उपांशुयाजस्य प्राकृतदेवतानियमाधिकरणम्॥

सू. तद्वच्च देवतायां स्यात्॥



(मू) उपांशुयाजस्यैव देवतायां सन्देहः-किमर्थप्राप्ता या काचिद्देवतेत्यनियमः उत प्रकरणात् दर्शपूर्णमासतन्त्रमध्यगतदेवतानां मध्ये यया कयाचिद् देवतया उपांशुयाजवाक्यं एकवाक्यत्वं यातीति नानियमः किन्तु यःकश्चिन्नियम इति। तत्र देवताविधायकवचनाभावात् अनियम इति प्राप्ते। ब्रूमः। अविहितदेवताया असम्भवादुक्तरीत्या यः कश्चिन्नियम इति॥

(टि) देवताविधायकेति। "विष्णुरुपांशु यष्टव्य" इत्यादिरर्थवादः न दृष्टमिति भावः॥

॥ उपांशुयाजस्य विष्णवादिदेवताकत्वनिरूपणं पौर्णमासीकर्तव्यत्वनिरूपणमिति विषयद्वयप्रतिपादकं अपि अधिकरणद्वयरूपं एकमधिकरणम्॥

सू. धर्माद्वा स्यात् प्रजापतिः॥

(मू) उपांशुयाजस्य तान्त्रिकीनीं देवतानामन्यतमा देवतेत्युक्तम्। तत्र संशयः-प्रजापतिर्देवता उत मुख्यत्वात् अग्निः अथवा विष्णुः अत एवामावास्यायामेवोपांशुयाजः किं वा उभयोः पर्वणोरुपांशुयाजः तत्र अमावास्यायां विष्णुर्देवता पौर्णमास्यां तु प्रजापतिरग्नीषोमौ चेति तिस्रो देवता व्यवस्थितविभाषया स्युः वचनविधानात् मन्त्रवर्णाच्च उत पौर्णमास्यामेव उपांशुयाजः विष्णु प्रजापतिरग्नीषोमौ चेति तिस्रो देवताः तत्रैव मन्त्रवर्णात् विकल्प्यन्ते इति। तत्र "यत्किञ्चित् प्राजपत्यं यज्ञे क्रियते उपांश्वेव तत् क्रियते इति वचनात् प्राजापत्यस्य उपांशुत्वधर्मकस्य उपांशुयाजस्य च उपांशुत्वधर्मसम्प्रतिपत्तेः प्रजापतिर्देवतेति चेत्। उच्यते, यत्किञ्चिदित्यादिवचनेन तूष्णीम्भाव धर्मवचनार्थभूतेन धर्मसम्प्रतिपत्ति भावात् मुख्यत्वादग्निर्देवतेति। अत्रोच्यते। हौत्रे अमावास्यायागयोः आग्नेयैन्द्राग्नयोः आग्नेयैन्द्राग्नयाज्यापुरोनुवाक्यायुगलयोर्मध्ये पठितस्य स्थानविनियुक्तस्य वैष्णवयाज्यानुवाक्ययुगलमन्त्रस्य वर्णाद्विष्णुर्देवता। अत एवामावास्यायामेव उपांशुयाज इति।

अत्राभिधीयते। "जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशावुपांशुयाजमन्तरा यजत्यजामित्वायेति पुरोडाशद्वयमध्ये अविशेषेण विहितोपांशुयाजो द्वयोरपि पर्वणोः पुरोडाशद्वयसम्भवात् द्वयोरपि स्यात्। तत्र तिस्रो देवता व्यवस्थितविभाषया स्युः "तावब्रूतामग्नीषोमावाज्यस्यैव ना (ता) वुपांशु पौर्णमास्यां यजन्नि"ति वचनात्। तैत्तिरीयैराग्नेयाग्नीषोमीययाज्यानु वाक्यायुगलमध्यपठितस्य प्राजापत्ययाज्यानुवाक्यायुगलमन्त्रस्य हौत्रपठितमन्त्रस्य च वर्णनादित्येवं प्राप्ते। ब्रूमः। "उपांशु पौर्णमास्यां यजन्नित्यनेन प्रत्यक्षवचनेन पौर्णमासीकालविधानात् पौर्णमास्यामेवोपांशुयाजः। तत्र तिस्रो देवता मन्त्रवर्णात् विकल्प्यन्त इति। कालविधिमनिच्छन्त आश्वलायनादयस्तु पर्वद्वयेऽप्युपांशुयाजमाहुः। तेषां त्रयोदशामावास्यायामाहुतय इति लिङ्गसमर्थनं कथमिति विचारणीयमिति। कालविचारभूतं पृथगधिकरणमिति पक्षान्तरम्। तत्र संशयः-किममावास्यायामेवोपांशुयाज उत पर्वद्वयेऽपि अथवा पौर्णमास्यामेवेति। तत्र स्थानविनियुक्तमन्त्रवर्णदेवतालाभबलात् अमावास्यायामेवेति चेत् उच्यते। अविशेषेण पुरोडाशद्वयमध्ये विहितपर्वद्वये स्यात् पर्वद्वयेऽपि पुरोडाशसत्वादिति प्राप्ते। ब्रूमः। पौर्णमास्यां यजन्निति वचनात् पौर्णमास्यामेवेति॥

(टि) अत्र देवताविचारसमानहेतुत्वात् कालोऽपि तेन सह विचार्यत इति दर्शयन् संशयं दर्शयति किमित्यादिना। द्वयोरपि पर्वणोरिति। नन्वमावास्यायां सोमयाजिनः पुरोडाशद्वयाभावात् पाक्षिकत्वं स्यादिति चेत्तुल्यमसोमयाजिनोऽपि। पौर्णमास्यामग्नीषोमीय "स्याग्नेयो वै ब्राह्मण" इति वचनेनोत्कर्षणाभावादित्यभिप्रायः। पौर्णमासीकालविधानादिति। न चायं देवताविधिः मन्त्रवर्णलब्धत्वात्। पौर्णमासीकालविशिष्टयागानुवादेन देवताविधौ विशिष्टानुवाददोषापत्तेश्चेति भावः। विचारणीयमिति। किञ्च कालविध्यभावे पौर्णमासीवाक्येनानुवादासम्भवेन पूर्णमासशब्देन फले



विधानाभावादुपांशुयाजस्य प्रधानत्वमपि (द्रष्टव्यम्) न स्यात् किं त्वाज्यभागादिवदङ्गत्वमेव स्यादित्यपि द्रष्टव्यम्॥

### ॥ एकपूरोडाशायामप्युपांशुयाजाधिकरण्॥

### सू. द्विपुरोडाशायां स्यादन्तरार्थत्वात्॥

(मू) "आग्नेयो वै ब्राह्मण" इत्यादिवाक्येन अग्नीषोमीयस्य सोमयागोर्ध्वमुत्तकर्षात् असोमयाजिन एकपुरोडाशा पौर्णमासी सोमयाजिनस्तु द्विपुरोडाशा उपांशुयाजस्तु पौर्णमास्यामेवेति स्थितम्। तत्र संशयः-किं द्विपुरोडाशायामेकोपांशुयाजः स्यादुत एक पुरोडाशायामपीति। तत्र एकपुरोडासायामुपांशुयाजस्याङ्गभूता-न्तरालाभावप्रयुक्तवैगुण्यप्रसङ्गात् द्विपुरोडाशायामेवेति प्राप्ते।

ब्रूमः। पुरोडाशलक्षितकालस्य एकपुरोडाशायामपि सत्वात् तत्राप्युपांशुयाजः स्यादिति। अत्रान्तरालमङ्गत्वेन विधीयते तथापि उपांशुयाजस्याविशेषेण विधानादुभयत्रापि स्यात्। अन्तरालगुणस्तु यदा द्विपुरोडाशाः तदा भविष्यति न तु अङ्गवशेन प्रधानसङ्कोचो न्याय्य इति सिद्धान्तैकदेशिमतं, तदयुक्तं, अन्तरालस्य गुणत्वे तद्विशिष्ट एव यागो विधीयते। ततश्च यत्रान्तरालगुणो नास्ति तत्र विधिरेव नास्तीति द्विपुरोडाशायामेव विधिरिति तत्रैव स्यात्। अपि च नान्तरालस्य गुणत्वेन विधानं सम्भवति पुरोडाशयोरुपांशुयाजगुणत्वप्रसङ्गात्। तस्मात् काललक्षणार्थमेव पुरोडाशग्रहणं, कालश्च एकपुरोडाशायामप्यस्तीति तत्रापि उपांशुयाजः स्यादिति स्थितम्॥

### ॥ इति दशमाध्यायस्य अष्टमः पादः॥

### ॥ अध्यायश्च समाप्तः॥

(टि) पुरोडाशलक्षितकालस्येति। योऽ यं पुरोडाशयोर्मध्यकालस्तत्रोपांशुयाजः कर्तव्य इति। अन्यार्थाभ्यां

पुरोडाशाभ्यां लक्षिते काले कर्म विधीयते। सर्वत्र चोपलक्षणाभावेऽप्युपलक्षितमवतिष्ठेत यथा शङ्खवेलायामागान्तव्यमित्यादौ काकवद्देवदत्तगृहमित्यादौ चेति भावः।

॥ इति केरलीये षोडशाध्यायीटिप्पणे

॥ दशमस्याध्यायस्याष्टमः पादः ॥

॥ समाप्तश्चाध्यायः ॥

॥ बाधलक्षणं समाप्तम् ॥

॥ श्रीः ॥

॥ अथ एकादशाध्यायस्य प्रथमः पादः ॥

॥ आग्नेयादीनां समुदितानां तन्त्रेण स्वर्गफलकत्वाधिकरणम् ॥

सू. प्रयोजनाभिसम्बन्धात् पृथक्सतां ततः
स्यादेककर्म्यमेकशब्दाभिसंयोगात् ॥

(मू) दर्शपूर्णमासयोः प्रधानान्याग्नेय्यादीनीति। तेषां स्वर्गः फलं श्रूयते- "दर्शपिर्णमासाभ्यां स्वर्गकामो यजेते''ति। तत्र संशयः किमिहाग्नेयादीनुद्दिश्य फलविधानात् आग्नेय्या (या) दीनां उद्देश्यत्वेन साहित्यस्याविवक्षितत्वात् पृथगेव फलसम्बन्धः। ततश्चाग्नेयादीनां पृथगेव स्वर्गं फलं साधयन्ति। ततश्चाग्नेयादीनां युगपत्कर्तव्यत्वेनावस्थानाभावात् पृथगेव स्वाङ्गयुक्तानां कर्तव्यत्वात् तन्त्रत्वासिद्धेर्न तन्त्रावापलक्षणमिदमेकादशमारब्धव्यम्। अथवा फलोद्देशेन कामिनं पुरुषमुपायार्थिनमुद्दिश्याग्नेयादीनां विधानात् आग्नेयादीनां विधेयत्वेन साहित्यस्य विवक्षासम्भवात् तन्त्रेण फलसम्बन्धः। ततश्च आग्नेयादीनि संहत्य फलं साधयन्ति। ततश्चाग्नेयादीनां युगपत् कर्तव्यत्वेनोपस्थानात् अङ्गयुक्तानां युगपत्



कर्तव्यत्वात् तन्त्रत्वसिद्धेः तन्त्रावापलक्षणमारब्धव्यमिति। तत्रान्योन्यनिरपेक्षोत्पन्नानां पृथगेव फलापेक्षिणामाग्नेयादीनां उद्देश्यत्वस्यापेक्षितस्य फलस्य च विधेयत्वस्य युक्तत्वादुक्तरीत्या पृथगेव फलसम्बन्धः पृथगेव स्वर्गफलं साधयन्ति। तन्त्रावापलक्षणं च नारब्धव्यमिति प्राप्ते।

ब्रूमः। फलस्यैव प्रधानत्वादुक्तरीत्याग्नेयादीनां तन्त्रेण फलसम्बन्धः आग्नेयादीनि च संहत्य फलं साधयन्ति तन्त्रावापलक्षणं चारब्धव्यमिति। तत्र यत् सकृत् कृतं बहूनामुपकारकं तत् तन्त्रं, यथा बहूनां ब्राह्मणानां मध्ये कृतः प्रदीपस्तेषामु पकरोति स आवापः यथा तेषामेव बहूनां ब्राह्मणाना-मनुलेपनमिति तन्त्रावापलक्षणमिति॥

॥ श्री ॥

॥ अथैकादशस्य प्रथमः पादः ॥

(टि) एवं दशमेऽध्याये बाधाभ्युच्चयचिन्तया विकृतिष्वङ्गपरिमाणं चिन्तितम्। अतिदेशविचारश्च सप्तमादिभिर्दशमपर्यन्तैश्चतुर्भिरध्यायैः समाप्तः। सम्प्रत्युपदेशातिदेशसाधारण्येन प्रयोगपरिमाणं परिमाणप्रसङ्गादेकादशे तन्त्रवापचिन्तया चिन्त्यते । उपदिष्टातिदिष्टपदार्थेयत्तावधारणाधीनं च प्रयोगेयत्तावधारणमिति तदनन्तरमारम्भः। तदिहाध्याये एकप्रयोगवचनचोदितानामेकफलानां संहत्यकारिणां बहूनां कर्मणां साधारणाङ्गभाजामनुष्ठानं किं तन्त्रेण भवत्युतावृत्त्येति चिन्त्यते।

तत्र प्रथमं तावदुपोद्घातत्वेन संहत्यकारित्वं चिन्त्यते। तत्र किमाग्नेयादीनि पृथगेव स्वर्गं साधयन्त्युत संहत्यैतावदधिकरणशरीरं, अन्ये च तदर्थफलविचारा इति द्रष्टव्यम्। फलस्यैव प्रधानत्वादिति। किञ्च दर्शपूर्णमासाभ्यामिति द्वन्द्वावगतं प्रत्येकं दर्शपूर्णमासपदाभ्यां तन्त्राभिधानावगतं च त्रिकद्वयसाहित्यं त्रिकसाहित्यं च मा बाधीति कामिनमेव नरमुपायार्थिनं उद्दिश्याग्नेयादीनि विधीयन्त इत्येव युक्तमिति द्रष्टव्यम्॥

## ॥ अङ्गानामैकाकार्याधिकरणम् ॥

**सू. अङ्गानां तु शब्दभेदात् क्रतुवत् स्यात् फलान्यत्वम् ॥**

(मू) "समिधो यजति, तनूनपातं यजती"त्यङ्गानि श्रूयन्ते। तत्र संशयः-किं समिदाद्यङ्गानि पृथगेव क्रतूपकारकं कार्यं कुर्वन्ति उत सम्भूयेति। तत्र परस्परनिरपेक्षेणोत्पन्नानां परस्परनिरपेक्षेणैव क्रतूपकारकान्वयौचित्यात् पृथगेव कार्यं कुर्वन्तीति प्राप्ते।

ब्रूमः। अङ्गानां प्रधानरूपैकार्थत्वेन प्रयोगवचनचोदितत्वात् सम्भूय तत् कुर्वन्तीति ॥

(टि) भाष्यकारमतमाह-समिध इत्याद्येकमेवेत्यतः प्राक्तनेन ग्रन्थेन ॥

## ॥ दर्शपूर्णमासादिकाम्यकर्मणां सर्वाङ्गोपसंहाराधिकरणम् ॥

**सू. एकेनापि समाप्येत कृतार्थत्वाद्यथा क्रत्वन्तरेषु प्राप्तेषु चोत्तरावत् स्यात् ॥**

(मू) "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत"ति यः काम्यप्रयोगो विहितः तत्र संशयः-किं नैयमिकप्रयोगवत् काम्यप्रयोगेऽपि एकाङ्गोपसंहारः उत सर्वाङ्गोपसंहार इति। तत्र एकाङ्गेन करणेनेतिकर्तव्यताकाङ्क्षापूरणात् एकाङ्गोपसंहार इति प्राप्ते ब्रूमः, अङ्गानामपर्यायविधानात् सर्वङ्गोपसंहार इति। न ह्यङ्गानि पर्यायेण विधीयन्ते कदाचित् समिधो यजति कदाचित् तनूनपातं इत्यादीति। एकमेवेदमधिकरण्म्। तत्र त्रयः पक्षाः। अत्र संशयः-किं अङ्गानां स्वविधिवाक्यैः प्रयोगो विधीयते ततश्च बह्वङ्गविधानसामर्थ्यादितरेतरानपेक्षतया क्रतूपकारत्वाद्विकल्प उत एकेन द्वाभ्यां बहुभिश्च क्रतूपकारसिद्धिः उपकारभूयस्त्वेन च फलभूयस्त्वं, अथवा प्रधानविधिना अङ्गानां प्रयोगो विधीयते ततश्च समुचितानामेवोपकारकत्वमिति। तत्र विहितानामङ्गत्वानुपपत्तेः स्वविधिवाक्यैरेव प्रयोगो विधीयते, ततश्चोक्तरीत्या विकल्प इति चेदुच्यते, विकल्पस्यान्याय्यत्वात् बह्वङ्गविधानोपपत्तये एकेन द्वाभ्यां



बहुभिश्च उपकारसिद्धिः उपकारभूयस्त्वेन च फलभूयस्त्वमिति प्राप्ते। ब्रूमः। अश्रुतफलपदानां स्वविधिवाक्यानां प्रयोगविधित्वाभावात् प्रधानविधिनैवाङ्गानां प्रयोगो विधीयते. ततश्च समुचितानामुपकारकत्वमिति॥ अत्रेदमवधेयम्-अङ्गानां फलापेक्षायां प्राकृतभावनया युगपत्सम्बन्धात् सर्वाङ्गविशिष्टभावना प्रधानप्रयोगविधिना विधीयते। ततश्च तत एवाङ्गानामनुष्ठानसिद्धौ तस्मिन्नंशे अङ्गविधीनामनुवादत्वं सर्वविशिष्टविधानाच्च समुच्चय इति॥ (टि) एकमेवेत्यारभ्य वार्तिककारमतमुच्यते। स्वविधिवाक्यैरिति। तेषु च न प्रधानानामिवैकशब्देन तन्त्रेणाभिधानं किन्तु पृथक्छब्दैः पृथगेवाभिधानं, अतो न प्रधानवत् संहत्यकारित्वमिति भावः॥

## ॥ काम्यकर्मणां भूयोऽभ्यासाधिकरणम् ॥

**सू. कर्मण्यारम्भभाव्यत्वात् कृषिवत् प्रत्यारम्भं फलानि स्युः॥**

(मू) काम्येषु ऐन्द्राग्नसौर्यादिषु संशयः-किमेषां सकृदेव प्रयोग उत भूयो भूयः फलमिच्छता भूयो भूयोऽपि प्रयोग इति। तत्र सकृदनुष्ठिते फलानुभवहेतुभूतस्य कृतयागत्वस्य सम्भवात् सकृदेव प्रयोग इति प्राप्ते। ब्रूमः। आत्मनि यागजन्यस्यातिशयविशेषस्यापूर्वस्य फलानुभवहेतुत्वेन कल्पितस्य फलोपभोगानन्तरं नाशात् भूयो भूयः फलमिच्छता भूयो भूयोऽपि प्रयोगः कर्तव्य इति कृतयागे कश्चिदतिशयो जायत इति कल्पनीयम्। अन्यथा अकृतयागस्यापि फलापत्तिप्रसङ्गेन विध्यानर्थक्यप्रसङ्गात्। तदेवास्माकमपूर्वम्। तस्य फलभोगानन्तरं नाशानभ्युपगमे कल्पनामूलविरोधः स्यादिति बोध्यम्॥

(टि) कृतयागत्वस्येति। कर्मणो द्वारतयापूर्वस्य कल्पनायामत्यन्तादृष्टकल्पनं, तस्य च कर्मणोऽन्यत्वकल्पनं स्थायित्वफलहेतुत्वकल्पनं चेत्यनेककल्पना स्यात्। तद्वरं कृतयागत्वस्यैव फलहेतुत्वमेकमेव कल्पितमिति भावः। पूर्वपक्षं निराकरोति कृतयाग इत्यादिना। फलसिद्धिप्रकार विचार प्रसङ्गात् बहु फलसिद्धिप्रकारश्चिन्तित इति सङ्गतिः॥

॥ अवघातादीनां आतण्डुलनिर्वृत्तेरभ्यासाधिकरणम् ॥

सू. क्रियाणामर्थशेषत्वात् प्रत्यक्षोऽतस्तन्निर्वृत्त्यापवर्गः स्यात् ॥

(मू) दर्शपूर्णमासयोः श्रूयते-"व्रीहीनवहन्ति तण्डुलान् पिनष्टी"त्यादयः। तत्र संशयः-किं सकृदेवोद्यमननिपनादिकं कृत्वोपरन्तव्यमुत प्रयोजनवशात् आतण्डुलादिनिवृत्तेरभ्यसितव्यमिति। तत्राभ्यासाश्रवणात् सकृत् कृत्वोपरन्तव्यमिति प्राप्ते। ब्रूमः। अवघातादिना समीहितं कुर्यादित्यवघातादेः समीहितसाधनत्वेन विधानात् अश्रुतेऽप्यभ्यासे क्रत्वपेक्षितसमीहिततण्डुला-दिनिवृत्तिप्रयोजनवशात् आतण्डुलादिनिवृत्तेरभ्यसितव्यमिति ॥

(टि) अभ्यासाश्रवणादिति। अवघातं कुर्यादिति विधिस्तत श्चावघातमदृष्टार्थं कर्तव्यम्। सर्वौषधावहन्तिवदिति भावः। अभ्यासितव्यमिति। सर्वौषधावघाते तु दृष्टासम्भवाददृष्टार्थं शब्दार्थमात्रं कर्तव्यमिति सकृदसकृद्विचारप्रसङ्गात् सङ्गतिः।

॥ अदृष्टफलस्यावघातादेः सकृदनुष्ठानाधिकरणम् ॥

सू. धर्ममात्रे त्वदर्शनाच्छब्दार्थेनापवर्गः स्यात् ॥

(मू) अग्निचयने श्रूयते-"औदुम्बरमुलूखलं सर्वौषधस्य पूरयित्वा अवहन्ति अथैतदुपदधाती"ति। तत्र संशयः-किं सकृदवघातः कर्तव्यः उताभ्यसितव्य इति। तत्रावघातत्वाविशेषात् अभ्यसितव्य इति प्राप्ते। ब्रूमः। अदृष्टार्थत्वात् सकृत् कर्तव्य इति। न वेदमधिकरणान्तरम्।

(टि) सर्वौषधे पृथगधिकरणमिति पक्षान्तरम्। तद्दर्शयति अग्निचयन इत्यादिना ॥

॥ प्रयाजादीनामङ्गानां सकृदनुष्ठानाधिकरणम् ॥

सू. क्रतुवद्वानुमानेनाभ्यासे फलभूमा स्यात् ॥

(मू) प्रयाजाद्यङ्गान्युदाहरणम्। तत्र संशयः-किमेकस्मिन् प्रयोगे अङ्गेषु पुनः पुनः प्रयुज्यमानेषु फलभूयस्त्वं स्यान्न वेति। तत्र



बहुभिरङ्गैरुपकारभूयस्त्वसम्भवात् फलभूयस्त्वमिति प्राप्ते।

ब्रूमः। उपकारभूयस्त्वे फलभूयस्त्वमित्यत्र प्रमाणाभावान्नाङ्गेषु पुनः पुनः प्रयुज्यमानेषु फलभूयस्त्वमिति न ह्यशास्त्रीयेण प्रयासगौरवेण फलभूयस्त्वमिति। तस्माद् फलभूमार्थिना साङ्गप्रधानमभ्यसितव्यं नाङ्गमात्रं नापि प्रधानमात्रमिति स्थितम् ॥

(टि) नाङ्गेष्विति। समग्रकरणावृत्त्या हि फलमावर्तते प्रधानं च साङ्गं फलसामग्री नाङ्गमात्रमिति भावः ॥

॥ बहुवचनस्य त्रित्वपरत्वे कपिञ्जलाधिकरणम् ॥

सू. बहुवचनेन सर्वप्राप्तेः विकल्पः स्यात् ॥

(मू) अश्वमेधे "वसन्ते कपिञ्चलानालभेत"ति श्रूयते। तत्र संशयः - किं त्रित्वप्रभृतीनां सङ्ख्यानामनियमेनालम्भः उत त्रयाणामेवेति। तत्र बहुत्ववाचिना बहुवचनेन विहितानां सङ्ख्यानां शास्त्रीयत्वात् फलभूयस्त्वार्थं यावत् लब्धं नानासङ्ख्यानामालम्भ इति प्राप्ते।

ब्रूमः। बहुत्वमात्रस्य शब्दाभच्वात् शास्त्रीयबहुत्वमात्रसम्पदनार्थं त्रयाणामेवालम्भ इति। अत्र त्रीनालभ्य ततः परिसङ्ख्याविशिष्टानामालम्भासम्भवात्त्रयाणामालम्भावश्यकत्वमिति स एव ग्राह्यः। तावता च बहुत्वे शास्त्रार्थे सिद्धे अधिकालम्भे न हिंस्यादिति निषेधशास्त्रस्य प्रवृत्तेः कृते अधिकालम्भे प्रत्यवेयादिति बोध्यम्।

(टि) शास्त्रीयत्वादिति। शास्त्रीयाद् गौरवाच्चु फलभूयस्त्वमविवादमिति भावः। बहुत्वमात्रस्येति। बहुवचनमत्र श्रूयते न तु "षड् देया द्वादश देया" इत्यादिवत् सङ्ख्याविशेषाणां शास्त्रोति (शस्त्रीयतेति)। अतो यद्विशिष्यते चतुरादिकं तदशास्त्रीयं बहुत्वमेव तु सामान्यं शास्त्रीयं तच्च त्रीनालभ्यैव सम्पद्यत इति भावः ॥

॥ "उत्तरा दोहयति इत्यत्र सर्वासां गवां दोहनाधिकरणम् ॥

सू.उत्तरासु न यावत्स्वमपूर्वत्वात् ॥

(मू) सान्नाय्यदोहं प्रकृत्य श्रूयते-"वाग्यतस्तिस्रो दोहयित्वा विसृष्टवागन्वारभ्य तूष्णीमुत्तरा दोहयती"ति। तत्र संशयः-किमुत्तराः तिस्रो दोहनीया उत यजमानस्य यावत्यो गावः सन्ति ताः सर्वा दोहनीया इति। तत्र पूर्वन्यायात् तिस्रो दोहनीया इति प्राप्ते। ब्रूमः। "नास्यैतां रात्रिं कुमारा अपि पयसो लभेरन्निति वचनेन कृत्स्नस्य पयसो विधानात् सर्वा दोहनीया इति॥ (टि) हविष्ट्वविधानादिति। न ह्यनेन वचनेन कुमाराणां पयः-प्रदानं प्रतिषिध्यते अदृष्टार्थत्वप्रसङ्गादपिशब्दानर्थक्याचेति भावः॥

॥ आग्नेयादीनां प्रधानानां भेदेऽप्याघारादीनामङ्गानां तन्त्रेणानुष्ठानाधिकरणम्॥

सू. प्रधानकर्मार्थत्वादङ्गानां तद्भेदात् कर्मभेदः प्रयोगे स्यात्॥

(मू) दर्शपूर्णमासयोः षट् प्रधानकर्माणि। तेषु त्रीणि पौर्णमास्यां त्रीणि अमावास्यायां कर्तव्यानी"ति। तत्र संशयः-किं त्रयाणां प्रधानानां भेदेनावापेन प्रयाजाद्यङ्गानि कर्तव्यानि उत सकृत् तन्त्रेणेति। तत्र पृथगेव कथम्भावापेक्षिषु प्रधानेषु भेदेन विनियुक्तत्वात् यथाविनियोगं भेदेन कर्तव्यानीति प्राप्ते। ब्रूमः। भेदेन कथम्भावाकाङ्क्षिणां षण्णां सकृदाम्नातैरङ्गविधिभिः सकृदेव प्रत्येकमङ्गसमर्पणात् सकृदेव कर्तव्यानीति। तस्मादेकदेशकालकर्तृकाणां विशेषाग्रहणात् तन्त्रमङ्गानीति सिद्धम्॥

(टि) गतमुपोद्घातप्रसक्तानुप्रसक्तादि। इदानीं लक्षणार्थस्तन्त्रावापश्चिन्त्यते. तस्मादेकदेशेति। "पौर्णमास्यां पौर्णमास्या यजेत"ति त्रयाणां युगपदनुष्ठानं विहितम्। तत् पृथक् पृथक् स्वाङ्गेष्वनुष्ठीयमानेषु बाध्यते। एवं सर्वत्रेति भावः।

॥ कृष्णग्रीवयोः प्रथमतृतीययोर्भेदेन प्रदानाधिकरणम्॥



सू. व्याख्यातं तुल्यानां यौगपद्यमगृह्यमाणविशेषाणाम्॥

(मू) काम्यपशुकाण्डे श्रूयते-"आग्नेयं कृष्णग्रीवमालभेत सौम्यं बभ्रुं आग्नेयं कृष्णग्रीवं पुरोधायां स्पर्धमान" इति। ममैव पौरोहित्यमस्तु नान्यस्येत्येवं स्पर्धयोपेत इत्यर्थः। तत्र संशयः-किमाग्नेययोरनुष्ठानं तन्त्रं उत पृथगिति। तत्र देवतैक्यात्तन्त्रमिति प्राप्ते।

ब्रूमः। तन्त्रे सौम्यपूर्वापररूप क्रमबाधप्रसङ्गात् पृथगनुष्ठानमिति।

॥ इति एकादशाध्यायस्य प्रथमः पादः॥

(टि) दैवतैक्यात्तन्त्रमिति। नच पाठक्रमात्तन्त्रबाधः अवश्यम्भाविनि हि क्रमे पाठान्नियमः सहानुष्ठाने सम्भवति च न क्रमापेक्षेति भावः। यद्यप्याग्नेययोः क्रमाविवक्षा तथापि सौम्यस्य क्रमापेक्षास्तीति तत्र पाठान्नियमेन तन्त्रबाध इत्याह तन्त्र इत्यादिना॥

॥ इति केरलीये षोडशाध्यायीटिप्पणे

एकादशाध्यायस्य प्रथमः पादः॥

अथ एकादशाध्यायस्य द्वितीयः पादः॥

॥ आग्नेयादीनां प्रधानानां तन्त्राधिकरणम्॥

सू. एकदेशकालकर्तृत्वं मुख्यानामेकशब्दोपदेशात्

(मू) दर्शपूर्णमासयोराग्नेयादीनि प्रधानानि। तत्र देशः श्रूयते-"समे दर्शपूर्णमासाभ्यां यजेत"ति; तथा कालः-"पौर्णमास्यां पौर्णमास्या यजेत अमावास्यायाममावास्यया यजेते"ति, तथा कर्तारः-"दर्शपूर्णमासयोः यज्ञक्रत्वोः चत्वार ऋत्विज इति। तथा चातुर्मास्येषु-"प्राचीनप्रवणे वैश्वदेवेन यजेत चातुर्मास्यानां यज्ञक्रतूनां पञ्चतर्त्विज" इति। तत्र संशयः-किं देसादिविधीनां "यदाग्नेयोऽष्टाकपाल" इत्यादिभिः उत्पत्तिविधिवाक्यैः सम्बन्धः न तु "दर्शपूर्णमासाभ्यां स्वर्गकाममो यजेतेत्यनेन प्रयोगविधायकफलवाक्येन, त्रयाणामङ्गानां परस्परसम्बन्धाभावेन भाव्यांशसमर्पणकफलवाक्यस्य

कथमभावांशासमर्पक देशादिविधिवाक्याख्यानां च मिथः सम्बन्धाभावात्। ततश्चोत्पत्तिवाक्येष्वाग्नेयादीनां अन्योन्यनिरपेक्षेणोत्पन्नत्वात् देशादिविधिवाक्येषु पौर्णमास्यादिभिः शब्दैः तन्त्रेणोपात्तत्वेऽपि उद्देश्यत्वेन साहित्यविवक्षाभावात् तन्त्रसम्बन्धासम्भवात् प्रत्येकं सम्बन्धात् देशकालकर्तारः आग्नेयादीनां भेदेन स्युः, अथवा उत्पत्त्यवस्थापन्ना भावना हि प्रथमं भाव्यमपेक्षते। भाव्यसमर्पकं च फलवाक्यमिति उत्पत्तिफलवाक्ययोः प्रथमं सम्बन्धात् फलवाक्यारूढभावनया देशादीनां सम्बन्धात् तत्समर्पकफलवाक्येन "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत"त्यनेन देशादिविधीनां सम्बन्धः न तु उत्पत्तिवाक्यैः सम्बन्धः उत्पत्तिवेलायामितिकर्तव्यताकाङ्क्षाभावेन तत्प्रतिपादक देशादिविधिवाक्यैः तदानीं सम्बन्धासम्भवात्। ततश्च फलवाक्ये साहित्यस्य विवक्षितत्वात् पौर्णमास्यादिश ब्दैः तन्त्रेणेपात्तत्रिकद्वयस्य चोपादीयमानत्वेन साहित्यस्य विवक्षितत्वात् तन्त्रेण देशादिसम्बन्धात् देशकालकर्तारः तन्त्रमिति। तत्र त्रयाणामप्यंशानां भावनयैव सम्बन्धात् अंशसमर्पकाणां फलेदेशादिवाक्यानां सर्वेषां भावनासमर्पकोत्पत्तिवाक्यैः सम्बन्धः। ततश्चोक्तरीत्या देशकालकर्तारः भेदेन स्युः एकस्मिन्। तत्र समदेशे एकस्यां पौर्णमास्यां यैः कैश्चित् देवदत्तादिभिराग्नेयं कृत्वा पुनरन्यत्र परदेशे परस्यां पौर्णमास्यामन्यैर्देवदत्तादिभिः अग्नीषोमीयं कर्तव्यं इत्येवं स्यादिति स्थितेऽन्तराचिन्ता।

॥ श्री ॥

## ॥ अथैकादशस्य द्वितीयः पादः ॥

(टि) इत्येवं स्यादिति। यथा द्वयोः पर्वणोः क्रियमाणयोस्त्रिकयोः फलं प्रति साहित्यं न बाध्यते तथा षट्सु कर्मसु क्रियमाणानां षण्णामिति भावः॥

### ॥ अङ्गानामपि समदेशादिनियमाधिकरणम्॥



**सू. अङ्गेषु च तदभावः प्रधानं प्रति निर्देशात्॥**

(मू) किमङ्गेषु समादय एकदेशकालकर्तारः उत नियम इति। तत्र उत्पत्तिवाक्यैः प्रधानमात्राणां निरङ्गानामेव देशादिविधानात् अङ्गेषु देशाद्यनियम इति स्थिते। स्थितादुत्तरं सम्बन्धस्याकाङ्क्षाक्रमाधीनत्वात् उक्तरीत्या देशादिविधीनां फलवाक्येन सम्बन्धः। ततश्च देशादयः तन्त्रं यस्मिन् समदेशे यस्यां पौर्णमास्यां यैराग्नेयः क्रियते तस्मिन्नेव तस्यामेव तैरेवाग्नीषोमीयः कर्तव्यादीति। अत्रेदमवधेयम् - यद्यपि पूर्वपक्षे फलवाक्यस्य देशादिवाक्यानां चोत्पपत्तिवाक्यैः सम्बन्धः तथापि फलवाक्ये विधीयमानत्वादाग्नेयादीनां साहित्यं विवक्षितमिति देशादिवाक्येषु तु उद्दिश्यमानत्वान्न विवक्षितमिति वैषम्यात् न **फलवद्देशादीनां तन्त्रत्वसिद्धिः किन्तु फलवाक्यसम्बन्धादेव।** नापि **"य इष्टया पशुना सोमेन वा यजेत** सोऽमावास्यायां पौर्णमास्यावेत्येकस्मिन् वाक्ये तन्त्रेणाभिहितादिरिष्ट्यादिभिः यथा प्रत्येकं सम्बन्धःतथाग्नेयादिभिरपि प्रत्येकं देशादिसम्बन्धः सम्भवति सौर्यादीनां पृथगेव स्वफले विनियुक्तानां पृथगेव कर्तव्यतावगमात् आग्नेयादीनां च तथावगत्य भावादिति। अङ्गेषु स्थितादुत्तरं साङ्गप्रधानप्रयोगविधिवाक्येन देशादिवाक्यानां सम्बन्धात् अङ्गेष्वपि समादय एव देशादय इति। तदयं निष्कर्षः-प्रयोगविधिवशेन देशादीनां तन्त्रत्वं द्रव्यदेवतं तु नाङ्गप्रधानानां तन्त्रं प्रयोगविधिनानापेक्षितत्वेनासम्बन्धादिति। एकं वेदमधिकरणम्॥

(टि) अनियम इति। ततश्चाङ्गानि कामं कालान्तरादिष्वपि कर्तव्यानीति फलवाक्येन सम्बन्ध इति। ततश्च फलवाक्येन फलं प्रति विवक्षितसाहित्यानां विनियोगात् फलार्थिना युगपत् सर्वेषु कर्तव्यतावगम्यते। ततश्चैकस्यामेव बुद्धौ सर्वेषु कर्तव्यतयोपस्थितेषु चिकीर्षितेषु पौर्णमास्यादिकालो यैवैका पौर्णमास्युपात्ता सैवागृह्यमाणविशेषत्वात् सर्वार्था भवति तथा देशः कर्तारश्चेति तन्त्रं स्यादिति भावः। तदेवाह यस्मिन्नित्यादिना। पूर्वपक्षसिद्धान्तयोर्वैषम्यं दर्शयति अत्रेदमित्यादिना। सौर्यादिवैषम्यमाह नापीत्यादिना।

पृथगेवस्वफल इति। एतदुक्तं भवति-यदा सौर्यचित्रादीनां युगपत् स्वेच्छया सह चिकीर्षा तदापि न कालादयस्तन्त्रं विधिवेलायां साहित्यानवगमात् सहप्रयोगे च विरोधप्रसङ्गात्। तथाहि-एकेन विधिना यावन्त्यङ्गप्रधानानि विधीयन्ते तावद्भिर्यावान् कालो व्याप्यते तावति काले समस्ताङ्गप्रधानप्रयोगः कर्तव्य इत्यवगम्यते स च सहप्रयोगे विरुध्यत इति। अङ्गेष्वपि समादय इति। अयं भावः-उत्पत्तिवाक्ये हि भावयेदिव्येतावद्भावना प्रथममवगम्यते। सा च प्रथमं किमिति साध्यमपेक्षते। तच्च प्रवर्तनाभिधायिविधिप्रत्ययश्रुत्यन्यथानुपपत्त्या पुरुषार्थमवगम्यते। ततश्च एकपदोपात्तमपि धात्वर्थमपुरुषार्थत्वादावृत्त्य दूरस्थमपि फलवाक्यगतं स्वर्गादीत्यवधार्यते "स्वर्गं भावयेदि"ति। ततः केनेत्यपेक्षायां योग्यत्वादेकपदोपात्तप्रत्यासत्तेश्च धात्वर्थः सम्बध्यते "दर्शपूर्णमासाभ्यां यागाभ्यां स्वर्गं भावयेदिति। ततः साध्यसाधनांशमात्रयुक्तावगता भावना कथमितीत्थम्भावमपेक्षते। भावनागतश्च रूपविशेष इत्थम्भावः। प्रज्ञातरूपा हि भावना कालादीनपेक्षते। ततः कालाद्यपेक्षायाः प्राक् प्रकारापेक्षायां भावनायां तत्प्रकारत्वेन प्रयाजादयो विधीयन्त इति ते सम्बध्यन्ते। ततः सामरूपरूपेण भावनाख्ये व्यापारे प्रयोगापरपर्यायेऽवगते तच्छेषत्वेन कालादयो विधीयन्त इत्यङ्गानामपि त एव कालादयो भवन्तीति। अनपेक्षितत्वेनेति। अयोग्यत्वाच्चेति द्रष्टव्यम्। न ह्यन्यन्वाधा नादिब्राह्मणतर्पणपर्यन्तानुरक्तस्य प्रयोगस्य द्रव्यदेवतं समर्थमिति। केन तर्हि सम्बध्यते द्रव्यदेवतमिति चेदुच्यते। फलभावनावयवभूतेन यागस्वरूपनिष्पादनेनापेक्षितत्वाद्योग्यत्वाच्च द्रव्यदेवतं सम्बध्यत इति। अयमत्र विवेकः-कालादयस्तावदाग्नेयादिकरणिकया फलभावनया सकलाङ्गोपेतसमग्ररूपया सम्बध्यत इति तन्त्रम्। द्रव्यदेवतं तु फलभावनावयवभूताग्नेयादिकरणमात्रेण सम्बध्यति न त्वङ्गांशेऽपि तस्य सम्बन्ध इति न तन्त्रमिति। तन्त्रेण प्रयोग इति वचनात्त्वेकोऽपि प्रयोगो विप्रकृष्यते पशुवदिति भावः॥



## ॥ दर्शपूर्णमासेष्टिप्रभृतिषु सङ्घभेदेनाङ्गानां भेदेनानुष्ठानाधिकरणम्॥

**सू. इष्टिराजसूयचातुर्मास्येष्वैककर्म्यादङ्गानां तन्त्रभावः स्यात्॥**

(मू) दर्शपूर्णमासेष्ट्यां द्वौ समुदायौ दर्शःपूर्णमासश्चेति तथा राजसूयेष्टयः सोमाश्चेति चातुर्मास्येषु च चत्वारः वैश्वदेववरुणप्रघाससाकमेधशु नासीरीया इति। "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत, राजा राजसूयेन स्वाराज्यकामो यजेत चातुर्मास्ये (न) स्वर्गकामो यजेते"ति च दर्शपूर्णमाससमुदाययोः राजासूयगतेष्ट्यादीनां चातुर्मास्यानां च फलैक्यं "पौर्णमास्या यजेत अमावास्यायाममावास्यया यजेते"ति कालभेदः, राजसूये च देशभेदः "बार्हस्पत्यश्चरुर्ब्रह्मणे गृहे ऐन्द्र एकादशकपालो राज्ञो गृहे आदित्यश्चरुर्महिष्यै गृह" इत्यवमादि, चातुर्मास्येष्वपि कालभेदः वसन्ते वैश्वदेवेन यजेत वर्षासु वरुणप्रघासैर्यचेत हेमन्ते साकमेधैर्यजेतेति श्रूयते। तत्र संशयः किं दर्शपूर्णमासादीनां कालभेदेन देशभेदेन च प्रविभज्य प्रयुज्यमानानामेकप्रयोगत्वादङ्गानां तन्त्रोण प्रयोग उत भेदेनेति। तत्र एकफलत्वात्न्त्रे कप्रयोगत्वात्तन्त्रेण प्रयोग इति प्राप्ते। ब्रूमः। कालदेशविधायकवाक्यैः साङ्गादीनां त्रिकादीनां कालवदेशविधानात् तत्र भेदेन प्रयोग इति। इदं त्ववधेयम्-यत्र गृह्यमाणविशेषत्वंतत्र भेदेन प्रयोगः यत्र त्वगृह्यमाणविशेषत्वं तत्र तन्त्रेणेति। ततश्च यत्र देशकालफलादीनां अन्यतमो भेदेन विधीयते तत्राङ्गानां भेदेन प्रयोगः गृह्यमाणविशेषत्वादन्यत्रागृह्यमाणविशेषत्वात् तन्त्रेणेति स्थितम्॥

(टि) यद्यप्येकफलत्वादेकप्रयोगत्वं तथापि वाचनिकेन कालादिभेदेन प्रयोगभेदो भवतीत्याशयेनाह-कालदेशेति। अयं भावः- "पौर्णमास्यां पौर्णमास्या यजेते"त्यनेन हि यः पौर्णमासीकरणकः फलार्थोव्यापारः प्रत्ययवाच्यस्तदङ्गत्वेन पौर्णमासीकालो विधीयते न पौर्णमासीयागमात्रस्य. नापि यागक्रियायाः। तेनाङ्गानामपि यागकरणकफलक्रियान्तर्गतानां तत्कालता विहिता भवति एवं सर्वत्रेति।

भेदेनेति। पशौ तु वपाप्रचारादि मात्रस्य भिन्नकालचोदना न पशुयागस्य न च प्रचारार्थान्यङ्गानि। पश्वर्थानि हि तानि. तेन नात्रावर्तन्ते। अत्र पुनःप्रधानकालभेदादङ्गानामावृत्तिरिति विशेष इति भावः ॥

**॥ अध्वरकल्पायां त्रिषु सर्वेष्वङ्गानां भेदेनानुष्ठानाधिकरणम् ॥**

**सू. तथा स्यादध्वरकल्पायां विशेषस्यैककालत्वात् ॥**

(मू) काम्येष्टिष्वध्वरकल्पा नामेष्टिः श्रूयते-"आग्नावैष्णवं प्रातरष्टाकपालं निर्वपेत् सारस्वतं चरुं बार्हस्पत्यं चरुं आग्नावैष्णमेकादशकपालं मध्यन्दिने सारस्वतं चरुं बार्हस्पत्यं चरुं आग्नावैष्णवमेकादशकपालं अपरान्हे सारस्वतं चरुं बार्हस्पत्यं चरुं यो भातृव्यवान् स्यात् सोऽनेन यजेतेति। क्वचित् अन्यथा दृश्यते-"आग्नावैष्णवमष्टाकपालं निर्वपेत् पूर्वाह्णे सरस्वतीमाज्यस्य यजेत बार्हस्पत्यश्चरुः आग्नावैष्णवमेकादशकपालं निर्वपेत् मध्यन्दिने सरस्वतीमाज्यस्य यजेत बार्हस्पत्यश्चरुः आग्नावैष्णवं द्वादशकपालं निर्वपेत् अपराह्णे सरस्वतीमाज्यस्य यजेत बार्हस्पत्यश्चरुरिति। तत्र श्रूयते-"पुरा वाचः प्रवदितो निर्वपेदि"ति। रात्रौ सुप्तजनानां प्रबोधपूर्वकवाग्व्यापारात् पुरा उषःकाले निर्वपेदित्यर्थः। अनेन च निर्वापप्रतिकर्षः क्रियते। तत्र संशयः-किमनेन सर्वनिर्वापापकर्षः क्रियते ततश्च तदादिन्यायात् निर्वपान्ताग्न्यन्वाधानाद्यङ्गकाण्डस्यापकर्षः। ततश्च तदङ्गकाण्डं वचनादन्यकालमिति अगृह्यमाणविशेषत्वात् तन्त्रं ततश्च नवापि यागाः तन्त्रेणोपक्रान्ताः यथोपक्रमं च समापनीयमिति इतरेषामप्यङ्गानामपि तन्त्रत्वमिति नवानां यागानामङ्गानि तन्त्रं उत व्रतकालनिर्वापस्यैव प्रतिकर्षः ततश्च माध्यन्दिनापराह्णकालानां अङ्गकाण्डस्यानपकर्षात् सर्वेषां सहोपक्रमाभावात् गृह्यमाणविशेषणत्वात् त्रयाणामपि त्रिकाणामङ्गानि त्रिरावर्तनीयानीति। तत्र प्रकरणात् सर्वनिर्वापापकर्षः ततश्चोक्तरीत्याङ्गानि तन्त्रमिति प्राप्ते। ब्रूमः। लाघवार्थं प्रातःकालनिर्वपिस्य सामान्यतः प्राप्तस्य प्रातः काल स्य "पुरा वाच" इत्यनेन प्रातःकालवि-शेषमात्रस्य विधानाभ्युपगमात्



प्रातःकालनिर्वापस्यैवापकर्षः। ततश्चोक्तरीत्या त्रिरावर्तनीयानीति ॥

(टि) नात्र संशय इति। किमङ्गानि तन्त्रमुतावर्तनीयानीत्ये-वाधिकरणशरीरमिति बोध्यम् ॥

**॥ प्राजापत्यवसाहोमानां तन्त्रेणानुष्ठानाधिकरणम् ॥**

**सू. वसाहोमस्तन्त्रमेकदेवतेषु स्यात् प्रदानस्यैककालत्वात् ॥**

(मू) "सप्तदश प्राजापत्यानालभत" इत्येकदेवत्याः पशवस्तु उदाहरणम्। अस्ति तु प्रकृतौ अग्नीषोमीये पशौ वसाहोमं याज्यार्धर्चान्ते वसाहों जुहोतीति। स इह चोदकपरम्परया प्राप्तः। तत्र संशयः-किं वसाहोम आवापः उत तन्त्रमिति। तत्र पशुभेदादावाप इति प्राप्ते। ब्रूमः। एकदेवताकप्रजापत्ययागानां याज्यार्धर्चान्तस्यैकत्वात् तन्त्रमिति

(टि) तन्त्रमिति। स्पष्टं चेदं शिष्यहितार्थमुक्तमिति द्रष्टव्यम् ॥

**॥ ऐकादशिनगतवसाहोमस्य भेदेनानुष्ठानाधिकरणम् ॥**

**सू. कालभेदे त्वावृत्तिर्देवताभेदे ॥**

(मू) भिन्नदेवतेषु एकादशिनेषु संशयः-किं वसाहोमस्तन्त्रमुतावाप इति। तत्र यस्य कस्यचिद्याज्यार्धर्चान्ते सकृत् कर्तुं शक्यत्वात्तन्त्रमिति प्राप्ते। ब्रूमः। याज्यार्धर्चान्तकालभेदाभाव इति। शिष्यहितार्थमिदमधिकरणद्वयम्। पूर्वपक्षशङ्कास्तीतिमन्देति।

(टि) शक्यत्वादिति। सहश्रपणेन वसाया एकत्वाच्चेत्यपि द्रष्टव्यम्। कालभेदादिति। पशवश्च स्ववसायाः प्रतिपत्तिं पृथगेवापेक्षन्ते तस्माच्चेति ॥

**॥ यूपैकादशिन्यां तन्त्रेण यूपाहुत्यनुष्ठानाधिकरणम् ॥**

**सू. अन्ते यूपाहुतिस्तद्वत् ॥**

(मू) ज्योतिष्टोमे यूपैकादशिनी श्रूयते-"एकादश यूपान् मिनोती"ति। अस्ति तु प्रकृतावग्नीषोमीये पशौ यूपाहुतिः "यूपस्यान्तिके अग्निं मथित्वा यूपाहुतिं जुहोती"ति। सा चात्र चोदकप्राप्ता। तत्र संशयः-

किमेकादशिन्यां यूपाहुतिः भेदेन कर्तव्या उतागृह्यमाणविशेषत्वात् तन्त्रेणेति। तत्र भिन्नानां यूपानामन्तिकदेशभेदात् भेदेन कर्तव्येति प्राप्ते। ब्रूमः। आपेक्षिकस्य अन्तिकदेशस्य एकत्वसम्भवादगृह्यमाणविशेषणत्वात् तन्त्रेणेति। इदं त्वव धेयम्-न ह्यान्तिकदेश इह विवक्ष्यते मथनाद्यसम्भवात् किन्तु यूपोऽष्टपथमापद्यते स विवक्षितः। स च सर्वेषामेक एवेति न भेदेन प्रयोग इति॥ (टि) आपेक्षकत्वं सहेतुकमाह-इदं त्वित्यादिना॥

**॥ साङ्गस्यावभृथस्याप्स्वनुष्ठानाधिकरणम्॥**

**सू. अवभृथे प्रधानेऽग्निविकारः स्यान्न हि तद्धेतुरग्निसंयोगः॥**

(मू) ज्योतिष्टोमे अवभृथे श्रूयते-"अप्स्ववभृथेन चरन्ती"ति। तत्र संशयः-किं प्रधानमात्रमप्सु कर्तव्यमुताङ्गान्यपीति। वैकृताङ्गानां प्रधानमात्रार्थत्वात् (प्रधानमात्रं) कर्तव्यमिति प्राप्ते। ब्रूमः। अवभृथकरणिकायां भावनायां श्रूयमाणानामपां तदन्तर्गतेष्वङ्गेष्वपि सम्भावादङ्गान्यपि अप्स्वेव कर्तव्यानीति॥

(टि) वैकृताङ्गानामिति। उपांशुत्ववदावापोऽपि प्रधानस्यैव अङ्गानां त्वाहवनीय एव क्रियेति भावः। अवभृथकरणिकायामिति। "उपांशुकर्तव्या इति प्रधानक्रियायां विहितमुपांशुत्वं नाङ्गेषु भवतीति युक्तमिति॥

**॥ वरुणप्रघासेष्वाग्नेयादीनां मारुत्य भेदनानुष्ठा-नाधिकरणम्॥**

**सू. दक्षिणेऽग्नौ वरुणप्रघासेषु देशभेदात् सर्वं विक्रियते।**

(मू) वरुणप्रघासेषु विहारपृथक्त्वमाम्नातम् "पृथगग्नी प्रणयतः पृथक् वेदी कुरुत" इति। तत्र श्रूयते-"अष्टावर्ध्वर्युरुत्तरे हवींष्यासादयति मतीरुमेव प्रतिप्रस्थाता दक्षिणस्मिन् इति, वरुणप्रघासेषु आग्नेयादीनि नव हवींषि सन्ति, द्वे च वेदी, आहवनीयश्च विभज्य स्थापितः। तत्रानेन वाक्येनाष्टानां आग्नेयादीनां



अध्वर्युणोत्तरविहारे सादनं, मारुत्या आमिक्षायाश्च प्रतिप्रस्थात्रा दक्षिणविहारे सादनं च विहितम्। तत्र संशयः-किं नवानामपि हविषां अङ्गानि तन्त्रमुत मारुत्या आमिक्षाया भेदेन कर्तव्यानीति। तत्र "वर्षासु वरुणप्रघासैर्यजेतेति वा "प्रावृषि वरुणप्रघासैर्य जेते"ति वा प्रयोगवचनैकत्वात् तन्त्रमिति प्राप्ते। ब्रूमः। प्रधानदेशभेदात् गृह्यमाणविशेषाण्यङ्गानिभेदेन कर्तव्यानीति। तथाहि-अत्र होमार्थतया प्राप्तस्यासादनस्य दक्षिणस्मिन् विहारे विधानात् होमोऽपि दक्षिणस्मिन्नेव मारुत्या इति प्रधानदेशभेद इति॥

(टि) प्रयोगवचनैकत्वादिति। मारुत्याः दक्षिणे विहारे विधीयते न होम इति प्रधानदेशभेद इति भावः। प्रधानदेशभेदमेव प्रतिपादयति तथा हीत्यादिना। ननु मा भूत्तन्त्रं तथापि न भेदेनानुष्ठानं प्रसङ्गात् कार्यसिद्धेः। तथाहि-उत्तरस्मिन् विहारेऽध्वर्युणा कृतैरङ्गैर्यजमानान्यानि स्वापूर्वेष्वाहितेषु एकार्थसमवायेनानुगृहीतमारुतीयागोत्पत्त्यपूर्वं दक्षिणवैहारिकं प्रतिप्रस्थातृकर्तृकमपि स्वकार्यं जनयतीति चेदत्रोच्यते। अन्यस्य तन्त्रमध्येऽन्यस्य विधाने प्रसङ्गः स्यान्नान्यथा। इह तु नवानामपि यागानां युगपच्छासनान्न प्रसङ्ग इति॥

**॥ उत्तरदक्षिणविहारयोः कर्त्रभेदाधिकरणम्॥**

**सू. कर्तृभेदस्तथेति चेत्॥**

(मू) वरुणाप्रघासेष्वेव कर्तृषु संशयः-किं कर्तारः ब्रह्मा होता आग्नीध्रश्च विहारयोर्भेदेन उत तन्त्रमिति। तत्र देशभेदप्रयुक्त प्रयोगभेदात् प्रयोगाङ्गभूताः कर्तारोऽपि भेदेन स्युरिति प्राप्ते।

ब्रूमः। चातुर्मास्यानां क्रतूनां "पञ्चर्त्विज "इति विहारद्वयाभि-प्रायवचनात् तन्त्रं ब्रह्मादय इति। अध्वर्युः प्रतिप्रस्थाता च वचनादेव विहारद्वयेव्यवस्थितौ इति॥

(टि) कर्तृष्विदानीं तन्त्रावापौ चिन्त्येते-विहारद्वयेति। न ह्ये-कस्मिन् विहारे पञ्च सम्भवन्ति वचनादेवाध्यर्युप्रति प्रस्थात्रोर्व्यवहितत्वादिति भावः॥

॥ उत्तरदक्षिणविहारयोः पत्नीसंयाजादीनां भेदेनानुष्ठानाधिकरणम् ॥

सू. एकाग्नित्वादपरेषुतन्त्रैःस्यात् ॥

(मू) तत्रैव संशयः-किमापराह्णिकाः पत्नीसंयाजादयः तन्त्रमुतावाप इति। तत्रापरह्णे गार्हपत्यस्य देशस्य मारुतीं प्रति भेदाभावात् तन्त्रमिति प्राप्ते।

ब्रूमः। मारुत्याः कर्तृभेदादावाप इति

(टि) कर्तृभेदादिति। नान्येन कृतान्यङ्गानि अन्येन कुत उपकुर्वन्तीति भावः॥

॥ वाजपेये प्राजापत्यपश्वालम्भशेषस्य ब्रह्मसामकाल उत्कर्षाधिकरणम् ॥

सू. पर्यग्निकृतानामुत्सर्गे प्राजापत्यानां कर्मोत्सर्गः श्रुतिसामान्यादारण्यवत् तस्माद् ब्रह्मसाम्नि चोदनापृथक्त्वं स्यात् ॥

(मू) वाजपेये प्राजापत्यान् पशून् प्रकृत्य श्रूयते-"तान् पर्यग्निकृतानुत्सृजति ब्रह्मसाम्यालभत "इति। तत्रं संशयः किं "तान् पर्यग्निकृतानुत्सृजतीति तदन्ताङ्गरीतिविधानं ब्रह्मसाम्याल्ल (साम्न्याल) भत" इति कर्मान्तरविधिः अथवा "ब्रह्मसाम्न्यालाभेतेति आलम्भोत्कर्षमात्रविधिः "तान् पर्यग्निकृतानुत्सृजतीति उत्कर्षविधानेन पर्यग्निकरणानन्तरं प्राप्तस्य व्यापारोपरमस्यानुवाद इति। तत्र पर्यग्निकरणान्ताङ्गरीतिविधि श्रुतिसामान्यात् तदन्ताङ्गरीतिविधानमालभत इति च कर्मान्तरविधानमिति प्राप्ते। ब्रूमः। अनेकादृष्टकल्पनवाक्यभेदयोः प्रसङ्गात् उत्कर्षमात्रविधिः व्यापारोपरमस्यानुवादश्चेति। तस्मात् पर्यग्निकरणान्ताङ्गजातं न माध्यन्दिने पुनरावर्तनीयं पशवश्च त एव नान्यलाब्धव्या इति सिद्धम्॥

(टि) विचारप्रयोजनमाह तस्मादित्यादिना॥

॥ अहीन उक्ष्णामुत्सर्गस्य कर्मशेषप्रतिषेधार्थताधिकरणम् ॥



विधानप्रयुक्तवाक्यभेदप्रसङ्गात् सङ्ख्याकालविशिष्टकर्मान्तविधिः अङ्गरीतिविधिश्चेति। ततश्च चतुर्षु संवत्सरेषु प्रतिसंवत्सरं चतुस्त्रिंशत्कर्मयुक्तपशुबन्ध इति सिद्धम्॥

(टि) सङ्ख्याकालादीति। पञ्चम इत्युत्तम इति चेत्यादिरादिशब्दार्थः। कर्मान्तरविधिरिति। अनेन प्राजापत्यन्यायसम्भव आरण्यन्यायसम्भवश्च सूचित इति ध्येयम्॥

।। दशपेयाभिषेचनीययोर्भेदेन प्रयोगाधिकरणम् ॥

सू. दशपेये क्रयप्रतिकर्षात् प्रतिकर्षः। ततः प्राचां तत्समानं तन्त्रं स्यात् ॥

(मू) राजसूये अभिषेचनीयो नाम सोमयागः। ततो दशेषु यः ततो दशपेयः सोमयागः। तत्र श्रूयते-सह सोमौक्रीणाति अभिषेचनीयदशपेययोरिति क्वचित् दृश्यते. तत्र संशयः किमयं क्रयप्रतिकर्षः ततश्च तदन्तस्यापकर्षात् अभिषेचनीयदशपेयोः सहोपक्रमेण सहैव समापनीयत्वात् अभिषेचनीयदशपेयौ समानतन्त्रौ अथवा क्रयार्थोपसंवादसाहित्यमिह विधीयते; ततश्चापकर्षाभावात् सहोपक्रमाभावेन सहसमापनीयत्वाभाभात् एतौ दिनतन्त्राविति। तत्र मूल्यदानपूर्वकस्वीकरणस्य क्रीणातेर्मुख्यार्थत्वात् तादृशक्रयाङ्गभूतक्रयप्रतिकर्षः ततश्चोक्तरीत्या समानतन्त्राविति प्राप्ते। ब्रूमः। "सद्यो दीक्षयन्ति सद्यः सोमं क्रीणन्तीति दशपेये श्रूयमाणस्य वचनान्तरस्यानुगुण्यात् गौण्या वृत्त्या क्रयार्थोपसंवादसाहित्यं विधीयते. ततश्चोक्तरीत्या भिन्नोपक्रमावस्थानौ भिन्नातन्त्राभिषेचनीयदशपेयाविति॥ (टि) तदन्तस्यापकर्षादिति। तदन्तमपकर्षे स्यादिति न्ययादिति भावः॥

॥ वारुणीनिष्कासावभृथस्यार्थकर्मताधिकरणम् ॥

सू निष्कासस्यावभृथे तदेकदेशत्वात् पशुवत् प्रदानविप्रकर्षः स्यात् ॥

(मू) चातुर्मास्येषु वरुणप्रघासेषु "मारुत्यामिक्षा वारुण्यामिक्षा भवतीति

वारुण्यामिक्षा श्रुता. तत्र पुनः श्रूयते- "वारुण्यै निष्कोषेण तुषैश्चावभृथं यन्तीति। निष्कोषेण वारुण्यामिक्षा पत्रलिप्तेनामिक्षालेशेन तुषैश्चेत्यर्थः। तत्र संशयः-किं प्रधानस्यामिक्षायागस्य प्रचारविप्रकर्ष उतामिक्षानिष्काषद्रव्यकमवभृथधर्मकं कर्मान्तरमत्र विधीयते; तच्च प्रतिपत्तिरथवार्थकर्मेति। तत्र कृत्स्नस्यामिक्षाद्रव्यस्य वारुणयागशेषभूतस्य कर्मान्तरद्रव्यत्वायोगात् प्रचारविप्रकर्षः अवभृथशब्दस्तु देवतासामान्यनिमित्तको गौण इति चेत्। उच्यीत, अवभृथशब्दानर्थक्यात् अवभृथधर्मकं कर्मान्तरं विधीयते इति। तत्र शेषद्रव्यकत्वात् आमिक्षाशेषस्य प्रतिपत्तिरितीति प्राप्ते।

ब्रूमः। द्वितीयानिर्दिष्ट- स्यावभृथस्य प्राधान्यस्य द्वितीयानिर्दिष्टनिष्काषस्य गुणत्वस्य चापगमात् अर्थकर्मेति वचनाचान्यदीयद्रव्यस्यैकदेशोऽन्यत्र विनियुज्यमानो न दुष्यतीति॥

(टि) प्रचारविप्रकर्ष इति। पशोरिव वपाहृदयादिभिः प्रातस्सवनतृतीयसवनयोरितिभावः। आमिक्षाशेषस्येति। प्रयाजशेषभिधारवदिति भावः॥

॥ प्रायणीयनिष्कास उदयनीयिनिर्वापस्य संस्कारकर्मताधिकरणम्॥

सू. उदयनीये च तद्वत्॥

(मू) ज्योतिष्टोमे प्रायणीयोदयनीयौ, तत्र श्रूयते "प्रायणीयस्य निष्काष उदयनीयमनुनिर्वपतीति। तत्र संशयः किमत्र प्रायणीयनि-ष्कासद्रव्यकं उदयनीयधर्मकं कर्मान्तरं विधीयते उत प्रकरणान्त-रत्वाभावेन कृतार्थस्य उदयनीयनिर्वापसंयोगः प्रतिपत्तिरथवा प्रायणीय-निष्काषो निर्वाप उदयनीयस्य संस्कार इति। तत्र पूर्वन्यायात् उदयनीयधर्मकं कर्मान्तरं विधीयत इति चेत्। उच्यते। मुख्यस्योदयनीयस्य प्रकृतत्वादुक्तरीत्या प्रतिपत्तिरिति प्राप्ते। ब्रूमः। सप्तम्या निष्काषस्य गुणत्वस्य द्वितीयया उदयनीयस्य प्राधान्यस्य चावगमात् संस्कार इति॥



॥ इति एकादशध्यायस्य द्वितीयः पादः॥

(टि) सप्तम्येति। अनेन प्रयाजशेषवैषम्यमुक्तमिति॥

॥ इति केरलीये षोडशाध्यायीटिप्पणे एकादशाध्यायस्य द्वितीय) पादः॥

अथ एकादशाध्यायस्य तृतीयः पादः ॥

॥ वेद्याद्यङ्गानां प्रधानकालान्यकालकर्तव्यताधिकरणम्॥

सू. अङ्गानां मुख्याकालत्वात् वचनादन्यकालत्वम्॥

(मू) पूर्वेद्युरमावास्यायां-"वेदिं करोति अप्स्ववभृथेन चरन्तीति श्रूयते। सौत्रामण्यां "बडवा दक्षिणेति। तत्र संशयः किंवेद्यवभृथसौत्रामणीनां प्रधानकालदेशकर्तृत्वमुतान्यकालदेशकर्तृत्वमिति। तत्र वेद्यादीनामङ्गत्वात् प्रधानकालदेशकर्तृत्वमिति प्राप्ते। ब्रूमः। पूर्वेद्युरिति वचनात् अन्यकालदेशकर्तृत्वमिति। तत्र सौत्रामण्यां दक्षिणाभेदादन्यकर्तृत्वमिति॥

॥ अथैकादशस्य तृतीयः पादः॥

(टि) पूर्वेद्युरिति। सुखप्रतिपत्त्यर्थमिदमधिकरणम्। नात्र निराकार्यमस्ति॥

॥ आधानस्य तन्त्रेणानुष्ठानाधिकरणम्॥

सू. द्रव्यस्य चाकर्मकालनिष्पत्तेः प्रयोगः सर्वार्थः स्यात् स्वाकालत्वात्॥

(मू) अनारभ्य श्रूयते-"वसन्ते ब्राह्मणोऽग्नीनादधीत ग्रीष्मे राजन्यः शरदि वैश्यः इति। तदाधानमाग्निहोत्रादिकर्मणोऽङ्गमिति कृत्वचिन्तेयम्। तत्र संशयः-किमङ्गभूतमाधानं प्रतिकर्म प्रतिप्रयोगं चावाप उत सर्वकर्मणां सर्वप्रयोगाणां च तन्त्रमिति। तत्राङ्गत्वात् प्रयाजादिवदावाप इति प्राप्ते।

ब्रूमः। प्रधानकालान्यस्वकालेऽनुष्ठापितस्य आधानस्या-
गृह्यमाणविशेषत्वात् तन्त्रमिति॥

(टि) प्रयाजादिवादिति। आनन्दर्याद्गृह्यमाणविशेषत्वमिति भावः। प्रधानकालान्येति। अनभिहितकर्मविशेषेण सर्वकर्मोद्देशेन ह्याधानं क्रियते। ततो यस्यकस्यचित् कर्मणोऽनन्तर्यमर्थादापतितमिति तन्मात्रेण तादर्थ्यं भवतीति नानन्तर्याद्गृह्यमाण विशेषत्वमित्यभिप्रायः॥

**॥ अग्नीषोमीयादिषु यूपस्य तन्त्रेणअनुष्ठानाधिकरणम्॥**

**सू. यूपाश्चाकर्मकालत्वात्॥**

(मू) ज्योतिष्टोमे त्रयः पशवः अग्नीषोमीयानुबन्ध्या इति। तत्राग्नीषोमीये उपदिष्टे इतरयोस्त्वतिदिष्टश्चास्ति यूपः। इदं च श्रूयते-"दीक्षासु यूपं छिनत्तीति। तत्र संशयः किं दीक्षास्विति वाक्येनाग्नीषोमी-ययूपस्यैवापकर्षादावापो यूप इति प्राप्ते।

ब्रूमः। आद्यमात्रपकर्षेऽपि प्रधानकालबाधाप्राप्तविधिप्रसङ्गाविशेषात् सर्वयूपापकर्षात् यूपः तन्त्रमिति॥ अत्रेदं बोध्यम्॥ नाध्वरकल्पायां मुख्यत्वमात्रादाद्यनिर्वापमात्रापकर्षः; येनेह तद्वदाद्यमात्रापकर्षः स्यात् किन्त्वप्रधानकालबाधस्य नियमविधेश्च लाभात् तद् द्वयमपि न लभ्यते दीक्षाकालस्याप्राप्तत्वात्। ततश्चाविशेषात् सर्वापकर्षः। तस्माद्यूपोऽ-कर्मकालत्वात् अगृह्यमाणविशेषस्सन् तन्त्रमिति॥

(टि) मुख्यत्वादिति। यथाध्वरकल्पायामाद्यस्यैव निर्वापस्यापकर्षस्तथेति भावः। आवाप इति। अग्नीषोमीये संस्थिते तद्यूपोऽपवृज्यते। तस्मात् सवनीयानूबन्ध्ययोः स्वकालेन भेदेन यूपसङ्ग्रहःकर्तव्य इत्यर्थः। प्रधानकालबाधाप्राप्तविधिप्रसङ्गादिति। प्रधानकालबाधस्याप्राप्तविधेश्च प्रसङ्गादित्यर्थः। अतो नाध्वरल्पन्याय इति भावः। तमेवाह अत्रेदमित्यादिना॥

**॥ यूपसंस्काराणां तन्त्रेणानुष्ठानधिकरणम्॥**

**सू. संस्कारस्त्वावर्तेरन्नर्थकालत्वात्॥**

(मू) यूपसंस्कारेषु तक्षणादिषु संशयः-किमेषां तन्त्रत्वामथावृत्तिरिति।



तत्र छेदनमात्रस्यापकर्षविधानादन्येषां पशुकालानां गृह्यमाणविशेषाणामावृत्तिरिति प्राप्ते।

ब्रूमः। यूपस्य तन्त्रत्वात् तत्संस्काराणामपि तन्त्रत्वमिति। अत्र "यूपान् छिनत्तीत्यस्य यूपं सन्तं छिनत्तीति नार्थः यूपस्य प्रागसिद्धेः; किन्तु छेदनेन यूपं कुर्यादिति। ततश्च छदनमात्रेण यूपानिष्पत्तेः छेदनग्रहणमुपलक्षणम्। ततश्च छेदनादिभिः संस्कारैः यूपं कुर्यादित्यर्थः। तस्मात् सर्वसंस्काराणामपकर्षात् नावापशङ्कापीति।

(टि) आवृत्तिरिति। तक्षणजोषणप्रोक्षणादीनीमग्नीषोमीयकालकृतानां तदपवर्गेऽपवर्गात् सवनीयादौ पुनः प्रयोग इत्यर्थः। छेदनमात्राप-कर्षमभ्युपेत्याह-युपस्येत्यादिना। वास्तवमाहात्रेत्यादिना॥

**॥ स्वरोस्तन्त्रेणानुष्ठानाधिकरणम्॥**

**सू. स्वरुस्तन्त्रापवर्गः स्यादस्वकालत्वात्॥**

(मू) अस्ति स्वरुः-"यूपं स्वरुं करोतीति। तथा यः प्रथमशशकलः परापतेत् स तु स्वरुः यूपः कार्य इति। तत्र संशयः-किं स्वरुः प्रतिपश्वावापः उत एकयूपानां पशूनां यूपस्यैकत्वात् यूपप्रथमशकलस्वरुरेकः-सन् तन्त्रमिति। तत्र स्वरोरञ्जनार्थत्वात् अञ्जनवदावाप इति प्राप्ते।

ब्रूमः। यूपकालोत्पन्नस्य यूपवदगृह्यमाणविशेषत्वात् उक्तरीत्या तन्त्र स्वरुरिति॥

(टि) अञ्जनवदावाप इति। अयमाशयः-यद्यपि यूपच्छेदनकाले स्वरुरुत्पन्नस्तथापि अञ्जनकालेऽस्योपादानां न पूर्वं कारणाभावात्। ततश्चाग्नीषोमीयाञ्जनकाल उपात्तस्य तदपवर्गेऽपवर्गात् गृह्यमाणवि-शेषत्वाच्च पश्वन्तराञ्जनकाले अन्यशकलोपादानं यः प्रथमः शकल इति चैकस्मिन् प्रहरणे यः प्रथम इति शास्त्रार्थः। ततश्चैकस्मिन्नपि यूपे प्राहरणबहुत्वात् सम्भववन्ति बहवः प्रथमशकला इति युपकालोत्पन्नस्यैव यूपच्छेदनकाल एवास्य व्यामोहपरिहारार्थं नाशापहारादिपरहिारार्थं चोपादानं कर्तव्यं नाञ्जनकाल

इत्यगृह्यमाणविशेषत्वमित्यभिप्रायः। किञ्च न प्रहरणापेक्षं प्राथम्यं प्रहरणस्यानुपात्तत्वात्। अतःशकलमात्रापेक्षं प्राथम्यमित्येकस्मिन् यूपे एक एव प्रथमशकल इत्यतोऽपि तन्त्रत्वमिति॥

**॥ अहर्गणे कृष्णविषाणाप्रासनस्यान्त्याहनियमाधिकरणम्॥**

**सू. अहर्गणे विषाणआप्रासनं धर्मविप्रतिषेधात् अल्ये प्रथमे वाहनि विकल्पः स्यात्।**

(मू) ज्योतिष्टोमे दीक्षितव्रतमाम्नातं "कृष्णविषाणया प्रास्यतीति तथा नीतासु दक्षिणासु चात्वाले कृष्णविषाणां प्रास्यतीति।" तत्र प्रासनोत्तरकालपदार्थानां पाणिकण्डूयनं धर्मः प्रासनपूर्वकालानां तु कृष्णविषाणा कण्डूयनं, तच्च द्विरात्रादिष्वहर्गणेषु चोदकप्राप्तम्। तत्र सशयः-किं प्रथमेऽन्त्ये वाहनि कृष्णविषांणाप्रासनमिति विकल्प उतान्य (न्त्य) एवेति। तत्र पक्षद्वयेऽपि पाणिकृष्णविषाणाकण्डूयन धर्मान्यतरबाधस्यावश्यकत्वात् विकल्प इति प्राप्ते। ब्रूमः। अन्त्येऽहनि प्रासने अर्थप्राप्तशास्त्रीय पाणिकण्डूयन बाधेऽपि शास्त्रीयधर्मबाधाभावात् अन्येऽहन्येव कृष्णविषाणाप्रासनमिति॥ (टि) पक्षद्वयेऽपीति। नहि सत्यां कृष्णविषाणायां पाणिकण्डूयनं सम्भवति प्रक्रान्तनियमत्यागे शिष्टाचार विरोधादिति भावः॥

**॥ राजसूये नानाबीजेषु वाग्विसर्गस्य चरमकालनिय-माधिकरणम्॥**

**सू. वाग्विसर्गो हविष्कृता बीजभेदे तथा स्यात्॥**

(मू) दर्शपूर्णमासयोः श्रूयते-"प्रणीताः प्रणेष्यन् वाचं यच्छति तां सहविष्कृता वाचं विसृजतीति। अपः प्रणेष्यन् वाचं यच्छति सहविष्कृता विसृजतीति तु क्वचिद् दृश्यते। राजसूये नानाबीजेष्टि ः श्रूयते-"अग्नये गृहपतये पुरोडाशमष्टाकपालं निर्वपति कृष्णानां व्रीहीणां सोमाय वनस्पतये श्यामाकं चरुं सवित्रे सत्यप्रसवाय पुरोडाशं द्वादशकपालं आशूनां व्रीहीणां रुद्राय पशुपतये गावीधुकं चरंबृहस्पतये वाचस्पतये नैवारं चरुमिन्द्राय ज्येष्ठाय पुरोडाशमेकादशकपालं महाव्रीहीणां मित्राय सत्यायाम्बानां चरुं वरुणायधर्मपतये यवमयं चरुमिंति क्वचित् पाठभेदो दृश्यते। तत्र प्रकृतौ



हविष्कृदाह्वानकालाद्ये प्राञ्चः कृष्णाजिनास्तरणादिपदार्थाः तेषां वाग्यमो धर्मः ये तु प्रत्यञ्चः परावर्तनादयः तेषां वाग्निसर्गो धर्मः। तौ चात्र चोदकप्राप्तौ। कृष्णाजिनास्तरणादिना फलीकरणान्तेन चावघातानुसमयः नानाबीजेषु च एकमुलूखलं, ततश्च कृष्णाजिनास्तरणादिकं तन्त्रं हविरावपनादीनां चावृत्तिः। एवं स्थिते संशयः-किं प्रथमस्यान्त्यस्य वा बीजस्य हविष्कृत्काले वाग्विसर्ग इति विकल्पः उतान्त्यस्यैवेति। तत्र पूर्ववत् प्रथमं विसर्गे उत्तरबीजानां हविरावपनादीनां धर्मस्य अन्तिमे विसर्गे पूर्वबीजानां परावर्तनादीनां धर्मस्य च बाधस्यावश्यकत्वात् विकल्प इति प्राप्ते।

ब्रूमः। अशास्त्रीयवाग्विसर्गबाधेऽपि शास्त्रीयधर्मबाधाभावात् अन्त्यस्यैव बीजस्य हविव्कृत्काले वाग्विसर्ग इति। अत्र विसृजतीति वचनात् वाग्विसर्गस्य शास्त्रीयत्वशङ्कापागम विधीरपेक्षितावधेरवधिरनेनोच्यते तदेकवक्यत्वात्। वाग्विसर्गविधौ तु वाक्यभेदप्रसङ्गात्। तस्मान्न वाग्वि सर्गस्य शास्त्रीयत्वमित्युत्तरमिति॥ (टि) गतार्थत्वमाशङ्क्याह अत्रेत्यादिना॥

**॥ अग्नीषोमीये पौरोडाशिककाल एव वाग्विसर्गाधिकरणम्**

**सू. पशौ च पुरोडाशे समानतन्त्रं भवेत्॥**

(मू) अग्नीषोमीये पशौ पशुपुरोडाशोऽस्ति। तत्र चास्ति हविष्कृदाध (हा) नम्। तत् पशावप्यस्तीति कृत्वाचिन्तेयम्। तत्र संशयः-किं प्रथमे पाशुकहविष्कृत्काले वा उत्तरे पौरोडाशिकहविष्कृत्काले वा वाग्निसर्ग इति विकल्प उत पौरोडाशिकहविष्कृत्काल एवेति नियम इति।

**तत्र पूर्ववदेव पूर्वपक्षन्यायात् विकल्प इति प्राप्ते।**

ब्रूमः। पूर्ववदेव उत्तरपक्षन्यायान्नियम इति। अत्र प्रासङ्गिकत्वात् पाशुकेन वाग्यमेन पुरोडाशस्य कार्यसिद्धेः न पुरडाशे वाग्यमेन कार्यमस्तीति शङ्का। न चायं वाग्यमः आरादुपकारकः किन्तु कर्तृसंस्कारः। तस्माद्विसृष्टवाचा क्रियमाणा निर्वापादयः पौरोडाशिकपदार्था अपिगुणा भवेयुः इति पौरोडाशिकहविष्कृत्काले

वाग्विसर्ग इत्युत्तरमिति।
(टि) आरादुपकारकारकाणामेव प्रासङ्गिकत्वमित्याशयेनाह नचेत्यादि॥

॥ अग्निचयनेऽग्निविमोकस्य मतभेदे व्यवस्थाधिकरणम्॥

सू. अग्नियोगः सोमकाले तदर्थत्वात् संस्कृतकर्मणः परेषु साङ्गस्य तस्मात् सर्वापवर्गे विमोकः स्यात्॥

(मू) अग्नौ श्रूयते-"अग्निं युनज्मि शवसा घृतेनेति जुहोति अग्निमेवैतद्युनक्ति पञ्चभिर्युनक्ति पाङ्क्तो यज्ञ " इति अग्नियोगः, तथा "इमं स्तनं मधुमन्तं धयामीत्याज्यस्य पूर्णां स्रुचं जुहोति" एष वां आग्नेर्विमोक "इति अग्निविमोकः। तत्र संशयः किमङ्गप्रधा-नार्थोऽग्नियोगः ततः सर्वापवर्गोऽग्निविमोकः उत प्रधानार्थाऽग्नियोगः ततः प्रधानापवर्गेऽग्निविमोक इति। तत्राग्नेरङ्गप्रधानार्थत्वात् अग्निसंस्कारोऽग्नियोगः अङ्गप्रधानार्थः ततः सर्वापवर्गे अग्निविमोक इति प्राप्ते।

ब्रूमः। अग्नियोगस्य "पाङ्क्तो यज्ञ" इति वाक्यशेषेण प्रधानभूतयज्ञार्थत्वावगमात् प्रधानार्थोऽग्नियोगः ततः प्रधानापवर्गे अग्निविमोक इति। एवं भाष्यकारमतम्। वाक्यशेषेण यज्ञार्थत्वावगमात् प्रधानार्थोऽग्नियोगः प्रधानापवर्गे अग्निविमोक इति प्राप्ते।

ब्रूमः। अग्नेः सर्वार्थत्वात् अङ्गप्रधानार्थोऽग्नियोगः। ततः सर्वापवर्गे अग्नि वियोग इति। एवं विपर्ययेण पूर्वोत्तरपक्षाविति वार्तिककारमतमिति॥

(टि) वार्तिककारमतमिति। अयमत्राचार्याशयः-सङ्ख्यागुणविधौ श्रुतो वाक्यशेषो न यागोत्पत्तिवाक्यावगतं सर्वार्थत्वमलं बाधितुमिति॥

॥ उपसत्कालस्य सुब्रह्मण्याह्वानस्य तन्त्रेणानुष्ठानाधिकरणम्॥

सू. सुब्रह्मण्या तु तन्त्रं दीक्षावदन्यकालत्वात्॥

(मू) ज्योतिष्टोमे ऽस्त्युपसत्काल सुब्रह्मण्याह्वानम्। तच्चाह र्गणेषु प्राप्तम्। तत्र संशयः किं तदावाप उत तन्त्रमिति।



तत्र प्रधानभेदादावाप इति प्राप्ते, ब्रूमः। अकर्मक (का) त्वादगृहीतविशेष सुब्रह्मण्याह्वानं तन्त्रमिति। उत्तरविवक्षार्थमिदम्॥
(टि) यूपच्छेदन्यायेन गतार्थतामस्याशङ्क्याह-उत्तरविवक्षार्थमिति॥

॥ सुत्याकालीनसुब्रह्मण्याह्वानस्य भेदेनानुष्ठानाधिकरणम्॥

सू. तत्कालाहत्वावर्तेत प्रयोगतो विशेषसम्बन्धात्॥

(मू) अस्ति ज्योतिष्टोमे सुत्याकालं सुब्रह्मण्याह्वानम्। तत् किमह-र्गणेषु तन्त्रमावापो वेति संशयः। तत्र "आद्यसुत्यामागच्छे त्यत्र आद्येत्यस्याविवक्षितत्वात् तन्त्रमिति प्राप्ते। ब्रूमः। कर्मकालत्वात् गृह्यमाणविशेषं सुत्याकाल सुब्रह्मण्याह्वानमावाप इति॥
(टि) अविवक्षितत्वादिति। प्रकृतौ सुत्यैकत्वादिति भावः। एवं च यूपाहुतिवत्तन्त्रमिति। गृह्यमाणेति। ततश्च तदपवर्गे तत्कृतस्य देव तासंस्कारस्यापवर्गादहरन्तरे पुनः कर्त व्यमित्यर्थः॥

॥ देशपात्रर्त्विजान्यप्रयोगे पूर्वदेशाद्यादनस्य ऐच्छिकताधिकरणम्॥

सू. लौकिकेषु यथाकामी संस्कारानर्थलोपात्॥

(मू) समादिदेशेषु ऋत्विक्षु स्रुवादिषु पात्रेषु च संशयः किं देशादीनां प्रतिप्रयोगमन्ये षामन्येषां उपादानमुत पुर्वोपयुक्तानां अनुपयुक्तानां वोपादानमित्यनियमः। तत्र शिष्टैरुपयुक्तोपादानवर्जना दन्येषामन्येषामुपादा नमिति प्राप्ते।

ब्रूमः। अत्र शिष्टैरूपयुक्तोपादानावर्जनादनियम इति॥

(टि) अनियम इति। "ऋत्विगाचार्यौ नातिचरितव्या विति तु पुरुषधर्मः न तु कर्मधर्म इति भावः॥

॥ पात्राणां तन्त्रस्य नियमाधिकरणम्॥

सू. यज्ञायुधानि धार्येरन् प्रतिपत्तिविधानादृजीषवत्॥

(मू) स्रुवादिषु पात्रेषु चिन्त्यते। इदं श्रुयते- "आहिताग्निमग्निभिर्दहति यज्ञपात्रैचेति। तथा" दक्षिणे पाणौ जुहूमासादयति "इत्यादि। क्वचित् "हस्त" इति दृश्यते। तत्र संशयः किं परिधानीये कर्मणि पात्राणां गुणभावः,

ततश्च नियामकाभावात् पात्रेष्वपि देशादिकर्तृवदनियम उत पात्राणां गुणभावेऽपि प्रथमप्रयोगोपयुक्तानां पात्राणां आमरणाद्धारणं, धारितेषु च तेषु तैरेव सर्वप्रयोगसिद्धेः नान्योपादानमिति नियमः अथवा परिधानीये कर्मणि पात्राणां प्रतिपत्तिः ततश्च प्रतिपत्तिर्मा लोपीत्यामरणात् पात्राणां धारणम्। तस्मात् सर्वकर्मणां सर्व प्रयोगाणां तन्त्रं पात्राणीति। तत्र यज्ञपात्रैरिति तृतीयानिर्देशात् यजमानशरीरसंस्करार्थे... यहे कर्मणि पात्राणां गुणभावः। ततश्चोक्तरीत्या देशादिवदेवनियम इति चेत्। उच्यते। पूर्वोपयुक्तेषु त्यक्तेषु उत्तरप्रयोगकाले अनागते यजमानमरणे प्रसक्ते यज्ञपात्राभाव प्रयुक्त दाहवैगुण्यप्रसङ्गात् पात्राणां गुणभावेऽपि उक्तरीत्या नियम इति स्थितेऽन्तराचिन्ता।

तत्र धारणे संशयः-किं पौर्णमास्या आरभ्य धारणं उत पवमानेष्टिभ्य इति। तत्र प्रकृतौ प्रथमं पात्राणां प्राप्तेः पौर्णमास्यां आरभ्य धारणमिति प्राप्ते।

ब्रूमः। पावमानेष्टिभ्य आरभ्य पात्राणां धारणं अन्यथा पवमा नेष्ट्यनन्तरं पौर्णमास्याः प्राक् यजमानमरणे यज्ञापात्राभाव प्रयुक्ताहिताग्निदेहदाहसंस्कारलोपप्रसङ्गादिति॥

(टि) गुणभाव इति। तेनाभिनवैरपि पात्रैर्दुह्यमाने नास्ति कस्यचिद्वैगुण्यमिति भावः। यज्ञपात्रशब्देन यज्ञोपयुक्तानि पात्राण्युच्यन्ते न तु स्वरूपमात्रमित्याशयेन सिद्धान्तैकदेश्याह-पूर्वोपयुक्तेष्वित्यादिना। प्राप्तेरिति। तत्रैवोपदेशादिति भावः॥

**॥ पात्राणामाधानमारभ्य धारणनियमाधिकरणम्॥**

**सू. प्रकृत्यर्थत्वात् पौर्णमास्याः क्रियेरन्॥**

(मू) स्थितादुत्तरम्-जुहूमित्यादिद्वितीयानिर्देशात् पात्राणां प्रतिपत्तिः आमरणाद्धारणं तन्त्रं च पात्राणीति॥

(टि) प्रतिपत्तिरिति। यद्यप्याभिनवैर्न दाहस्य वैगुण्यं तथापि प्रतिपत्तिलोपः स्यादिति भावः॥

**॥ सर्वसोमानामुपरिष्टात् प्राजापत्यप्रचाराधिकरणम्॥**

**सू. उपरिष्टात् सोमानां प्राजापत्यैश्चरन्तीति**



**सर्वेषामविशेषादवाच्यो हि प्रकृतिकालः॥**

(मू) वाजपेये प्राजापत्यान् पशुन् प्रकृत्य श्रुयते-उपरिष्टात् होमानां प्राजापत्यैश्चरन्तीति। तत्र संशयः-किमार्भवकाले प्राजापत्मानां प्रचार उत शस्त्रवतां सोमानामुपरिष्टात् अथवाग्निष्टोमप्रचारादूर्ध्वं किं वा सर्वसोमानामुपरिष्टादिति।

तत्र चोदकानुग्रहनार्भवकाले प्रचार इति चेत्। उच्यते। वचनानुग्रहस्य प्राकृतकालप्रत्यासत्तिकृत चोदकानुग्रहस्य च लाभात् शस्त्रवतां सोमानामुपरिष्टात् प्रचार इति। अत्रोच्यते। अग्निष्टोमप्रचारानन्तर स्थानस्यागन्तुकविकारस्थानत्वात् आगन्तूनां विकाराणां प्राजापत्यानां अग्निष्टोमप्रचारादूर्ध्वं प्रचार इत्येवं प्राप्ते, ब्रूमः। वचनस्य विशेषप्रवृत्तत्वात् सर्वसोमानामुपरिष्टात् प्राजापत्यानां प्रचार इति। अग्निष्टोमप्रचारादूर्ध्वं हि सोमविकारणां स्थानं न पशुविकाराणामिति बोध्यम्॥

(टि) बोध्यमिति। आर्भवकालप्रचारे क्रतुपशूनां प्राजापत्यानां चैककालत्वान्मनोतासुक्तं तन्त्रं, सिद्धान्ते तु कालभेदादावाप इति सङ्गतिः॥

**॥ सवनीयपुरोडाशे देवतोत्कर्षाधिकरणम्॥**

**सू. उत्कर्षो सूक्तवाकस्य न सोमदेवतानामुत्कर्षः पश्वनङ्गत्वात्, यथा निष्कर्षेऽनन्वयः॥**

(मू) सवनीयपशौ प्राकृतसूक्तवाकस्य विकृतस्य पाठः। तत्र च सवनीयपुरोडाशदेवताः कीर्त्यन्ते "भृज्यन्निन्द्राय हरिवते धाना" इत्यादि। सूक्तवाकश्चानूयाजोत्कर्षात् आग्निमारुतादूर्ध्वमुत्कृष्टः पाशुकतन्त्रस्य पुरोडाशेषु प्रसङ्ग इति वक्ष्यते। तत्र संशयः-किं सूक्तवाके उत्कृष्यमाणे पुरोडाशदेवतापदानां हरिवदिन्द्रादीनामुत्कर्षः उतानुत्कर्ष इति।

तत्र प्रासङ्गिकं नोत्कर्षेदिति "न्यायात् अनुत्कर्ष प्राप्ते।

ब्रूमः "अग्निमद्य" होतेत्यादिपाशुकोत्कृष्यमाणतन्त्रपदापेक्षत्वात् हरिवदिन्द्रादिपुरोडाशदेवतापदानामप्युत्कर्ष इति॥

**॥ इति एकादशाध्यायस्य तृतीयः पादः॥**

(टि) उत्कर्षप्रसङ्गादिदमारभ्यते-सवनीयेति ॥

**॥ इति केरलीये षोडशाध्यायीटिप्पणे**
**एकादशाध्यायस्य तृतीयः**
**पादः समाप्तः ॥**

**॥ अथ एकादशाध्यायस्य चतुर्थः पादः ॥**

**राजसूये सोमापौष्णादिके ऽङ्गानां भेदेनानुष्ठानाधिकरणम्**

**सू. चोदनैकत्वाद् राजसूयेनुक्तदेशकालानां समवायात्तन्त्रमङ्गानि ॥**

(मू) राजसूये यान्यनुक्तदेशकालानि दक्षिणाभेदवन्ति सोमापौष्ण एकादशकपाल ऐन्द्रापौष्णश्चरुः पौष्णश्चरुः श्यामो दक्षिणा आग्नावैष्णव एकादशकपाल ऐन्द्रावैष्णव एकादशकपालो वैष्णवस्त्रिकपालो मनो दक्षिणेति क्वचित् पाठभेदो दृश्यते।

तत्र संशयः किमेवञ्जातीयकेषु तन्त्रमङ्गानि उत प्रतिदक्षिणं तन्त्रभेद इति। तत्र देशकालफलकर्तृणामभेदात् तन्त्रमङ्गानीति प्राप्ते। ब्रूमः। दक्षिणाभेदप्रयुक्तानतिभेदकृतकर्तृस्वरूपभेदात् प्रतिदाक्षिणं तन्त्रभेद इति। श्यामनतैर्हि पूर्वं कर्मवामनानतैरूत्तरं, तद्य यद्युभाभ्यामानता उभयं कुर्युः तर्हि दक्षिणाव्यवस्था श्रूयमाणा बाध्येत। तस्मान्न तन्त्रमिति बोध्यम् ॥

॥ श्रीः ॥

**॥ अथ एकादशस्य चतुर्थः पादः ॥**

(टि) अभेदादिति। नच दक्षिणाभेदात् कर्तृभेदः। शक्यते हि तेभ्य एव कर्तृभ्यो ऽन्यानि (कर्माणि चान्या) चान्यानि च दक्षिणा दातुमिति भावः ॥

**॥ राजसूये कर्तुस्तन्त्राधिकरणम् ॥**

**सू. अनियमः स्यादिति चेत् ॥**

(मू) प्रतिदक्षिणकर्तृरूपभेद इत्युक्तम्। तत्र संशयः-किं राजसूये ऋत्विग्वरणं प्रतिकर्मावापः ततश्चाविशेषात् ये पूर्वं प्रवृत्ताः ते वान्ये वा कर्तारः स्युः इत्यनियम उत सर्वकर्मणामृत्विग्वरणं तन्त्रं ततश्च ये पूर्वं प्रवृत्ताः त एव आराजसूयसमाप्तेः कर्तारः स्युरिति। तत्र दक्षिणाभेद्रात् भिन्नानां



प्रयोगानामङ्गभूतवरणमावापः ततश्चाविशेषादनियम इति प्राप्ते।

ब्रूमः। फलार्थिना एकफलस्य कृत्स्नस्य राजसूयस्य युगपच्चिकीर्षितत्वात् चिकीर्षितसिद्धये क्रियमाणं सहायवरणात्मकमृत्विग्वरणं अगृह्यमाणविशेषं सत् तन्त्रं स्यात्। ततश्च पूर्वं प्रवृत्ता एवाराजसूयसमाप्तेः कर्तार इति। इदं त्ववधेयम्-अङ्गभूतस्य वरणस्य भेदः लौकिकस्य तु तन्त्रत्वमिति ॥

(टि) अत्ता (कर्ता) र इतीति। ननु सत्येकफलत्वे देशकालकर्तृणां भेदात् इष्टिपशुसोमानां भिन्ना एव प्रयोगाः। भिन्नेषु च प्रयोगेषु यस्मिन् कर्मणि प्रयुयुक्षिते वरणमनुष्ठितं तदर्थमेव तदिति विशेषग्रहणान्न तन्त्रत्वं न ह्यकर्मकालं यूपच्छेदनवत् प्रकृतावृत्विग्वरणं येन तन्त्रं स्यात्। कर्मकालत्वे तु भेदात् पौर्णमास्यमावास्ययोरिव सत्यप्येकफलत्वे भेदेनैव वरणमित्यत्राहेदं त्वित्यादिना ॥

**॥ अवेष्टावङ्गानां भेदाधिकरणम् ॥**

**सू. अवेष्टौ चैकतन्त्र्यं स्याल्लिङ्गदर्शनात् ॥**

(मू) राजसूये ऽवेष्टिनमिष्टिराम्नायते- "आग्नेयमष्टाकपालं निर्वपति हिरण्यं दक्षिणैन्द्रमेकादशकपालमृषभो दक्षिणा वैश्वदेवं चरुं पिशङ्गी पष्ठौही दक्षिणा मैत्रावरुणीमामिक्षां वशा दक्षिणा बार्हस्पत्यं चरूं शितिपृष्ठो दक्षिणेति"। सा च "ईश्वरो वा एष दिशोऽनून्मदितोर्यद्दिशोऽनु व्यवस्थापयन्ति दिशामवेष्टयो भवन्ति. दिक्ष्वेव प्रतितिष्ठत्यनुन्मादायेति स्तूयमाना राजसूयान्तर्भूता। तथास्या राजसूयाद्बहिः प्रयोगो दृश्यते। "यदिब्राह्मणो यजेत बार्हस्पत्यं मध्ये निधायाहुतिमाहुतिं हुत्वाभिघारयेत् यदि राजन्य ऐन्द्रं; यदि वैश्यो वैश्वदेवमिति। तत्र फलापेक्षायां श्रूयते- "एतयान्नाद्यकामं याजयेदिति। तत्र काम्ये बहिःप्रयोगे मध्ये नि धानवचनसामर्थ्यात् वीप्सासामर्थ्यादेतयेत्येकवचनसामर्थ्याच्च पञ्चानां हविषां समान तन्त्रत्वमिति निस्संशयम्। उत्पत्तौ च दक्षिणाभेदात् नानातन्त्रत्वं गम्यते। तत्र क्रत्वन्तर्भूतानां पञ्चानां हविषां किं समानतन्त्रत्वमुत नानातन्त्रत्वमिति संशयः।

तत्र बहि:प्रयोगे मध्येनिधानविधानसामर्थ्यात् अन्त:प्रयोगे ऽपि समानतन्त्रत्वमिति प्राप्ते।

ब्रूम:। उत्पत्तौ दक्षिणाभेदश्रवणसामर्थ्यात् क्रत्वन्त: प्रयोगे नानातन्त्रत्वमिति॥

इदमवधेयम्-अन्त: प्रयोगे दक्षिणाभेदात् नानातन्त्रत्वान्मध्ये-निधानविधानादिकस्य बहि: प्रयोगे चरितार्थत्वात्। अत एव बहि: प्रयोगे समानतन्त्रदक्षिणाभेदस्यान्त: प्रयोगे चरितार्थत्वादिति॥

(टि) द्वितीये कर्मभेद: प्रयोगभेदो वेति पक्षद्वयमवेष्टावुक्तम्। तत्र प्रयोगभेद पक्ष इदानीं तन्त्रभेदाभेदौ चिन्त्येते। तत्र फलापेक्षायामिति। क्रतुमध्ये प्रयोगस्य तु स्वाराज्यमेव फलमिति भाव:। मध्ये निधानविधानसामर्थ्यादिति। अयमाशय:-क्रतुमध्ये हीयमुत्पन्ना। तत्र यदि दक्षिणाभेदान्नानातन्त्रत्वं तदा यथोत्पत्त्येव बहिरपि प्रयोक्तव्येति तत्रापि नानातन्त्रत्वं स्यात्। तथा च मध्ये निधानमनुपपन्नं स्यात्। अतो मध्येऽपि समानतन्त्रत्वम्। दक्षिणाभेदस्तु तत्तत्प्रधानाभिप्रायेण नेय इति। कर्मभेदपक्षे तु चोदकेन दक्षिणाभेदप्राप्ति: क्रत्वर्थाया विकृति: काम्येति। एतच्चाचार्यै: द्वितीय एव ध्वनितम्। तथाहि तत्रोक्तं कर्मान्तरे च बार्हस्पत्यादिलिङ्गदर्शनात् प्रकृतावेष्टिप्रकृतित्वमेव प्रतिपत्तव्यमिति। नानातन्त्रत्वे कथं मध्ये निधानमित्यत्राह-इदमित्यादिना॥

**॥ पवमानेष्टिहविषां भेदेनानुष्ठानाधिकरणम्॥**

**सू. पवमानहवि:ष्वैकतन्त्र्यं प्रयोगवचनैकत्वात्॥**

(मू) सन्त्याधाने पवमानहवींषि- "अग्नये पवमानायाष्टाकपालं निर्वपेत् अग्नये पावकायाग्नये शुचय" इति। तान्यधिकृत्य श्रूयते-"सर्वाणि सह निरूप्याणीति, तथा" "यं कामयेतोत्तरं वसीयान् श्रेयान् स्यादिति तस्याअग्नये पवमानाय निरूप्याथाग्नये पावकाय शुचये हविषा समानबर्हिषि निर्वपेत्" इति। तत्र काम्ये प्रयोगे संशय: किं त्रीण्यपि समानतन्त्राणि अथवा प्रथमं भिन्नतन्त्रं उत्तरद्वयं च समानतन्त्रमिति तत्राह्नो निरूप्याणीति प्रयोगवचनैक्यात् समानतन्त्राणीति प्राप्ते।



ब्रूम:। "य: कामयेतेत्यादिवचनात् प्रथमं भिन्नतन्त्रं उत्तरद्वयं च समानतन्त्रमिति॥

(टि) प्रयोगवचनैक्यादिति। "य:कामयेतेति" वचनेन प्रयोगभेदे वस्वर्थत्वे च विधीयमाने वाक्यभेद: स्यादिति भाव:। न हविषां कामे विधि:; किन्तु तदाश्रित्य प्रयोगभेदाख्यस्य गुणस्य केवलस्य दध्यादिवत् कामे विधिरिति न वाक्यभेद: इत्याशयेनाह य:कामयेतेत्यादिना। प्रथममिति। तस्माद्वसुमत्तरत्वं कामयमान: प्रथमं पृथङ्निरूप्य पश्चादुत्तरे समानतन्त्रे कुर्यादित्यभिप्राय:॥

**॥ द्वादशाहे दीक्षोपसत्सुत्यानां प्रत्येकस्य द्वादशाहताधिकरणम्**

**सू. द्वादशाहे तत्प्रकृतित्वादेकैकमहरपवृज्येत कर्मपृथक्त्वात्॥**

(मू) द्वादशाहे श्रुयते-"द्वादशदीक्षा द्वादशोपसद" इति। तत्र संशय:-किं द्वादशानामह्नां प्रत्येकं दीक्षाणामुपसदां च चोदकेन प्राप्ति:। तत्र च प्राकृती संङ्ख्या प्रत्यक्षश्रुतया द्वादशसङ्ख्यया बाध्येत।ततश्च एकैकमह: पृथक्पृथक् द्वादशसङ्ख्यया बाध्येत। ततश्च एकैकमह: पृथक्पृथक् द्वादशदीक्षोपसद्युक्तं निर्वर्त्यं द्वादशस्वहस्सु द्वादशसाद्यस्क्रा: कार्या: अथवा आसुत्याकालान्यङ्गानि दीक्षादीनि तन्त्रं द्वादशाहेनेति तु गुणविधिरेव। स च काल: साङ्गप्रधानविषय एव। ततश्च दशस्वहस्सु द्वादशानां दीक्षाणं द्वादशानामुपसदां द्वादशानां सुत्यानां च सम्पादनीयत्वात् चतुरहे दीक्षा चतुरहे चोपसद: चतुरहे सुत्याश्च। तत्राप्येकैकस्मिन्नहनितिस्रस्तिस्रो दीक्षोपसत्सुत्याश्च कर्तव्या इति सहप्रयोग:; आहोस्वित् द्वादशाहशब्दो नामधेयं न गुणविधि: दीक्षा उपसदश्च तन्त्रमेव। ततश्च द्वादशदीक्षा द्वादशोपस द इति विधानात् द्वादशस्वहस्सु कर्तव्या:। ततश्च दीक्षोपसत्सुत्यानां स्वस्थानविवृद्धि: द्वादशस्वहस्सु दीक्षा:। ततो द्वादशसूपसद: ततो द्वादशसु सुत्या इत्येवं षट्त्रिंशदह इति।

तत्रैकैकस्याहो ज्योतिष्टोमप्रकृतिकत्वात् उक्तरीत्या द्वादशपञ्चविंशतिरात्रा: कर्तव्या इति चेत्, उच्यते। तत्र

श्रुत्यर्थविधिलाभात् द्वादशाहेनेत्याद्युक्तरीत्या द्वादशाह साद्यस्कः कार्या इति। अत्रोच्यते। एकेन वाक्येनैकस्मिन् प्रयोगे विनियुक्तानां सहकर्तव्यत्वावगमात् असुत्याकालानीत्याद्युक्तरीत्या सहप्रयोग इत्येवं प्राप्ते। ब्रूमः। "द्वादशाहेन यजेतेति यजिसामानाधिकरण्यात् द्वादशाहशब्दो नामधेयमित्याद्युक्तरीत्या षट्त्रिंशदहो द्वादशाह इति। प्रधानकालनिमित्तं च द्वादशाहनामधेयमिति बोध्यमिति॥

(टि) पञ्चविंशतिरात्रा इति। द्वादशाहशब्दस्य नामत्वादविरोध इति भावः॥

॥ प्रधानैरपृथक्कालानामङ्गानां भेदेनानुष्ठानाधिकरणम्

सू. भेदस्तु तद्भेदात् कर्मभेदः प्रयोगे स्यात्तेषां प्रधानशब्दत्वात्॥

(मू) यानि सुत्याकालान्यङ्गानि सवनीयपश्वादीनि तानि किं द्वादशाहे द्वादशानां यागानां तन्त्रमुतावाप इति संशयः। तत्र प्रयोगैक्यात्तन्त्रमिति प्राप्ते।

ब्रूमः। प्रधानकालानां सवनीयपश्वादीनां यद्यत् प्रधानकाले ऽनुष्ठितं तत्तत् प्रधानाङ्गमिति गृह्यमाणविशेषत्वादावाप इति॥

(टि) गृह्यमाणेति। ततश्च तत्प्रधानापवर्गे तस्यापवर्गादन्यस्मिन्नहनि प्रधानान्तरार्थं पुनः करणेन भवितव्यमित्यभिप्रायः॥

॥ उपसत्काले सुब्रह्मण्याह्वानस्याविकारेण कर्तव्यताधिकरणम्॥

सू. सुत्याविवृद्धौ सुब्रह्मण्यायां सर्वेषामुपलक्षणं प्रकृत्यन्वयादावाहनवत्॥

(मू) ज्योतिष्टोमे उपसत्कालं सुब्रह्मण्याह्वानं श्रूयते- "इत्यहे सुत्यामागच्छ मघवन्निति ब्रूयादिति। इत्यहे चतुरहेइत्यर्थः। तं द्वादशाहे चोदकप्राप्तं तच्च कर्मकालत्वात्तन्त्रमित्युक्तम्। द्वादशाहे च उपसदां द्वादशत्वात् (त्रयो) त्र्यहोदशाह इति वक्तव्यम्। तत्र संशयः-किं सङ्ख्याशब्दा (ब्दोऽ-) हश्शब्दश्चोहेनावापः त्रयोदशाहे चतुर्दशाह इत्येवं अथवा त्रयोदशाह इति सकृत् प्रयोक्तव्यमिति तन्त्रमिति।

तत्र प्रकृतौ चतुरह इति सौत्यस्याह्व उपलक्षणात् इह सौत्यानां



सर्वेषामह्वामुपलक्षणार्थं उक्तरीत्यावाप इतिप्राप्ते।

ब्रूमः। प्रकृतौ चतुरह इत्यर्थसिद्धसङ्ख्याहर्निर्देशमात्रार्थ सङ्ख्याहश्शब्दयोः सौत्यस्याह्व उपलक्षणार्थत्वेन अविवक्षितत्वादुक्तरीत्या तन्त्रमिति॥

(टि) ऊहेनेति। अभ्यासात्मकोऽत्रोह इति। सकृदिति। अतो नोह इति भावः। अविवक्षितत्वादिति। तर्हि किं विवक्षितमिति चेत् "सुत्यामागच्छ मघवन्नित्येवं सुत्यासम्बन्धिदेवतासंस्कारमात्रं विवक्षितमिति"

॥ वाजपेये प्राजापत्येषु कुम्भ्यादीनां तन्त्रताधिकरणम्"

सू. पशुगणे कुम्भीशूलवपाश्रपणिनां प्रभुत्वात् तन्त्रभावः स्यात्॥

(मू) एकदेवत्येषु प्राजापत्यादिपशुगणेषु तत्र संशयः-किं कुम्भीहृदयशूलं वपाश्रव(प)ण्यौ चावाप उत तन्त्रमिति। तत्र पश्वङ्गादीनां भिन्नत्वादावाप इति प्राप्ते।

ब्रूमः। कुम्भ्याः सर्वपश्ववयवानां हृदयशुलस्य सर्वहृदयानां वपाश्रपण्योश्च सर्ववपानां च श्रपणे सामर्थ्यसत्वात् तन्त्रमिति। उत्तरविवक्षार्थमिदम्॥

(टि) प्रयोजनमाह-उत्तरेति।

N.B. इतः परं त्रयाणां (9-11) अधिकरणानां आहत्य टिप्पणी लिखिता। अतः पूर्वोक्तानां नवमदशमैकादशानां मूलं समुच्चित्य लिख्यते॥

॥ भिन्नदेवताकेष्वपि शूलादीनां तन्त्रताधिकरणम्॥

सू. भेदस्तु सन्देहाद्देवतान्तरे स्यात्॥

(मू) भिनदेवत्येषु एकजातीयेषु एकादशिनादिषु पशुषु संशयः-किं कुम्भ्यादीनां भेद उत तन्त्रत्वमिति।

तत्र तन्त्रत्वे एककुम्भ्यादौ सहश्रपितेषु अंशोदितपशोः किमङ्गमित्येवमादिसंशयः (य) प्रसङ्गात् भेद इति प्राप्ते।

ब्रूमः। किंचिच्चिह्नं कृत्वापि अङ्गादीनां विवेकुं शक्यत्वात् तन्त्रमिति॥

॥ वसाकुम्भ्यापि तन्त्रताधिकरणम् ॥

सू. अयाज्यत्वाद्वसानां भेदः स्यात् स्वयाज्याप्रदानत्वात् ॥

(मू) तत्रैव सन्देहः किं कुम्भी आवापः उत तन्त्रमिति तत्र वसानां चिह्नकरणासम्भवात् भेद इति प्राप्ते।

ब्रूमः। प्रतिपत्ति भूतवसाहोमस्य तद्वव्यवसानां तत्पात्रस्य चाप्रयोजकत्वात् तन्त्रमेव कुम्भीति। न वेदमधिकरणान्तरमिति पक्षान्तरम् ॥

॥ भिन्नजातिषु कुम्भ्यादीनां भेदेनानुष्ठानाधिकरणम् ॥

सू. जात्यन्तरेषु भेदः स्यात् पंक्तिवैषम्यात् ॥

(मू) नानाजातीयेष्वेकादशिनेषु "आग्नेयः कृष्णग्रीवः सारस्वती मेषीत्यादिषु संशयः-किं कुम्भ्यादीनां तन्त्रत्वमुत भेद इति।

तत्र पूर्वन्यायात् तन्त्रत्वमिति प्राप्ते।

ब्रूमः। वक्रुवैषम्यात् भेद् इति ॥

(टि) अथ त्रिभिरधिकरणैः कुम्भ्यादि विचार्यते भिन्नेत्यादिना ॥

॥ अश्वप्रतिग्रहेष्टौ प्रतिपुरोडाशं कपाल भेदाधिकरणम् ॥

सू. कपालानि च कुम्भीवत्तुल्यसङ्ख्यानाम् ॥

(मू) अश्वप्रतिग्रहेष्ट्यां वारूणाश्चतुष्कपालाः पुरोडाशा अश्वसङ्ख्याया श्रूयन्ते- "यावतोऽश्वान् प्रतिगृण्ह्णीयात्तावतो वारूणांश्चतुष्कपालान्निर्वपेदिति। तत्र संशयः-यदा बहुष्वश्वेषु प्रतिगृहीतेषु बहवः पुरोडाशाः तन्त्रेण प्रयुज्यन्ते तदा संशयः किमेतेषां तन्त्रेण चत्वारि कपालानि स्युः उत प्रतिपुरोडाशं चत्वारि चत्वारीत्यावापेन स्युरिति।

तत्र दीर्घेषु चतुर्ष्वेव कपालेषु सर्वेषां पुरोडाशानां श्रपणसम्भवात् तन्त्रेण स्युरिति प्राप्ते।

ब्रूमः। चतुर्णां कपालानामवयवेषु श्रपितानां पुरोडाशानां चतुष्कपालत्वासम्भवात् आवापेन स्युरिति ॥

(टि) चतुर्णामिति। यावत्कपालं च प्रथनं प्रकृतितः प्राप्तं तत्तन्त्रत्वे सति न सम्पादयितुं शक्यमित्यतोऽपि भेद इति ॥



॥ व्रीह्यवहननादौ प्रतिप्रहारं मन्त्रस्यानावृत्त्यधिकरणम् ॥

सू. एकद्रव्ये संस्काराणां व्याख्यातमेककर्मत्वम् ॥

(मू) दर्शपूर्णमासयोरवधातः श्रूयते-"व्रीहीनवहन्तीति तंथावघातमन्त्रः- "अववक्षो दिवः सपत्नं वध्यासमिति। तत्र संशयः-किं प्रतिप्रहरणं भेदेन मन्त्रः प्रयोकतूव्यः उतः सकृदेव सर्वादौ प्रयोकतव्य इति। तत्र प्रहणण भेदात् प्रहरणाङ्गभूतो मन्त्रः प्रतिप्रहरणं प्रयोक्तव्य इति प्राप्ते। ब्रूमः। आतण्डुलनिवृत्त्यभ्यस्त प्रहरणस्यैककमत्वात् सर्वादौ सकृदेव मन्त्रः प्रयोक्तव्य इति ॥

(टि) एककर्मत्वादिति। अवधातकरणिका हि तण्डुलभावना "व्रीहीनवहन्तीत्यत्र श्रूयते। तच्छेषश्चायं मन्त्रः। नहि तस्या आवृत्तिः। नहि प्रति प्रहरणं तण्डुलाः क्रियन्त इति भावः ॥

॥ नानाबीजेष्टौ प्रतिप्रहारं मन्त्रावृत्त्यधिकरणम् ॥

सू. द्रव्यान्तरे कृतार्थत्वात्तस्य पुनः प्रयोगान्मन्त्रस्य तद्गुणत्वात् पुबः स्यात्तदर्थेन विधानात् ॥

(मू) अस्ति राजसूये नानाबीजेष्टि-"अग्नये गृहपतये पुरोडाशं अष्टाकपालं निर्वपति कृष्णानां व्रीहीणां सोमाय वनस्पतये श्यामाकं चरुमित्यादि। क्वचित् पाठभेदो दृश्यते। तत्र नानाबीजेषु संशयः-किमवधातमन्त्रः तन्त्रमुतावापः प्रतिबीजमिति। तत्र सर्वावघातचिकीर्षायां प्रयुक्तस्य मन्त्रस्यागृह्यमाणविशेषत्वात् मन्त्रः तन्त्रमिति प्राप्ते। ब्रूमः। प्रतिबीजं भेदेन चोदकप्राप्तस्य समन्त्रस्य सन्निपातिनोऽवघातस्य बीजभेदनिमित्त गृह्यमामविशेषत्वात् तदङ्गभूतोऽपि मन्त्रो गृह्यमाणविशेषस्सन् प्रतिबीजमावापः स्यादिति ॥

(टि) सन्निति हेतुत्वद्योतनार्थः ॥

॥ प्रतिनिर्वापादि मन्त्रावृत्त्यधिकरणम् ॥

सू. निर्वपन लवन स्तरणाज्यग्रहणेषु चैकद्रव्यवत् प्रयोजनैकत्वात् ॥

(मू) दर्शपूर्णमासयोः निर्वपणं लवनं स्तरणं आज्य ग्रहणं च श्रूयते "चतुरो मुष्टिन्निर्वपतिअयुजो मुष्टीर्लुनाति त्रिधातु पञ्चधातु वा वेदिं (करोति) ॥

स्तृणातिचतुर्जुह्वां गृह्णातीति। मन्त्राश्च" देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामीति" "बर्हिर्देवसदनं दामीति" ऊर्णा म्रदसं त्वा स्तृणामीति" "शुक्रं त्वा शुक्रायां धाम्ने देवेभ्यो यजुषे गृह्णामीति च।"

नत्र संशयः-किं मन्त्राणां सकृत् प्रयोग उत प्रतिमुष्टि प्रतिस्तरणं प्रत्याज्यग्रहणं चावृत्तिरिति।

निर्वापणादीनामेककर्मत्वात् तन्मन्त्राणां सकृत् प्रयोग इति प्राप्ते।

ब्रूमः। प्रतिमुष्टि प्रतिप्रस्तरणं प्रतिग्रहणं च व्रीहिदर्भबर्हिराज्यानां भिन्नत्वा न्मन्त्राणामावृत्तिरिति"

(टि) भिन्नत्वादिति। अनेनावधातमन्त्रवैषम्यमुक्तम्॥

॥ वैदिप्रोक्षणे प्रत्यावृत्ति मन्त्रानावृत्त्यधिकरणम्॥

सू. वेदिप्रोक्षणे मन्त्राभ्यासः कर्मणः पुनः प्रयोगात्॥

(मू) दर्शपूर्णमासयोः श्रूयते-"वेदिरसि बर्हिषे त्वेति त्रिर्वेदिं प्रोक्षतीति"। तत्र संशयः-किं प्रतिप्रोक्षणाभ्यासं मन्त्रं आवृत्त्यां प्रयोक्तव्यः उत सकृदेवादाविति। तत्र प्रोक्षणावृत्तेः तदङ्गभूतो मन्त्रोऽपि आवृत्त्या प्रयोक्तव्य इति प्राप्ते। ब्रूमः। प्रोक्षणक्रियायाः तत्संस्कार्याया वेद्याश्च भेदाभावात् सकृदेवादौ मन्त्रः प्रयोक्तव्य इति॥

(टि) भेदाभावादिति। किञ्चानेन मन्त्रेण त्रिरिति न सम्बन्धः किन्तर्हि मन्त्रस्य करणत्वात् क्रियया सम्बन्धः त्रिरभ्यसस्यापि ततस्तदुभयं क्रियाया एवाङ्ग नाभ्यासो मन्त्राङ्गम्। तेन मन्त्रवदावृत्तिमच्च प्रोक्षणं कर्तव्यमित्यतोऽपि मन्त्रावृत्तिरिति॥ (इतः परं पञ्चानां (17 21) अधिकरणानां एकीकृत्य टिप्पणी लिखिताऽस्ति मातृकायाम्)।

॥ कण्डूयनमन्त्रस्यानावृत्त्यधिकरणम्॥

सू. कण्डूयने प्रत्यङ्गं कर्मभेदात् स्यात्॥

(मू) ज्योतिष्टोमे श्रूयते-"कृष्णविषाणया कण्डूयत" इति। तत्र मन्त्रः "सुपिप्पलाभ्यस्त्वे'' त्यादिः। तत्र यदानेकेषु पाणाद्यङ्गेषु युगपत् कण्डूरुत्पद्यते तदा संशयः-किं प्रत्यङ्गं मन्त्रावृत्तिः अथवा सकृदेव



मन्त्रप्रयोग इति। तत्र प्रत्यङ्गं कण्डूक्रियाभेदाद् मन्त्रावृत्तिरिति प्राप्ते। ब्रूमः। सहोत्पन्नानां कण्डूदुःखानामपनयनस्य युगपच्चिकीर्षायां कण्डूयनेउपक्रममाणे प्रयुक्तस्य मन्त्रस्य अवघातमन्त्रवत् अगृह्यमाणविशेषत्वात् सकृदेव मन्त्रप्रयोग इति॥

॥ स्वप्नादिमन्त्रानावृत्त्यधिकरणम्॥

सू. स्वप्ननदीनरणाभिवर्षणामेध्यप्रतिमन्त्रणेषु चैवम्॥

(मू) ज्योतिष्टोमे सप्ता (स्वप्ना) र्थोमन्त्रः "त्वमग्ने व्रतपा असीति, तथा नदीतरणार्थश्च "देवीराप" इति तथाभिवृष्टस्य मन्त्र "उन्दतीः बलं धत्त" इति, तथामेध्यप्रतिमन्त्रणमन्त्रः "अबद्धं मनो दरिद्रं चक्षुरिति। तत्र यदि दीक्षितो रात्रौ पुनः पुनः प्रबुध्य सुप्यति; अनेकस्रोतसं वा नदीं तरति; सन्ताने नाभिवृष्यते; युगपच्चानेकान्यमे ध्यानि पश्यति; तदा संशयः किं मन्त्राणामावृत्तिः उत सकृत् प्रयोग इति। तत्र विशेषग्रहणात् आवृत्तिरिति प्राप्ते। ब्रूमः। रात्रिगतां सर्वां निद्रां नदीं वृष्टिं च कृत्स्नं चामेध्यदर्शनमभिसन्धाय प्रयुक्तानां मन्त्राणां अगृह्यमाणविशेषत्वात् सकृदेव प्रयोग इति॥

॥ दीक्षितस्य प्रयाणे मन्त्रानावृत्त्यधिकरणम्॥

सू. प्रयाणे त्वार्थनिवृत्तेः॥

(मू) दीक्षितस्य प्रस्थानार्थो मन्त्रः "भद्रादभि श्रेय" इति। तत्र संशयः-किं विश्रम्य प्रतिष्ठमानो मन्त्रं प्रयुञ्जीत उत सकृदेवादाविति तत्र विशेषग्रहणात् पुनः पुनः प्रयुञ्जीतेति प्राप्ते। ब्रूमः। आसमीहितप्राप्तेः प्रयाणस्यैकत्वात् तदर्थो मन्त्रः सकृदेवादौ प्रयुञ्जीतेति।

॥ उपरवमन्त्रस्यावृत्त्यधिकरणम्॥

सू. उपरव मन्त्रस्तन्त्रं स्याल्लोकवद्बहुवचनात्॥

(मू) ज्यतिष्टोमे सन्त्युपरवाःचत्वारः। तेषां खननार्थो मन्त्रः श्रूयते "रक्षोहणो वलगहनो वैष्णवान् खनामीति। तत्र संशयः-किमयं मन्त्रः चतुर्णां तन्त्रं उत प्रत्युपरवमावाप इति। तत्र वैष्णवानिति बहुवचनान्तात्वात् तन्त्रमिति प्राप्ते। ब्रूमः। खेयोपरवभेद कृतखननभेदात् प्रत्युपरवमावाप इति। बहुवचनं

त्वकजस्मिन्नेव पूजार्थमिति बोध्यम्॥

॥ हविष्कृदादिमन्त्राणामावृत्त्यधिकरणम्॥

**सू. हविष्कृदध्रिगुपुरोनुवाक्यामनोतस्या वृत्तिः कालभेदात्॥**

(मू) ज्योतिष्टोमे अनुसवनं सवनीयाः पुरोडाशाः। तत्र तेषु चोदकप्राप्तं हविष्कृदाह्वानं तत्र तथा वाजपेये यथा "प्राजापत्यान् सहोपक्रम्य यदा क्रतुपशन् सहोपक्रम्य प्राजापत्यान् पर्यग्निकृतानुत्सृज्य ब्रह्मसाम्न्या लभते तदा पश्वालम्भकाले प्रातस्सवने कृतमध्रिगुवचनं च तथा "आग्नेयं कृष्णग्रीवमालभेत सौम्य बभ्रुं आग्नेयं कृष्णग्रीवमिति। अत्र कृष्णग्रीवयोः भेदेन प्रदाने अवदाने च क्रियमाणे याज्यानुवाक्ये मनोतासन्त्रं च। तत्र संशयः-किं हविष्कृदाह्वानध्रिगुवचनं याज्यानुवाक्ये मनोतासूत्रं च तन्त्रं उत उत्तरयोः सवनयोः हविष्कृदाह्वानस्य ब्रह्मसामकालेऽध्रिगुवचनस्य उत्तरकृष्णग्रीवे याज्यानुवाक्ययोर्मनोतासूत्रस्य च आवृत्तिरिति। तत्र सर्वप्रयोगवचनानुग्रहात् तन्त्रमिति प्राप्ते। ब्रूमः। कालभेदादावृत्तिरिति। न वेदमधिकरान्तरम्॥

॥ इतिएकादशाध्यास्य
चतुर्थः पादः॥

॥ अध्यायश्च समाप्तः॥

(टि) अथ पञ्चभिरधिकरणैर्मन्त्रेष्वेव तन्त्रावापौ चिन्त्येते ज्योतिष्टोम इत्यादिना॥

॥ इति केरलीये षोडशाध्यायीटिप्पणे
एकादशस्याध्यायस्य
चतुर्थः पादः॥
॥ समाप्तश्चाध्यायः॥

॥ अथ द्वादशाध्यायस्य प्रथमः पादः॥

॥ अग्नीषोमीयप्रयाजादिभिः पुरोडाशस्योपकारधिकरणम्॥

**सू. तन्त्रिसमवाये चोदनातः समाम्नानामेकतन्त्रत्वमतुल्येषु तु भेदः**



**स्यात् विधिक्रमतादर्थ्यात् तादर्थ्यश्रुतिकालनिर्देशात्॥**

ज्योतिष्टोमे अग्नीषोमीये पशौ श्रूयते- "अग्नीषोमीयस्य वपया प्रचर्य अग्नीषोमीयं पशुपुरोडाशं निर्वपतीति। तत्र संशयः-किं नास्ति प्रसङ्गः ततश्च पश्वर्थानुष्ठितान्यङ्गानि पशुपुरोडाशस्य नोपकुर्वन्ति ततश्च बहुपुरोडाशोपकारसिद्ध्यर्थं पृथगङ्गान्यनुष्ठेयानि। इदं द्वादशं प्रसङ्गलक्षणं च नारम्भणीयमुतास्ति प्रसङ्ग; ततश्च पश्वर्थमनुष्ठितान्यङ्गानि पशुपुरोडशस्यापि प्रसङ्गेनोपकुर्वन्ति ततश्च न पृथक् पुरोडाशोपकारसिध्यर्थं अङ्गान्यनुष्टेयानि प्रसङ्गलक्षणं चारम्भणीयमिति। तत्र पृथगेव चोदकप्राप्तानां अङ्गानां पशौ पुरोडाशे च पृथगेव प्रयोगविधिचोदितत्वान्नास्ति प्रसङ्ग ततश्चोक्तरीत्या प्रसङ्गलक्षणं नारम्भणीयमिति प्राप्ते।

ब्रूमः। पुरोडशप्रयोगवचनेन लाघवार्थं पशुतो यान्यङ्गानि लभ्यन्ते तद्विशिष्टपुरोडाशप्रयोगस्य विधानात् अस्ति प्रसङ्गः। ततश्चोक्तरीत्या आरम्भणीयं प्रसङ्गलक्षणमिति। अन्यार्थं कृतस्यान्यत्रोपकारः प्रसङ्गः॥ यथा प्रासाद आलोककरणार्थं कृतस्य दीपस्य राजमार्गेऽपि आलोककरणम्॥

॥ श्रीः॥

॥ अथ द्वादशस्य प्रथमः पादः॥

(टि) एवं तन्त्ररूपे प्रयोगपरिमाणे चिन्तिते। अधुना तत्परिमाणमेव प्रसङ्गरूपं चिन्त्यते। गृह्यमाणविशेषाणय्प्यङ्गानि एकदेशकाल कर्तृणामुपकुर्वन्तीति नारम्भणीय मिति। अत्र प्रसङ्गाभावो (वे) हेतुः आरम्णीयमित्यत्र प्रसङ्गसद्भाव इति द्रष्टव्यम्। पृथगेवेति। अयमाशयः, पशुपुरोडाशो दार्शपौर्णमासिकादग्नीषोमीयात् पुरोडाशात् सादृश्येन विध्यन्तं गृह्णाति पशुश्च सान्नाय्यात्। ततः साङ्गः पशुः कर्तव्य इति पशुप्रयोगवचनेन चोद्यते साङ्ग पुरोडाशः कर्तव्य इति च तत्प्रयोगवचनेन। तत्र यदि प्रसङ्गः स्यात्ततः प्रधानमात्रानुष्ठानात् साङ्गः पुरोडाशः कर्तव्य इत्येष विधिर्बाध्येत। तेन वचनाप्रामाण्यादेव प्रसङ्गाभाव इति। किञ्च प्रसङ्गाश्रयणे वैगुण्यं च

स्यात्। तथाहि- पुरोडाशस्य प्रकृतिवदनुदेशात् प्रयाजानन्तरमाज्यभागाङ्गं तदनन्तरं च प्रधानं प्राप्तम्। तत्र पाशुकेषु प्रयाजेषु प्रसज्यमानेषु तदानन्तर्यगुणहानादाज्य भागयोर्वैगुण्यम्। अथ वैकल्पिकात् पशावपि आज्यभागावनुष्ठितौ; ततस्तयोरपि प्रसज्यमानयोः पुरोडाशस्य तदानन्तर्यगुणलोपाद्वैगुण्यमिति। पुरोडाशेति। अयमभिप्रायः-पुरोडाशविधौ तावत् प्रथमं भावयेदित्यवगम्यते। ततः किमित्यपेक्षायां पशूपकारमिति, केनेत्यपेक्षायां पुरोडाशयागेनेति ततः कथमिति यागगतव्यपारोऽपक्ष्य। स चोपमितिलक्षितप्रमाणेन पौर्णमासिकस्याग्नीषोमीयस्य यो व्यापारः प्रयाजादिजन्यदृष्टदृष्टोपकारवत्तासम्पादनारव्यस्तं द्रव्यदेवतासादृश्येन नियच्छतीति। ततस्तस्य व्यापारस्य पशुपुरोडाशयागेन सम्बन्धं करोति। तदेतन्नियमनमुत्पत्तिरित्युच्यते सम्बन्धकरणं च विनियोग इति। द्वौ चेमावुत्पत्तिविनियोगरूपौ यागगतव्यापारविशेषविषयौ चोदकस्य व्यापारौ। तत उत्तरकालं नानाविधाङ्गजुष्टस्य प्रकारस्य साकल्येन गृहीत्वानुष्ठापनम्। एष च प्रयोगवचनस्य व्यापारः । स एवोपसङ्गह इत्युच्यते। तादृशश्च प्रयोगवचन इह पाशुकेन प्रयोगवचनेन तस्य प्रकाररस्यानुष्ठापितत्वात् न भूयोऽनुष्ठापयति। तस्मात् पौरोडाशिकप्रयोगवचनस्य लोपः, स एव प्रसङ्ग इत्युच्यते। तथा च वार्तिकं "तस्मात् पौरोडाशिकः प्रयोगवचनो लुप्यते एष प्रसङ्ग इति। व्याख्यातं च पार्थसारथिमिश्रैस्तन्त्ररत्ने "यदन्यार्थैः कृतार्थत्वेन स्वीयप्रयोगवचनलोप" इति। सोऽ यं प्रयोगवचनस्य लोपो न तत्स्वरूपस्य किं त्वन्येनानुष्ठापित प्रकारानुष्ठापनांशस्य। तस्मान्न करणांशस्याननुष्ठानापत्तिः तदंशे लोपाभावात्। ततश्च पुरोडाशप्रयोगवचनः पश्वर्थप्रयाजादिजन्योपकारैस्तद्वत्तामुपजीव्य यान्यङ्गानि पशुनो न लभ्यन्ते तद्युक्तमेव प्रधान विदधाति यद्विशिष्टं च प्रधानं विधीयते तेषामेव प्रधानकालत्वं क्रमश्चाङ्गं भवति। तस्मात् प्रधानमात्रानुष्ठानेऽपि न शास्त्रबाधो नापि क्रमलोपाद्वैगुण्यमिति। तदयमत्र फलितोऽर्थः- यस्सधारणाङ्ग्रामक्रतुमध्ये विधानात् प्रयोगवचनैकदेशलोपः स प्रसङ्गः। स चेहास्तीति। इदमेव प्रसङ्गलक्षणं सदृष्टान्तं दर्शयति अन्यार्थमित्यादिना। तथा च भाष्यम्-अन्यत्र कृतस्यार्थस्यान्यत्रापि प्रसक्तिः प्रसङ्गः यथा



प्रदीपप्रकाशस्य प्रासादे कृतस्य राजमार्गेऽप्यालोककरणमिति॥

**॥ पुरोडाशे आज्यभागयोः कर्तव्यताधिकरणम्॥**

**सू. जैमिनेः परतन्त्रत्वापत्तेः स्वतन्त्रप्रतिषेधः स्यात्॥**

(मू) पशुपुरोडाशे यत् पशावविद्यमानं अङ्गजातं आज्यभागावघातादिकं तत्र संशयः किं पशुपुरोडाशे आज्यभागावघातादिकं न कर्तव्यमुत कर्तव्यमिति। तत्र प्रसङ्गमुपजीवता पुरोडाशयागेनानुमानिकस्य प्रत्यक्षसिद्धप्रयोगवचनात् दुर्बलस्य बाधान्न कर्तव्यमिति प्राप्ते।

ब्रूमः। पश्चात् प्रवर्तमानस्य प्रयोगवचनस्य प्रथमप्रवृत्तचोदकाद्दुर्बलस्य प्रसङ्गमुपजीवता पुरोडाशयागेन बाधात् आज्यभागावघातादिकं कर्तव्यमिति॥

इदं त्ववधेयम्-चोदकेन वा श्रुत्यादिना वा समर्पितान्यङ्गानि प्रयोगवचनेन गृहीत्वा तद्विशिष्टां प्रयोगभावनां विधीयते तथा चोदकेन सर्वाण्यङ्गानि प्राप्यन्ते। तत्र प्रसङ्गेन प्रयोगवचनैकस्य प्रजादिविषयो य एकदेशः स बाध्यते (तेषां प्रासङ्गिकत्वाभावात्) आज्यभागादिविषयस्तु न बाध्यते (तेषां) प्रासङ्गिकत्वाभावात्। तस्मादाज्यभागादिकं कर्तव्यम्। यदि पौरोडाशिकश्चोदको बाध्यते तदा प्रयोगवचनेन पाशुकान्यङ्गान्येव गृहीत्वा तद्विशिष्टा प्रयोगभावना विधीयते ततश्च आज्यभागादिकं न कर्तव्यं पशावभावादिति विवेक इति।

(टि) एवं करणांशेन प्रयोगवचनस्य लोप इत्युक्तम्। इदानीं तु कथम्भावांशे लोपोऽस्ति नेति चिन्त्यते। चोदकप्रयोगवचनयोर्मिथो विरोधाभावान्नैकेनान्यस्य बाधः। उभयाबाधे च प्रसङ्गोपजीवनं न सम्भवतीति तस्यैव विरोध इत्याशयेनाह-प्रसङ्गमुपजीवतेति। बाधादिति। पाशुकेन चोदकेन प्रापितान्यङ्गकार्याणि पौरोङ्गशिकप्रयोगवचनः सङ्गृह्य तद्विशिष्टं प्रयोगं विधत्ते। तैरेव च पुरोडाशस्य निराकाङ्क्षत्वात् पौरोडाशिकश्चोदकः कृतकरत्वाल्लुप्यते। तेन पशौ विद्यमानानामेव पुरोडाशेन सङ्गहादाज्यभागादी-नामकरणमित्यर्थः। पश्चादिति। किञ्च चोदकाधीनात्मलाभत्वाच्च प्रत्यक्षस्यापि प्रयोगवचनस्य बाधः। अपि च

चोदकस्य बाधे सति अङ्गानामुत्पत्तिप्राप्त्योरभावात् पुरोडाशयागस्याङ्गान्येव न सन्तीति न प्रसङ्ग आत्मानं लभते। अतः प्रसङ्गमुपजीवता चोदको बाध्यत इतिव्याहतमेवेत्यभिप्रायः। प्रयोगवचनस्याप्यंश एव बाध्यत इति दर्शयन्नाह इदं त्वित्यादिना।

अयमभिप्रायः। प्रकृतौ तावत् "समिधो यजतीत्यादिभिरङ्गानामुत्पत्तिः श्रुत्यादिभिश्च विनियोगः। स एव प्रधानसम्बन्धकरणं प्राप्तिरिति चोच्यते। विकृतिषु चोदकस्थले उत्पत्तिप्राप्ती चोदकेन क्रियेते। सर्वत्रैव हि प्रयोगवचन उपसङ्गहं करोति। तत्रोपशब्दः समीपवचनः। एवं त्र्यंशः प्रयोगवचनः। तत्र यो ग्रहणांशः सोऽस्य रूपं, समीपकरणसाकल्ये त्वस्य विशेषणे। ते चार्थल्लभ्येते न श्रुत्या। ततश्चेह पाशुकेन प्रयोगवचनेन प्रयाजाद्यपूर्वाणां कृतं इति तेषा मन्थनन्ति पपत्तिः क्षीणेति न पौरो डाशिकप्रयोग वचनः सामीप्यं करोति येषां चाज्यभागादीनां न पाशुकेन प्रयोगवचनेन सामीप्यं कृतं तेषामन्यथानुपपत्त्या सामीप्यं स करोत्येव। तस्मात् प्रयाजादिविषयः सामीप्यकरणैकदेशः प्रसङ्गेन पौरोडाशिकप्रयोगवचनस्य बाध्यत इति। तदेतदाह-प्रयाजादीति। पूर्वपक्षाशयमाह यदीत्यादिना॥

**॥ सोमे दार्शिकवेद्यकरणधिकरणम्॥**

**सू. नानार्थत्वात् सोमे दर्शपूर्णमास प्रकृतीनां वेदिकर्म स्यात्॥**

(मू) ज्योतिष्टोमे महावेद्यायां (द्यं) कृतायां यानि दर्शपूर्णमासप्रकृतीनि कर्माणि प्रवर्तन्ते। तेषु संशयः-किं महावेद्यां भेदेन प्राकृती वेदि कर्तव्या नेति। तत्राङ्गप्रचारार्थाया वेदेर्हविस्साधनार्थत्वाभावात् हविस्साधनार्थं प्राकृती कर्तव्येति प्राप्ते। ब्रूमः। प्रचारार्थाया एव प्रसङ्गेन हविस्सादनस्य कर्तुं शक्यत्वात् न प्राकृती कर्तव्येति॥

(टि) यद्यप्यङ्गप्रधानार्थावेदिरिति स्थितं तथापीयति शक्ष्यामहेऽस्यां कर्तुमिति वचनात् प्रचारार्थमवगम्यत इत्याशयेनाह-प्रचारार्थेति। शक्यत्वादिति। वेद्यां हविरासादनं प्रकृतौ श्रुतं न हविरासादनार्थायां वेद्यामिति। अतो न प्रचारार्थाया वेद्यां प्रसङ्गादासादने न वैगुण्यमित्यभिप्रायः।



**॥ सौम्यचर्वादिहोमस्यैष्टिकपात्रैरनुष्ठानाधिकरणम्॥**

**सू. पात्रेषु च प्रसङ्गः स्याद्धोमार्थत्वात्॥**

(मू) सोमाङ्गेष्वैष्टिकेषु कर्मसु संशयः-किं तेषु सौमिकानि ग्रहचमसादीनि पात्राणि प्रसज्यन्ते उत जुह्वादीनि पृथक् प्रयोक्तव्यानीति। तत्र सौमिकैरेवैष्टिकानां होमादिकार्यसिद्धेः प्रसज्यन्त इति प्राप्ते। ब्रूमः। जुह्वादिभिः कर्तव्यानां होमादीनां अन्यैः क्रियमाणानां वैगुण्यप्रसङ्गात् जुह्वादीन्येव पृथक् प्रयोक्तव्यानीति॥

(टि) जुह्वादीन्येवेति। न ह्यत्र पात्रान्तरेण प्राकृतैष्टिकहोमादि कार्यं सिद्धं पृषदाज्य द्रव्यकैरिवानूयाजैः प्राकृतमनूयाजकार्यां येन होमादीनां स्वगुणेऽनादरः स्यात्। तस्मादिह नास्ति प्रसङ्ग इति भावः॥

**॥ शामित्रे पशुपुरोडाशश्रपणाभावाधिकरणम्॥**

**सू. शमित्रे च पशुपुरोडाशो न स्यादितरस्य प्रयुक्तत्वात्॥**

(मू) पशुपुरोडाश एव संशयः-किमस्य पशुश्रपाणार्थेशामित्रेऽग्नौ श्रपणमुत शालामुखीय इति। तत्र शामित्रेऽपि श्रपणसिद्धेः शामित्रे श्रपणमिति प्राप्ते। ब्रूमः। वैगुण्यप्रसङ्गात् शालामुखीय एषो (व) "अतऊर्ध्वं गार्हपत्यो भवतीति वचनेन गार्हपत्यकार्ये विहिते शालामुखीयचोदकप्राप्तं गार्हपत्ये श्रपणं कर्तव्यमिति। अत्र चोदकप्राकयोः मध्ये पशोः पाके शामित्रे विहित इति स एवं पुरोडाशपाकेमपि प्रसज्येतेति शङ्कानिरासार्थमिदमधिकरणम्॥

**(टि) गतार्थतामाशङ्क्याह अत्रेत्यादिना" ॥**

**कौण्डपायिनामयनेऽग्निहोत्रद्रव्यस्य प्राजहिते श्रपणाधिकरणम्॥**

**सू. श्रपणं चाग्निहोत्रस्य शालामुखीये न स्यात् प्राजहितस्य विद्यमानत्वात्।**

(मू) कौण्डपायिने अग्निहोत्रे संशयः-किं प्राजहितेमुख्यगार्हपत्ये श्रपणमुत शालामुखीय इति। तत्र चोदकप्राप्तेः शालामुखीये श्रपणमिति प्राप्ते। ब्रूमः। नामप्राप्तेः प्रापणमिति प्रपञ्चार्थमिदमधिकरणम्। अत्र सत्रे सर्वगार्हपत्यकार्याय चोदकेन प्रवृत्तः शालामुखीयोऽग्निहोत्रश्रपणेऽपि प्रसज्येतेति विशेषा शङ्केति बोध्यम्॥

(टि) प्रपञ्चार्थमिति। साद्गुण्यसम्भवे वैगुण्यानाश्रयणमिति न्यायस्येति शेषः॥

**॥ हविर्धानशकटान्यशकटेनौषधद्रव्यक पुरोडाशनिर्वापाधिकरणम् ॥**

**सू. हविर्धाने निर्वपणार्थं साधयेतां प्रयुक्तत्वात् ॥**

(मू) ज्योतिष्योमे हविर्धानसंज्ञकयोः शकटयोः प्रवर्तने कृते यानि सवनीयपशुपुरोडाशादीनि ऐष्टिकानि कर्माणि तेषु संशयः-किंतेषां निर्वाच्योऽन्यतरत्र हविर्धाने कर्तव्यः उतानोऽन्तरमुपादेयमिति। तत्रानसोऽधि निर्वपतीत्यस्य शास्त्रस्य योऽर्थः तस्य हविर्धानयोरपि सम्भवात्तयोरन्यतरत्र निर्वाप इति प्राप्ते।

ब्रूमः। देशभेदादनोऽन्तरमुपादेयमिति। तथाहि-आवरणे गार्हपत्यं निर्वतीति वचनेन निर्वापस्य गार्हपत्यात् पश्चिमदेशो विहितः महावेद्यामास्थापितयोः हविर्धानयोश्च प्राग्वंशनयनासम्भवात् देशभेद इति बोध्यम् ॥

(टि) देशभेदमेवोपपादयति तथा हीत्यादिना।

**॥ प्रायणीयादिषु दीक्षाजागरस्याभावाधिकरणम् ॥**

**सू. तद्युक्तं कालभेदात् ॥**

(मू) ज्योतिष्टोमे दीक्षाकालं रात्रिजागरणं आम्नातम् "यां प्रथमां रात्रिं दीक्षितो जागर्ति, तथा "स्वप्ने न व्यावर्तितो भवतीति दर्शपूर्णमासयोश्च। एकेषामौपवसथ्येऽहनि आपि जागरणमाम्नातम्। तत् प्रायणीयादिषु चोदकेन प्राप्तम्। तत्र संशयः-किं तेषु चोदकप्राप्तं जागरणं न कर्तव्यमुत कर्तव्यमिति।

तत्र प्रसङ्गेन दीक्षाकालजागरणे कार्यसिद्धेर्न कर्तव्येति प्राप्ते।

ब्रूमः। यज्ञसाधनरक्षण रूपदृष्टस्य वा कार्यस्य भेदात् प्राकृतं चोदकप्राप्तं जागरणमपि कर्तव्यमिति ॥ तत्र प्रसङ्गेन दीक्षाकाल जागरणे कार्यसिद्धेर्न कर्तव्येति प्राप्ते।

ब्रुमः। यज्ञसाधनक्षरक्षरणरूपदृष्टस्य वादृष्टस्य वा कार्यस्य भेदात् प्राकृतं चोदक प्राप्ते।

जागरणमपि कर्तव्यमिति। (टि) यज्ञसाधनेति। अयमाशयः-दीक्षोत्तरकालानि हि प्रायणीयादीनि कर्माणि। यज्ञसाधनरक्षणार्थं च



जागरणम्। नच दीक्षकाले रक्षितेषु तदुत्तर कालानि रक्षितानि भवन्तीति। अथादृष्टार्थं जागरणं तथापि सौमिकेन जागरणेनैष्टिक जागरणजन्यादृष्टसिद्धौ न प्रमाणमि-त्याशयेनाह- अदृष्टस्य वेति ॥

**विहारभेदेन मन्त्रभेदाधिकरणम्।**

**सू-मन्त्राश्च संनिपातित्वात्।**

वरुणप्रधासेषु दक्षिणोत्तरविहारयोः निर्वापादिमन्त्राः किमध्वर्युणा प्रतिप्रस्थात्रा वा वक्तव्या उतोभाभ्यामिति भेदेनेति संशयः। तत्रान्यतरेणीचरितैरप्युभयोः स्मृतेः कर्तुं शक्यत्वात्।

ब्रूमः। निर्वपामीत्युत्युत्तमस्यात्माभिवादित्वात् भेदेन वक्तव्या इति।

(टि) इदानीं प्रयोगपरिमाणसामान्यात् तन्त्रावाचिन्ता वरुणेत्यादिना।

**दीक्षणीयादिऽवग्न्यन्वाधानस्या भावाधिकरणम् ॥**

**सू - धारणार्थत्वात् सोमेऽग्न्यन्वाधानं न विद्यते ॥**

*Printed by :* 854 56 70

**Royapettah Stationery and Printing and Allied Products Producers Industrial Co-op. Society Ltd.,**
26, Koya Arunagiri First Street, Royapettah, Chennai - 14.